# Rigveda Mandala 10

# ઋગ્વેદઃ મણ્ડલં ૧૦

## Document Information

Text title : Rigveda Mandalam 10

File name : r10.itx

Category : veda, rigveda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : 1. Source: Aufrecht/van Nooten/Holland (Samhita), 2. Final transliteration: Detlef Eichler

Proofread by : Detlef Eichler detlefeichler at googlemail.com

Latest update : July 2, 2013

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# ઋગ્વેદઃ મણ્ડલં ૧૦

અગ્રે બૃહન્નુષસામૂર્ધ્વો અસ્થાન્નિર્જગન્વાન્તમસો જ્યોતિષાગાત્ ।
અગ્નિર્ભાનુના રુશતા સ્વઙ્ગ આ જાતો વિશ્વા સદ્માન્યપ્રાઃ ॥ ૧૦.૦૦૧.૦૧
સ જાતો ગર્ભો અસિ રોદસ્યોરગ્ને ચારુર્વિભૃત ઓષધીષુ ।
ચિત્રઃ શિશુઃ પરિ તમાંસ્યક્તૂન્પ્ર માતૃભ્યો અધિ કનિક્રદદ્ગાઃ ॥ ૧૦.૦૦૧.૦૨
વિષ્ણુરિત્થા પરમમસ્ય વિદ્વાઞ્જાતો બૃહન્નભિ પાતિ તૃતીયમ્ ।
આસા યદસ્ય પયો અક્રત સ્વં સચેતસો અભ્યર્ચન્ત્યત્ર ॥ ૧૦.૦૦૧.૦૩
અત ઉ ત્વા પિતુભૃતો જનિત્રીરન્નાવૃધં પ્રતિ ચરન્ત્યન્નૈઃ ।
તા ઈં પ્રત્યેષિ પુનરન્યરૂપા અસિ ત્વં વિક્ષુ માનુષીષુ હોતા ॥ ૧૦.૦૦૧.૦૪
હોતારં ચિત્રરથમધ્વરસ્ય યજ્ઞસ્યયજ્ઞસ્ય કેતું રુશન્તમ્ ।
પ્રત્યર્ધિં દેવસ્યદેવસ્ય મહ્ના શ્રિયા ત્વ૧ગ્નિમતિથિં જનાનામ્ ॥ ૧૦.૦૦૧.૦૫
સ તુ વસ્ત્રાણ્યધ પેશનાનિ વસાનો અગ્નિર્નાભા પૃથિવ્યાઃ ।
અરુષો જાતઃ પદ ઇળાયાઃ પુરોહિતો રાજન્યક્ષીહ દેવાન્ ॥ ૧૦.૦૦૧.૦૬
આ હિ દ્યાવાપૃથિવી અગ્ન ઉભે સદા પુત્રો ન માતરા તતન્થ ।
પ્ર યાહ્યચ્છોશતો યવિષ્ઠાથા વહ સહસ્યેહ દેવાન્ ॥ ૧૦.૦૦૧.૦૭
પિપ્રીહિ દેવાઁ ઉશતો યવિષ્ઠ વિદ્વાઁ ઋતૂઁરૃતુપતે યજેહ ।
યે દૈવ્યા ઋત્વિજસ્તેભિરગ્ને ત્વં હોતૃણામસ્યાયજિષ્ઠઃ ॥ ૧૦.૦૦૨.૦૧
વેષિ હોત્રમુત પોત્રં જનાનાં મન્ધાતાસિ દ્રવિણોદા ઋતાવા ।
સ્વાહા વયં કૃણવામા હવીંષિ દેવો દેવાન્યજત્વગ્નિરર્હન્ ॥ ૧૦.૦૦૨.૦૨
આ દેવાનામપિ પન્થામગન્મ યચ્છક્નવામ તદનુ પ્રવોળ્હુમ્ ।
અગ્નિર્વિદ્વાન્સ યજાત્સેદુ હોતા સો અધ્વરાન્સ ઋતૂન્કલ્પયાતિ ॥ ૧૦.૦૦૨.૦૩
યદ્વો વયં પ્રમિનામ વ્રતાનિ વિદુષાં દેવા અવિદુષ્ટરાસઃ ।
અગ્નિષ્ટદ્વિશ્વમા પૃણાતિ વિદ્વાન્યેભિર્દેવાઁ ઋતુભિઃ કલ્પયાતિ ॥ ૧૦.૦૦૨.૦૪

યત્પાકત્રા મનસા દીનદક્ષા ન યજ્ઞસ્ય મન્વતે મર્ત્યાસઃ ।
અગ્નિષ્ટદ્ધોતા ક્રતુવિદ્વિજાનન્યજિષ્ઠો દેવાઁ ઋતુશો યજાતિ ॥ ૧૦.૦૦૨.૦૫
વિશ્વેષાં હ્યધ્વરાણામનીકં ચિત્રં કેતું જનિતા ત્વા જજાન ।
સ આ યજસ્વ નૃવતીરનુ ક્ષાઃ સ્પાર્હા ઇષઃ ક્ષુમતીર્વિશ્વજન્યાઃ ॥ ૧૦.૦૦૨.૦૬
યં ત્વા દ્યાવાપૃથિવી યં ત્વાપસ્ત્વષ્ટા યં ત્વા સુજનિમા જજાન ।
પન્થામનુ પ્રવિદ્વાન્પિતૃયાણં દ્યુમદગ્ને સમિધાનો વિ ભાહિ ॥ ૧૦.૦૦૨.૦૭
ઇનો રાજન્નરતિઃ સમિદ્ધો રૌદ્રો દક્ષાય સુષુમાઁ અદર્શિ ।
ચિકિદ્વિ ભાતિ ભાસા બૃહતાસિક્નીમેતિ રુશતીમપાજન્ ॥ ૧૦.૦૦૩.૦૧
કૃષ્ણાં યદેનીમભિ વર્પસા ભૂજ્જનયન્યોષાં બૃહતઃ પિતુર્જામ્ ।
ઊર્ધ્વં ભાનું સૂર્યસ્ય સ્તભાયન્દિવો વસુભિરરતિર્વિ ભાતિ ॥ ૧૦.૦૦૩.૦૨
ભદ્રો ભદ્રયા સચમાન આગાત્સ્વસારં જારો અભ્યેતિ પશ્ચાત્ ।
સુપ્રકેતૈર્દ્યુભિરગ્નિર્વિતિષ્ઠન્રુશદ્ભિર્વર્ણૈરભિ રામમસ્થાત્ ॥ ૧૦.૦૦૩.૦૩
અસ્ય યામાસો બૃહતો ન વગ્નૂનિન્ધાના અગ્નેઃ સખ્યુઃ શિવસ્ય ।
ઈડ્યસ્ય વૃષ્ણો બૃહતઃ સ્વાસો ભામાસો યામન્નક્તવશ્ચિકિત્રે ॥ ૧૦.૦૦૩.૦૪
સ્વના ન યસ્ય ભામાસઃ પવન્તે રોચમાનસ્ય બૃહતઃ સુદિવઃ ।
જ્યેષ્ઠેભિર્યસ્તેજિષ્ઠૈઃ ક્રીળુમદ્ભિર્વર્ષિષ્ઠેભિર્ભાનુભિર્નક્ષતિ દ્યામ્ ॥ ૧૦.૦૦૩.૦૫
અસ્ય શુષ્માસો દદૃશાનપવેર્જેહમાનસ્ય સ્વનયન્નિયુદ્ભિઃ ।
પ્રત્નેભિર્યો રુશદ્ભિર્દેવતમો વિ રેભદ્ભિરરતિર્ભાતિ વિભ્વા ॥ ૧૦.૦૦૩.૦૬
સ આ વક્ષિ મહિ ન આ ચ સત્સિ દિવસ્પૃથિવ્યોરરતિર્યુવત્યોઃ ।
અગ્નિઃ સુતુકઃ સુતુકેભિરશ્વૈ રભસ્વદ્ભી રભસ્વાઁ એહ ગમ્યાઃ ॥ ૧૦.૦૦૩.૦૭
પ્ર તે યક્ષિ પ્ર ત ઇયર્મિ મન્મ ભુવો યથા વન્દ્યો નો હવેષુ ।
ધન્વન્નિવ પ્રપા અસિ ત્વમગ્ન ઇયક્ષવે પૂરવે પ્રત્ન રાજન્ ॥ ૧૦.૦૦૪.૦૧
યં ત્વા જનાસો અભિ સંચરન્તિ ગાવ ઉષ્ણમિવ વ્રજં યવિષ્ઠ ।
દૂતો દેવાનામસિ મર્ત્યાનામન્તર્મહાઁશ્ચરસિ રોચનેન ॥ ૧૦.૦૦૪.૦૨
શિશું ન ત્વા જેન્યં વર્ધયન્તી માતા બિભર્તિ સચનસ્યમાના ।
ધનોરધિ પ્રવતા યાસિ હર્યઞ્જિગીષસે પશુરિવાવસૃષ્ટઃ ॥ ૧૦.૦૦૪.૦૩
મૂરા અમૂર ન વયં ચિકિત્વો મહિત્વમગ્ને ત્વમઙ્ગ વિત્સે ।

શયે વવ્રિશ્ચરતિ જિહ્વયાદન્રેરિહ્યતે યુવતિં વિશ્પતિઃ સન્ ॥ ૧૦.૦૦૪.૦૪
કૂચિજ્જાયતે સનયાસુ નવ્યો વને તસ્થૌ પલિતો ધૂમકેતુઃ ।
અસ્નાતાપો વૃષભો ન પ્ર વેતિ સચેતસો યં પ્રણયન્ત મર્તાઃ ॥ ૧૦.૦૦૪.૦૫
તનૂત્યજેવ તસ્કરા વનર્ગૂ રશનાભિર્દશભિરભ્યધીતામ્ ।
ઇયં તે અગ્ને નવ્યસી મનીષા યુક્ષ્વા રથં ન શુચયદ્ભિરઙ્ગૈઃ ॥ ૧૦.૦૦૪.૦૬
બ્રહ્મ ચ તે જાતવેદો નમશ્ચેયં ચ ગીઃ સદમિદ્વર્ધની ભૂત્ ।
રક્ષા ણો અગ્ને તનયાનિ તોકા રક્ષોત નસ્તન્વો૩ અપ્રયુચ્છન્ ॥ ૧૦.૦૦૪.૦૭
એકઃ સમુદ્રો ધરુણો રયીણામસ્મદ્ધૃદો ભૂરિજન્મા વિ ચષ્ટે ।
સિષક્ત્યૂધર્નિણ્યોરુપસ્થ ઉત્સસ્ય મધ્યે નિહિતં પદં વેઃ ॥ ૧૦.૦૦૫.૦૧
સમાનં નીળં વૃષણો વસાનાઃ સં જગ્મિરે મહિષા અર્વતીભિઃ ।
ઋતસ્ય પદં કવયો નિ પાન્તિ ગુહા નામાનિ દધિરે પરાણિ ॥ ૧૦.૦૦૫.૦૨
ઋતાયિની માયિની સં દધાતે મિત્વા શિશું જજ્ઞતુર્વર્ધયન્તી ।
વિશ્વસ્ય નાભિં ચરતો ધ્રુવસ્ય કવેશ્ચિત્તન્તું મનસા વિયન્તઃ ॥ ૧૦.૦૦૫.૦૩
ઋતસ્ય હિ વર્તનયઃ સુજાતમિષો વાજાય પ્રદિવઃ સચન્તે ।
અધીવાસં રોદસી વાવસાને ઘૃતૈરન્નૈર્વાવૃધાતે મધૂનામ્ ॥ ૧૦.૦૦૫.૦૪
સપ્ત સ્વસૄરરુષીર્વાવશાનો વિદ્વાન્મધ્વ ઉજ્જભારા દૃશે કમ્ ।
અન્તર્યેમે અન્તરિક્ષે પુરાજા ઇચ્છન્વવ્રિમવિદત્પૂષણસ્ય ॥ ૧૦.૦૦૫.૦૫
સપ્ત મર્યાદાઃ કવયસ્તતક્ષુસ્તાસામેકામિદભ્યંહુરો ગાત્ ।
આયોર્હ સ્કમ્ભ ઉપમસ્ય નીળે પથાં વિસર્ગે ધરુણેષુ તસ્થૌ ॥ ૧૦.૦૦૫.૦૬
અસચ્ચ સચ્ચ પરમે વ્યોમન્દક્ષસ્ય જન્મન્નદિતેરુપસ્થે ।
અગ્નિર્હ નઃ પ્રથમજા ઋતસ્ય પૂર્વ આયુનિ વૃષભશ્ચ ધેનુઃ ॥ ૧૦.૦૦૫.૦૭
અયં સ યસ્ય શર્મન્નવોભિરગ્નેરેધતે જરિતાભિષ્ટૌ ।
જ્યેષ્ઠેભિર્યો ભાનુભિરૃષૂણાં પર્યેતિ પરિવીતો વિભાવા ॥ ૧૦.૦૦૬.૦૧
યો ભાનુભિર્વિભાવા વિભાત્યગ્નિર્દેવેભિરૃતાવાજસ્રઃ ।
આ યો વિવાય સખ્યા સખિભ્યોઽપરિહ્વૃતો અત્યો ન સપ્તિઃ ॥ ૧૦.૦૦૬.૦૨
ઈશે યો વિશ્વસ્યા દેવવીતેરીશે વિશ્વાયુરુષસો વ્યુષ્ટૌ ।
આ યસ્મિન્મના હવીંષ્યગ્નાવરિષ્ટરથઃ સ્કભ્નાતિ શૂષૈઃ ॥ ૧૦.૦૦૬.૦૩

શૂષેભિર્વૃધો જુષાણો અર્કૈર્દેવાઁ અચ્છા રઘુપત્વા જિગાતિ ।
મન્દ્રો હોતા સ જુહ્વાઉ યજિષ્ઠઃ સમ્મિશ્લો અગ્નિરા જિઘર્તિ દેવાન્ ॥ ૧૦.૦૦૬.૦૪

તમુસ્રામિન્દ્રં ન રેજમાનમગ્નિં ગીર્ભિર્નમોભિરા કૃણુધ્વમ્ ।
આ યં વિપ્રાસો મતિભિર્ગૃણન્તિ જાતવેદસં જુહ્વં સહાનામ્ ॥ ૧૦.૦૦૬.૦૫

સં યસ્મિન્વિશ્વા વસૂનિ જગ્મુર્વાજે નાશ્વાઃ સપ્તીવન્ત એવૈઃ ।
અસ્મે ઊતીરિન્દ્રવાતતમા અર્વાચીના અગ્ન આ કૃણુષ્વ ॥ ૧૦.૦૦૬.૦૬

અધા હ્યગ્ને મહ્ના નિષદ્યા સદ્યો જજ્ઞાનો હવ્યો બભૂથ ।
તં તે દેવાસો અનુ કેતમાયન્નધાવર્ધન્ત પ્રથમાસ ઊમાઃ ॥ ૧૦.૦૦૬.૦૭

સ્વસ્તિ નો દિવો અગ્ને પૃથિવ્યા વિશ્વાયુર્ધેહિ યજથાય દેવ ।
સચેમહિ તવ દસ્મ પ્રકેતૈરુરુષ્યા ણ ઉરુભિર્દેવ શંસૈઃ ॥ ૧૦.૦૦૭.૦૧

ઇમા અગ્ને મતયસ્તુભ્યં જાતા ગોભિરશ્વૈરભિ ગૃણન્તિ રાધઃ ।
યદા તે મર્તો અનુ ભોગમાનડ્વસો દધાનો મતિભિઃ સુજાત ॥ ૧૦.૦૦૭.૦૨

અગ્નિં મન્યે પિતરમગ્નિમાપિમગ્નિં ભ્રાતરં સદમિત્સખાયમ્ ।
અગ્નેરનીકં બૃહતઃ સપર્યં દિવિ શુક્રં યજતં સૂર્યસ્ય ॥ ૧૦.૦૦૭.૦૩

સિધ્રા અગ્ને ધિયો અસ્મે સનુત્રીર્યં ત્રાયસે દમ આ નિત્યહોતા ।
ઋતાવા સ રોહિદશ્વઃ પુરુક્ષુર્દ્યુભિરસ્મા અહભિર્વામમસ્તુ ॥ ૧૦.૦૦૭.૦૪

દ્યુભિર્હિતં મિત્રમિવ પ્રયોગં પ્રત્નમૃત્વિજમધ્વરસ્ય જારમ્ ।
બાહુભ્યામગ્નિમાયવોઽજનન્ત વિક્ષુ હોતારં ન્યસાદયન્ત ॥ ૧૦.૦૦૭.૦૫

સ્વયં યજસ્વ દિવિ દેવ દેવાન્કિં તે પાકઃ કૃણવદપ્રચેતાઃ ।
યથાયજ ઋતુભિર્દેવ દેવાનેવા યજસ્વ તન્વં સુજાત ॥ ૧૦.૦૦૭.૦૬

ભવા નો અગ્નેઽવિતોત ગોપા ભવા વયસ્કૃદુત નો વયોધાઃ ।
રાસ્વા ચ નઃ સુમહો હવ્યદાતિં ત્રાસ્વોત નસ્તન્વોઉ અપ્રયુચ્છન્ ॥ ૧૦.૦૦૭.૦૭

પ્ર કેતુના બૃહતા યાત્યગ્નિરા રોદસી વૃષભો રોરવીતિ ।
દિવશ્ચિદન્તાઁ ઉપમાઁ ઉદાનળપામુપસ્થે મહિષો વવર્ધ ॥ ૧૦.૦૦૮.૦૧

મુમોદ ગર્ભો વૃષભઃ કકુદ્માનસ્રેમા વત્સઃ શિમીવાઁ અરાવીત્ ।
સ દેવતાત્યુદ્યતાનિ કૃણ્વન્સ્વેષુ ક્ષયેષુ પ્રથમો જિગાતિ ॥ ૧૦.૦૦૮.૦૨

આ યો મૂર્ધાનં પિત્રોરરબ્ધ ન્યધ્વરે દધિરે સૂરો અર્ણઃ ।

અસ્ય પત્મન્નરુષીરશ્વબુધ્ના ઋતસ્ય યોનૌ તન્વો જુષન્ત ॥ ૧૦.૦૦૮.૦૩

ઉષોષો હિ વસો અગ્રમેષિ ત્વં યમયોરભવો વિભાવા ।

ઋતાય સપ્ત દધિષે પદાનિ જનયન્મિત્રં તન્વેઉ સ્વાયૈ ॥ ૧૦.૦૦૮.૦૪

ભુવશ્ચક્ષુર્મહ ઋતસ્ય ગોપા ભુવો વરુણો યદૃતાય વેષિ ।

ભુવો અપાં નપાજ્જાતવેદો ભુવો દૂતો યસ્ય હવ્યં જુજોષઃ ॥ ૧૦.૦૦૮.૦૫

ભુવો યજ્ઞસ્ય રજસશ્ચ નેતા યત્રા નિયુદ્ભિઃ સચસે શિવાભિઃ ।

દિવિ મૂર્ધાનં દધિષે સ્વર્ષાં જિહ્વામગ્ને ચકૃષે હવ્યવાહમ્ ॥ ૧૦.૦૦૮.૦૬

અસ્ય ત્રિતઃ ક્રતુના વવ્રે અન્તરિચ્છન્ધીતિં પિતુરેવૈઃ પરસ્ય ।

સચસ્યમાનઃ પિત્રોરુપસ્થે જામિ બ્રુવાણ આયુધાનિ વેતિ ॥ ૧૦.૦૦૮.૦૭

સ પિત્ર્યાણ્યાયુધાનિ વિદ્વાનિન્દ્રેષિત આપ્ત્યો અભ્યયુધ્યત્ ।

ત્રિશીર્ષાણં સપ્તરશ્મિં જઘન્વાન્ત્વાષ્ટ્રસ્ય ચિન્નિઃ સસૃજે ત્રિતો ગાઃ ॥ ૧૦.૦૦૮.૦૮

ભૂરીદિન્દ્ર ઉદિનક્ષન્તમોજોઽવાભિનત્સત્પતિર્મન્યમાનમ્ ।

ત્વાષ્ટ્રસ્ય ચિદ્વિશ્વરૂપસ્ય ગોનામાચક્રાણસ્ત્રીણિ શીર્ષા પરા વર્ક્ ॥ ૧૦.૦૦૮.૦૯

આપો હિ ષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન ।

મહે રણાય ચક્ષસે ॥ ૧૦.૦૦૯.૦૧

યો વઃ શિવતમો રસસ્તસ્ય ભાજયતેહ નઃ ।

ઉશતીરિવ માતરઃ ॥ ૧૦.૦૦૯.૦૨

તસ્મા અરં ગમામ વો યસ્ય ક્ષયાય જિન્વથ ।

આપો જનયથા ચ નઃ ॥ ૧૦.૦૦૯.૦૩

શં નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે ।

શં યોરભિ સ્રવન્તુ નઃ ॥ ૧૦.૦૦૯.૦૪

ઈશાના વાર્યાણાં ક્ષયન્તીશ્ચર્ષણીનામ્ ।

અપો યાચામિ ભેષજમ્ ॥ ૧૦.૦૦૯.૦૫

અપ્સુ મે સોમો અબ્રવીદન્તર્વિશ્વાનિ ભેષજા ।

અગ્નિં ચ વિશ્વશમ્ભુવમ્ ॥ ૧૦.૦૦૯.૦૬

આપઃ પૃણીત ભેષજં વરૂથં તન્વેઉ મમ ।

જ્યોક્ચ સૂર્યં દૃશે ॥ ૧૦.૦૦૯.૦૭

ઇદમાપઃ પ્ર વહત યત્કિં ચ દુરિતં મયિ ।
યદ્વાહમભિદુદ્રોહ યદ્વા શેપ ઉતાનૃતમ્ ॥ ૧૦.૦૦૯.૦૮
આપો અદ્યાન્વચારિષં રસેન સમગસ્મહિ ।
પયસ્વાનગ્ન આ ગહિ તં મા સં સૃજ વર્ચસા ॥ ૧૦.૦૦૯.૦૯
ઓ ચિત્સખાયં સખ્યા વવૃત્યાં તિરઃ પુરૂ ચિદર્ણવં જગન્વાન્ ।
પિતુર્નપાતમા દધીત વેધા અધિ ક્ષમિ પ્રતરં દીધ્યાનઃ ॥ ૧૦.૦૧૦.૦૧
ન તે સખા સખ્યં વષ્ટ્યેતત્સલક્ષ્મા યદ્વિષુરૂપા ભવાતિ ।
મહસ્પુત્રાસો અસુરસ્ય વીરા દિવો ધર્તાર ઉર્વિયા પરિ ખ્યન્ ॥ ૧૦.૦૧૦.૦૨
ઉશન્તિ ઘા તે અમૃતાસ એતદેકસ્ય ચિત્ત્યજસં મર્ત્યસ્ય ।
નિ તે મનો મનસિ ધાય્યસ્મે જન્યુઃ પતિસ્તન્વ૧મા વિવિશ્યાઃ ॥ ૧૦.૦૧૦.૦૩
ન યત્પુરા ચકૃમા કદ્ધ નૂનમૃતા વદન્તો અનૃતં રપેમ ।
ગન્ધર્વો અપ્સ્વપ્યા ચ યોષા સા નો નાભિઃ પરમં જામિ તન્નૌ ॥ ૧૦.૦૧૦.૦૪
ગર્ભે નુ નૌ જનિતા દમ્પતી કર્દેવસ્ત્વષ્ટા સવિતા વિશ્વરૂપઃ ।
નકિરસ્ય પ્ર મિનન્તિ વ્રતાનિ વેદ નાવસ્ય પૃથિવી ઉત દ્યૌઃ ॥ ૧૦.૦૧૦.૦૫
કો અસ્ય વેદ પ્રથમસ્યાહ્નઃ ક ઈં દદર્શ ક ઇહ પ્ર વોચત્ ।
બૃહન્મિત્રસ્ય વરુણસ્ય ધામ કદુ બ્રવ આહનો વીચ્યા નૄન્ ॥ ૧૦.૦૧૦.૦૬
યમસ્ય મા યમ્યં૧ કામ આગન્સમાને યોનૌ સહશેય્યાય ।
જાયેવ પત્યે તન્વં રિરિચ્યાં વિ ચિદ્વૃહેવ રથ્યેવ ચક્રા ॥ ૧૦.૦૧૦.૦૭
ન તિષ્ઠન્તિ ન નિ મિષન્ત્યેતે દેવાનાં સ્પશ ઇહ યે ચરન્તિ ।
અન્યેન મદાહનો યાહિ તૂયં તેન વિ વૃહ રથ્યેવ ચક્રા ॥ ૧૦.૦૧૦.૦૮
રાત્રીભિરસ્મા અહભિર્દશસ્યેત્સૂર્યસ્ય ચક્ષુર્મુહુરુન્મિમીયાત્ ।
દિવા પૃથિવ્યા મિથુના સબન્ધૂ યમીર્યમસ્ય બિભૃયાદજામિ ॥ ૧૦.૦૧૦.૦૯
આ ઘા તા ગચ્છાનુત્તરા યુગાનિ યત્ર જામયઃ કૃણવન્નજામિ ।
ઉપ બર્બૃહિ વૃષભાય બાહુમન્યમિચ્છસ્વ સુભગે પતિં મત્ ॥ ૧૦.૦૧૦.૧૦
કિં ભ્રાતાસદ્યદનાથં ભવાતિ કિમુ સ્વસા યન્નિરૃતિર્નિગચ્છાત્ ।
કામમૂતા બહ્વે૩તદ્રપામિ તન્વા મે તન્વં૧ સં પિપૃગ્ધિ ॥ ૧૦.૦૧૦.૧૧
ન વા ઉ તે તન્વા તન્વં૧ સં પપૃચ્યાં પાપમાહુર્યઃ સ્વસારં નિગચ્છાત્ ।

અન્યેન મત્પ્રમુદઃ કલ્પયસ્વ ન તે ભ્રાતા સુભગે વષ્ટ્યેતત્ ॥ ૧૦.૦૧૦.૧૨
બતો બતાસિ યમ નૈવ તે મનો હૃદયં ચાવિદામ ।
અન્યા કિલ ત્વાં કક્ષ્યેવ યુક્તં પરિ ષ્વજાતે લિબુજેવ વૃક્ષમ્ ॥ ૧૦.૦૧૦.૧૩
અન્યમૂ ષુ ત્વં યમ્યન્ય ઉ ત્વાં પરિ ષ્વજાતે લિબુજેવ વૃક્ષમ્ ।
તસ્ય વા ત્વં મન ઇચ્છા સ વા તવાધા કૃણુષ્વ સંવિદં સુભદ્રામ્ ॥ ૧૦.૦૧૦.૧૪

વૃષા વૃષ્ણે દુદુહે દોહસા દિવઃ પયાંસિ યહ્વો અદિતેરદાભ્યઃ ।
વિશ્વં સ વેદ વરુણો યથા ધિયા સ યજ્ઞિયો યજતુ યજ્ઞિયાઁ ઋતૂન્ ॥ ૧૦.૦૧૧.૦૧
રપદ્ગન્ધર્વીરપ્યા ચ યોષણા નદસ્ય નાદે પરિ પાતુ મે મનઃ ।
ઇષ્ટસ્ય મધ્યે અદિતિર્નિ ધાતુ નો ભ્રાતા નો જ્યેષ્ઠઃ પ્રથમો વિ વોચતિ ॥ ૧૦.૦૧૧.૦૨
સો ચિન્નુ ભદ્રા ક્ષુમતી યશસ્વત્યુષા ઉવાસ મનવે સ્વર્વતી ।
યદીમુશન્તમુશતામનુ ક્રતુમગ્નિં હોતારં વિદથાય જીજનન્ ॥ ૧૦.૦૧૧.૦૩
અધ ત્યં દ્રપ્સં વિભ્વં વિચક્ષણં વિરાભરદિષિતઃ શ્યેનો અધ્વરે ।
યદી વિશો વૃણતે દસ્મમાર્યા અગ્નિં હોતારમધ ધીરજાયત ॥ ૧૦.૦૧૧.૦૪
સદાસિ રણ્વો યવસેવ પુષ્યતે હોત્રાભિરગ્ને મનુષઃ સ્વધ્વરઃ ।
વિપ્રસ્ય વા યચ્છશમાન ઉક્થ્યં૧ વાજં સસવાઁ ઉપયાસિ ભૂરિભિઃ ॥ ૧૦.૦૧૧.૦૫
ઉદીરય પિતરા જાર આ ભગમિયક્ષતિ હર્યતો હૃત્ત ઇષ્યતિ ।
વિવક્તિ વહ્નિઃ સ્વપસ્યતે મખસ્તવિષ્યતે અસુરો વેપતે મતી ॥ ૧૦.૦૧૧.૦૬
યસ્તે અગ્ને સુમતિં મર્તો અક્ષત્સહસઃ સૂનો અતિ સ પ્ર શૃણ્વે ।
ઇષં દધાનો વહમાનો અશ્વૈરા સ દ્યુમાઁ અમવાન્ભૂષતિ દ્યૂન્ ॥ ૧૦.૦૧૧.૦૭
યદગ્ન એષા સમિતિર્ભવાતિ દેવી દેવેષુ યજતા યજત્ર ।
રત્ના ચ યદ્વિભજાસિ સ્વધાવો ભાગં નો અત્ર વસુમન્તં વીતાત્ ॥ ૧૦.૦૧૧.૦૮
શ્રુધી નો અગ્ને સદને સધસ્થે યુક્ષ્વા રથમમૃતસ્ય દ્રવિત્નુમ્ ।
આ નો વહ રોદસી દેવપુત્રે માકિર્દેવાનામપ ભૂરિહ સ્યાઃ ॥ ૧૦.૦૧૧.૦૯

દ્યાવા હ ક્ષામા પ્રથમે ઋતેનાભિશ્રાવે ભવતઃ સત્યવાચા ।
દેવો યન્મર્તાન્યજથાય કૃણ્વન્સીદદ્ધોતા પ્રત્યઙ્સ્વમસું યન્ ॥ ૧૦.૦૧૨.૦૧
દેવો દેવાન્પરિભૂરૃતેન વહા નો હવ્યં પ્રથમશ્ચિકિત્વાન્ ।
ધૂમકેતુઃ સમિધા ભાઋજીકો મન્દ્રો હોતા નિત્યો વાચા યજીયાન્ ॥ ૧૦.૦૧૨.૦૨

સ્વાવૃગ્દેવસ્યામૃતં યદી ગોરતો જાતાસો ધારયન્ત ઉર્વી ।
વિશ્વે દેવા અનુ તત્તે યજુર્ગુર્દુહે યદેની દિવ્યં ઘૃતં વાઃ ॥ ૧૦.૦૧૨.૦૩
અર્ચામિ વાં વર્ધાયાપો ઘૃતસ્નૂ દ્યાવાભૂમી શ઼ૃણુતં રોદસી મે ।
અહા યદ્દ્યાવોઽસુનીતિમયન્મધ્વા નો અત્ર પિતરા શિશીતામ્ ॥ ૧૦.૦૧૨.૦૪
કિં સ્વિન્નો રાજા જગૃહે કદસ્યાતિ વ્રતં ચકૃમા કો વિ વેદ ।
મિત્રશ્ચિદ્ધિ ષ્મા જુહુરાણો દેવાઞ્છ્લોકો ન યાતામપિ વાજો અસ્તિ ॥ ૧૦.૦૧૨.૦૫
દુર્મન્ત્વત્રામૃતસ્ય નામ સલક્ષ્મા યદ્વિષુરૂપા ભવાતિ ।
યમસ્ય યો મનવતે સુમન્ત્વગ્ને તમૃષ્વ પાહ્યપ્રયુચ્છન્ ॥ ૧૦.૦૧૨.૦૬
યસ્મિન્દેવા વિદથે માદયન્તે વિવસ્વતઃ સદને ધારયન્તે ।
સૂર્યે જ્યોતિરદધુર્માસ્ય૧ક્તૂન્પરિ દ્યોતનિં ચરતો અજસ્રા ॥ ૧૦.૦૧૨.૦૭
યસ્મિન્દેવા મન્મનિ સંચરન્ત્યપીચ્યેઉ ન વયમસ્ય વિદ્મ ।
મિત્રો નો અત્રાદિતિરનાગાન્સવિતા દેવો વરુણાય વોચત્ ॥ ૧૦.૦૧૨.૦૮
શ્રુધી નો અગ્ને સદને સધસ્થે યુક્ષ્વા રથમમૃતસ્ય દ્રવિત્નુમ્ ।
આ નો વહ રોદસી દેવપુત્રે માકિર્દેવાનામપ ભૂરિહ સ્યાઃ ॥ ૧૦.૦૧૨.૦૯

યુજે વાં બ્રહ્મ પૂર્વ્યં નમોભિર્વિ શ્લોક એતુ પથ્યેવ સૂરેઃ ।
શ઼ૃણ્વન્તુ વિશ્વે અમૃતસ્ય પુત્રા આ યે ધામાનિ દિવ્યાનિ તસ્થુઃ ॥ ૧૦.૦૧૩.૦૧
યમે ઇવ યતમાને યદૈતં પ્ર વાં ભરન્માનુષા દેવયન્તઃ ।
આ સીદતં સ્વમુ લોકં વિદાને સ્વાસસ્થે ભવતમિન્દવે નઃ ॥ ૧૦.૦૧૩.૦૨
પઞ્ચ પદાનિ રુપો અન્વરોહં ચતુષ્પદીમન્વેમિ વ્રતેન ।
અક્ષરેણ પ્રતિ મિમ એતામૃતસ્ય નાભાવધિ સં પુનામિ ॥ ૧૦.૦૧૩.૦૩
દેવેભ્યઃ કમવૃણીત મૃત્યું પ્રજાયૈ કમમૃતં નાવૃણીત ।
બૃહસ્પતિં યજ્ઞમકૃણ્વત ઋષિં પ્રિયાં યમસ્તન્વં૧ પ્રારિરેચીત્ ॥ ૧૦.૦૧૩.૦૪
સપ્ત ક્ષરન્તિ શિશવે મરુત્વતે પિત્રે પુત્રાસો અપ્યવીવતન્નૃતમ્ ।
ઉભે ઇદસ્યોભયસ્ય રાજત ઉભે યતેતે ઉભયસ્ય પુષ્યતઃ ॥ ૧૦.૦૧૩.૦૫

પરેયિવાંસં પ્રવતો મહીરનુ બહુભ્યઃ પન્થામનુપસ્પશાનમ્ ।
વૈવસ્વતં સંગમનં જનાનાં યમં રાજાનં હવિષા દુવસ્ય ॥ ૧૦.૦૧૪.૦૧
યમો નો ગાતું પ્રથમો વિવેદ નૈષા ગવ્યૂતિરપભર્તવા ઉ ।

યત્રા નઃ પૂર્વે પિતરઃ પરેયુરેના જજ્ઞાનાઃ પથ્યાઉ અનુ સ્વાઃ ॥ ૧૦.૦૧૪.૦૨
માતલી કવ્યૈર્યમો અઙ્ગિરોભિર્બૃહસ્પતિરૃક્વભિર્વાવૃધાનઃ ।
યાઁશ્ચ દેવા વાવૃધુર્યે ચ દેવાન્સ્વાહાન્યે સ્વધયાન્યે મદન્તિ ॥ ૧૦.૦૧૪.૦૩
ઇમં યમ પ્રસ્તરમા હિ સીદાઙ્ગિરોભિઃ પિતૃભિઃ સંવિદાનઃ ।
આ ત્વા મન્ત્રાઃ કવિશસ્તા વહન્ત્વેના રાજન્હવિષા માદયસ્વ ॥ ૧૦.૦૧૪.૦૪
અઙ્ગિરોભિરા ગહિ યજ્ઞિયેભિર્યમ વૈરૂપૈરિહ માદયસ્વ ।
વિવસ્વન્તં હુવે યઃ પિતા તેઽસ્મિન્યજ્ઞે બર્હિષ્યા નિષદ્ય ॥ ૧૦.૦૧૪.૦૫
અઙ્ગિરસો નઃ પિતરો નવગ્વા અથર્વાણો ભૃગવઃ સોમ્યાસઃ ।
તેષાં વયં સુમતૌ યજ્ઞિયાનામપિ ભદ્રે સૌમનસે સ્યામ ॥ ૧૦.૦૧૪.૦૬
પ્રેહિ પ્રેહિ પથિભિઃ પૂર્વ્યેભિર્યત્રા નઃ પૂર્વે પિતરઃ પરેયુઃ ।
ઉભા રાજાના સ્વધયા મદન્તા યમં પશ્યાસિ વરુણં ચ દેવમ્ ॥ ૧૦.૦૧૪.૦૭
સં ગચ્છસ્વ પિતૃભિઃ સં યમેનેષ્ટાપૂર્તેન પરમે વ્યોમન્ ।
હિત્વાયાવદ્યં પુનરસ્તમેહિ સં ગચ્છસ્વ તન્વા સુવર્ચાઃ ॥ ૧૦.૦૧૪.૦૮
અપેત વીત વિ ચ સર્પતાતોઽસ્મા એતં પિતરો લોકમક્રન્ ।
અહોભિરદ્ભિરક્તુભિર્વ્યક્તં યમો દદાત્યવસાનમસ્મૈ ॥ ૧૦.૦૧૪.૦૯
અતિ દ્રવ સારમેયૌ શ્વાનૌ ચતુરક્ષૌ શબલૌ સાધુના પથા ।
અથા પિતૄન્સુવિદત્રાઁ ઉપેહિ યમેન યે સધમાદં મદન્તિ ॥ ૧૦.૦૧૪.૧૦
યૌ તે શ્વાનૌ યમ રક્ષિતારૌ ચતુરક્ષૌ પથિરક્ષી નૃચક્ષસૌ ।
તાભ્યામેનં પરિ દેહિ રાજન્સ્વસ્તિ ચાસ્મા અનમીવં ચ ધેહિ ॥ ૧૦.૦૧૪.૧૧
ઉરૂણસાવસુતૃપા ઉદુમ્બલૌ યમસ્ય દૂતૌ ચરતો જનાઁ અનુ ।
તાવસ્મભ્યં દૃશયે સૂર્યાય પુનર્દાતામસુમદ્યેહ ભદ્રમ્ ॥ ૧૦.૦૧૪.૧૨
યમાય સોમં સુનુત યમાય જુહુતા હવિઃ ।
યમં હ યજ્ઞો ગચ્છત્યગ્નિદૂતો અરંકૃતઃ ॥ ૧૦.૦૧૪.૧૩
યમાય ઘૃતવદ્ધવિર્જુહોત પ્ર ચ તિષ્ઠત ।
સ નો દેવેષ્વા યમદ્દીર્ઘમાયુઃ પ્ર જીવસે ॥ ૧૦.૦૧૪.૧૪
યમાય મધુમત્તમં રાજ્ઞે હવ્યં જુહોતન ।
ઇદં નમ ઋષિભ્યઃ પૂર્વજેભ્યઃ પૂર્વેભ્યઃ પથિકૃદ્ભ્યઃ ॥ ૧૦.૦૧૪.૧૫

ત્રિકદ્રુકેભિઃ પતતિ ષળુર્વીરેકમિદ્બૃહત્ ।
ત્રિષ્ટુબ્ગાયત્રી છન્દાંસિ સર્વા તા યમ આહિતા ॥ ૧૦.૦૧૪.૧૬
ઉદીરતામવર ઉત્પરાસ ઉન્મધ્યમાઃ પિતરઃ સોમ્યાસઃ ।
અસું ય ઈયુરવૃકા ઋતજ્ઞાસ્તે નોઽવન્તુ પિતરો હવેષુ ॥ ૧૦.૦૧૫.૦૧
ઇદં પિતૃભ્યો નમો અસ્ત્વદ્ય યે પૂર્વાસો ય ઉપરાસ ઈયુઃ ।
યે પાર્થિવે રજસ્યા નિષત્તા યે વા નૂનં સુવૃજનાસુ વિક્ષુ ॥ ૧૦.૦૧૫.૦૨
આહં પિતૄન્સુવિદત્રાઁ અવિત્સિ નપાતં ચ વિક્રમણં ચ વિષ્ણોઃ ।
બર્હિષદો યે સ્વધયા સુતસ્ય ભજન્ત પિત્વસ્ત ઇહાગમિષ્ઠાઃ ॥ ૧૦.૦૧૫.૦૩
બર્હિષદઃ પિતર ઊત્યર્વાગિમા વો હવ્યા ચકૃમા જુષધ્વમ્ ।
ત આ ગતાવસા શંતમેનાથા નઃ શં યોરરપો દધાત ॥ ૧૦.૦૧૫.૦૪
ઉપહૂતાઃ પિતરઃ સોમ્યાસો બર્હિષ્યેષુ નિધિષુ પ્રિયેષુ ।
ત આ ગમન્તુ ત ઇહ શ્રુવન્ત્વધિ બ્રુવન્તુ તેઽવન્ત્વસ્માન્ ॥ ૧૦.૦૧૫.૦૫
આચ્યા જાનુ દક્ષિણતો નિષદ્યેમં યજ્ઞમભિ ગૃણીત વિશ્વે ।
મા હિંસિષ્ટ પિતરઃ કેન ચિન્નો યદ્વ આગઃ પુરુષતા કરામ ॥ ૧૦.૦૧૫.૦૬
આસીનાસો અરુણીનામુપસ્થે રયિં ધત્ત દાશુષે મર્ત્યાય ।
પુત્રેભ્યઃ પિતરસ્તસ્ય વસ્વઃ પ્ર યચ્છત ત ઇહોર્જં દધાત ॥ ૧૦.૦૧૫.૦૭
યે નઃ પૂર્વે પિતરઃ સોમ્યાસોઽનૂહિરે સોમપીથં વસિષ્ઠાઃ ।
તેભિર્યમઃ સંરરાણો હવીંષ્યુશન્નુશદ્ભિઃ પ્રતિકામમત્તુ ॥ ૧૦.૦૧૫.૦૮
યે તાતૃષુર્દેવત્રા જેહમાના હોત્રાવિદઃ સ્તોમતષ્ટાસો અર્કૈઃ ।
આગ્ને યાહિ સુવિદત્રેભિરર્વાઙ્સત્યૈઃ કવ્યૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૦૯
યે સત્યાસો હવિરદો હવિષ્પા ઇન્દ્રેણ દેવૈઃ સરથં દધાનાઃ ।
આગ્ને યાહિ સહસ્રં દેવવન્દૈઃ પરૈઃ પૂર્વૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૧૦
અગ્નિષ્વાત્તાઃ પિતર એહ ગચ્છત સદઃસદઃ સદત સુપ્રણીતયઃ ।
અત્તા હવીંષિ પ્રયતાનિ બર્હિષ્યથા રયિં સર્વવીરં દધાતન ॥ ૧૦.૦૧૫.૧૧
ત્વમગ્ન ઈળિતો જાતવેદોઽવાડ્ઢવ્યાનિ સુરભીણિ કૃત્વી ।
પ્રાદાઃ પિતૃભ્યઃ સ્વધયા તે અક્ષન્નદ્ધિ ત્વં દેવ પ્રયતા હવીંષિ ॥ ૧૦.૦૧૫.૧૨
યે ચેહ પિતરો યે ચ નેહ યાઁશ્ચ વિદ્મ યાઁ ઉ ચ ન પ્રવિદ્મ ।

ત્વં વેત્થ યતિ તે જાતવેદઃ સ્વધાભિર્યજ્ઞં સુકૃતં જુષસ્વ ॥ ૧૦.૦૧૫.૧૩

યે અગ્નિદગ્ધા યે અનગ્નિદગ્ધા મધ્યે દિવઃ સ્વધયા માદયન્તે ।

તેભિઃ સ્વરાળસુનીતિમેતાં યથાવશં તન્વં કલ્પયસ્વ ॥ ૧૦.૦૧૫.૧૪

મૈનમગ્ને વિ દહો માભિ શોચો માસ્ય ત્વચં ચિક્ષિપો મા શરીરમ્ ।

યદા શૃતં કૃણવો જાતવેદોઽથેમેનં પ્ર હિણુતાત્પિતૃભ્યઃ ॥ ૧૦.૦૧૬.૦૧

શૃતં યદા કરસિ જાતવેદોઽથેમેનં પરિ દત્તાત્પિતૃભ્યઃ ।

યદા ગચ્છાત્યસુનીતિમેતામથા દેવાનાં વશનીર્ભવાતિ ॥ ૧૦.૦૧૬.૦૨

સૂર્યં ચક્ષુર્ગચ્છતુ વાતમાત્મા દ્યાં ચ ગચ્છ પૃથિવીં ચ ધર્મણા ।

અપો વા ગચ્છ યદિ તત્ર તે હિતમોષધીષુ પ્રતિ તિષ્ઠા શરીરૈઃ ॥ ૧૦.૦૧૬.૦૩

અજો ભાગસ્તપસા તં તપસ્વ તં તે શોચિસ્તપતુ તં તે અર્ચિઃ ।

યાસ્તે શિવાસ્તન્વો જાતવેદસ્તાભિર્વહૈનં સુકૃતામુ લોકમ્ ॥ ૧૦.૦૧૬.૦૪

અવ સૃજ પુનરગ્ને પિતૃભ્યો યસ્ત આહુતશ્ચરતિ સ્વધાભિઃ ।

આયુર્વસાન ઉપ વેતુ શેષઃ સં ગચ્છતાં તન્વા જાતવેદઃ ॥ ૧૦.૦૧૬.૦૫

યત્તે કૃષ્ણઃ શકુન આતુતોદ પિપીલઃ સર્પ ઉત વા શ્વાપદઃ ।

અગ્નિષ્ટદ્વિશ્વાદગદં કૃણોતુ સોમશ્ચ યો બ્રાહ્મણાઁ આવિવેશ ॥ ૧૦.૦૧૬.૦૬

અગ્નેર્વર્મ પરિ ગોભિર્વ્યયસ્વ સં પ્રોર્ણુષ્વ પીવસા મેદસા ચ ।

નેત્ત્વા ધૃષ્ણુર્હરસા જર્હૃષાણો દધૃગ્વિધક્ષ્યન્પર્યઙ્ખયાતે ॥ ૧૦.૦૧૬.૦૭

ઇમમગ્ને ચમસં મા વિ જિહ્વરઃ પ્રિયો દેવાનામુત સોમ્યાનામ્ ।

એષ યશ્ચમસો દેવપાનસ્તસ્મિન્દેવા અમૃતા માદયન્તે ॥ ૧૦.૦૧૬.૦૮

ક્રવ્યાદમગ્નિં પ્ર હિણોમિ દૂરં યમરાજ્ઞો ગચ્છતુ રિપ્રવાહઃ ।

ઇહૈવાયમિતરો જાતવેદા દેવેભ્યો હવ્યં વહતુ પ્રજાનન્ ॥ ૧૦.૦૧૬.૦૯

યો અગ્નિઃ ક્રવ્યાત્પ્રવિવેશ વો ગૃહમિમં પશ્યન્નિતરં જાતવેદસમ્ ।

તં હરામિ પિતૃયજ્ઞાય દેવં સ ઘર્મમિન્વાત્પરમે સધસ્થે ॥ ૧૦.૦૧૬.૧૦

યો અગ્નિઃ ક્રવ્યવાહનઃ પિતૃન્યક્ષદૃતાવૃધઃ ।

પ્રેદુ હવ્યાનિ વોચતિ દેવેભ્યશ્ચ પિતૃભ્ય આ ॥ ૧૦.૦૧૬.૧૧

ઉશન્તસ્ત્વા નિ ધીમહ્યુશન્તઃ સમિધીમહિ ।

ઉશન્નુશત આ વહ પિતૄન્હવિષે અત્તવે ॥ ૧૦.૦૧૬.૧૨

યં ત્વમગ્ને સમદહસ્તમુ નિર્વાપયા પુનઃ ।
કિયામ્બ્વત્ર રોહતુ પાકદૂર્વા વ્યલ્કશા ॥ ૧૦.૦૧૬.૧૩
શીતિકે શીતિકાવતિ હ્લાદિકે હ્લાદિકાવતિ ।
મણ્ડૂક્યાઉ સુ સં ગમ ઇમં સ્વ૧ગ્નિં હર્ષય ॥ ૧૦.૦૧૬.૧૪
ત્વષ્ટા દુહિત્રે વહતું કૃણોતીતીદં વિશ્વં ભુવનં સમેતિ ।
યમસ્ય માતા પર્યુહ્યમાના મહો જાયા વિવસ્વતો નનાશ ॥ ૧૦.૦૧૭.૦૧
અપાગૂહન્નમૃતાં મર્ત્યેભ્યઃ કૃત્વી સવર્ણામદદુર્વિવસ્વતે ।
ઉતાશ્વિનાવભરદ્યત્તદાસીદજહાદુ દ્વા મિથુના સરણ્યૂઃ ॥ ૧૦.૦૧૭.૦૨
પૂષા ત્વેતશ્ચ્યાવયતુ પ્ર વિદ્વાનનષ્ટપશુર્ભુવનસ્ય ગોપાઃ ।
સ ત્વૈતેભ્યઃ પરિ દદત્પિતૃભ્યોઽગ્નિર્દેવેભ્યઃ સુવિદત્રિયેભ્યઃ ॥ ૧૦.૦૧૭.૦૩
આયુર્વિશ્વાયુઃ પરિ પાસતિ ત્વા પૂષા ત્વા પાતુ પ્રપથે પુરસ્તાત્ ।
યત્રાસતે સુકૃતો યત્ર તે યયુસ્તત્ર ત્વા દેવઃ સવિતા દધાતુ ॥ ૧૦.૦૧૭.૦૪
પૂષેમા આશા અનુ વેદ સર્વાઃ સો અસ્માઁ અભયતમેન નેષત્ ।
સ્વસ્તિદા આઘૃણિઃ સર્વવીરોઽપ્રયુચ્છન્પુર એતુ પ્રજાનન્ ॥ ૧૦.૦૧૭.૦૫
પ્રપથે પથામજનિષ્ટ પૂષા પ્રપથે દિવઃ પ્રપથે પૃથિવ્યાઃ ।
ઉભે અભિ પ્રિયતમે સધસ્થે આ ચ પરા ચ ચરતિ પ્રજાનન્ ॥ ૧૦.૦૧૭.૦૬
સરસ્વતીં દેવયન્તો હવન્તે સરસ્વતીમધ્વરે તાયમાને ।
સરસ્વતીં સુકૃતો અહ્વયન્ત સરસ્વતી દાશુષે વાર્યં દાત્ ॥ ૧૦.૦૧૭.૦૭
સરસ્વતિ યા સરથં યયાથ સ્વધાભિર્દેવિ પિતૃભિર્મદન્તી ।
આસદ્યાસ્મિન્બર્હિષિ માદયસ્વાનમીવા ઇષ આ ધેહ્યસ્મે ॥ ૧૦.૦૧૭.૦૮
સરસ્વતીં યાં પિતરો હવન્તે દક્ષિણા યજ્ઞમભિનક્ષમાણાઃ ।
સહસ્રાર્ઘમિળો અત્ર ભાગં રાયસ્પોષં યજમાનેષુ ધેહિ ॥ ૧૦.૦૧૭.૦૯
આપો અસ્માન્માતરઃ શુન્ધયન્તુ ઘૃતેન નો ઘૃતપ્વઃ પુનન્તુ ।
વિશ્વં હિ રિપ્રં પ્રવહન્તિ દેવીરુદિદાભ્યઃ શુચિરા પૂત એમિ ॥ ૧૦.૦૧૭.૧૦
દ્રપ્સશ્ચસ્કન્દ પ્રથમાઁ અનુ દ્યૂનિમં ચ યોનિમનુ યશ્ચ પૂર્વઃ ।
સમાનં યોનિમનુ સંચરન્તં દ્રપ્સં જુહોમ્યનુ સપ્ત હોત્રાઃ ॥ ૧૦.૦૧૭.૧૧
યસ્તે દ્રપ્સઃ સ્કન્દતિ યસ્તે અંશુર્બાહુચ્યુતો ધિષણાયા ઉપસ્થાત્ ।

અધ્વર્યોર્વા પરિ વા યઃ પવિત્રાત્તં તે જુહોમિ મનસા વષટ્કૃતમ્ ॥ ૧૦.૦૧૭.૧૨
યસ્તે દ્રપ્સઃ સ્કન્નો યસ્તે અંશુરવશ્ચ યઃ પરઃ સ્રુચા ।
અયં દેવો બૃહસ્પતિઃ સં તં સિઞ્ચતુ રાધસે ॥ ૧૦.૦૧૭.૧૩
પયસ્વતીરોષધયઃ પયસ્વન્મામકં વચઃ ।
અપાં પયસ્વદિત્પયસ્તેન મા સહ શુન્ધત ॥ ૧૦.૦૧૭.૧૪
પરં મૃત્યો અનુ પરેહિ પન્થાં યસ્તે સ્વ ઇતરો દેવયાનાત્ ।
ચક્ષુષ્મતે શ ૃણ્વતે તે બ્રવીમિ મા નઃ પ્રજાં રીરિષો મોત વીરાન્ ॥ ૧૦.૦૧૮.૦૧
મૃત્યોઃ પદં યોપયન્તો યદૈત દ્રાઘીય આયુઃ પ્રતરં દધાનાઃ ।
આપ્યાયમાનાઃ પ્રજયા ધનેન શુદ્ધાઃ પૂતા ભવત યજ્ઞિયાસઃ ॥ ૧૦.૦૧૮.૦૨
ઇમે જીવા વિ મૃતૈરાવવૃત્રન્નભૂદ્ભદ્રા દેવહૂતિર્નો અદ્ય ।
પ્રાઞ્ચો અગામ નૃતયે હસાય દ્રાઘીય આયુઃ પ્રતરં દધાનાઃ ॥ ૧૦.૦૧૮.૦૩
ઇમં જીવેભ્યઃ પરિધિં દધામિ મૈષાં નુ ગાદપરો અર્થમેતમ્ ।
શતં જીવન્તુ શરદઃ પુરૂચીરન્તર્મૃત્યું દધતાં પર્વતેન ॥ ૧૦.૦૧૮.૦૪
યથાહાન્યનુપૂર્વં ભવન્તિ યથ ઋતવ ઋતુભિર્યન્તિ સાધુ ।
યથા ન પૂર્વમપરો જહાત્યેવા ધાતરાયૂંષિ કલ્પયૈષામ્ ॥ ૧૦.૦૧૮.૦૫
આ રોહતાયુર્જરસં વૃણાના અનુપૂર્વં યતમાના યતિ ષ્ઠ ।
ઇહ ત્વષ્ટા સુજનિમા સજોષા દીર્ઘમાયુઃ કરતિ જીવસે વઃ ॥ ૧૦.૦૧૮.૦૬
ઇમા નારીરવિધવાઃ સુપત્નીરાઞ્જનેન સર્પિષા સં વિશન્તુ ।
અનશ્રવોऽનમીવાઃ સુરત્ના આ રોહન્તુ જનયો યોનિમગ્રે ॥ ૧૦.૦૧૮.૦૭
ઉદીર્ષ્વ નાર્યભિ જીવલોકં ગતાસુમેતમુપ શેષ એહિ ।
હસ્તગ્રાભસ્ય દિધિષોસ્તવેદં પત્યુર્જનિત્વમભિ સં બભૂથ ॥ ૧૦.૦૧૮.૦૮
ધનુર્હસ્તાદાદદાનો મૃતસ્યાસ્મે ક્ષત્રાય વર્ચસે બલાય ।
અત્રૈવ ત્વમિહ વયં સુવીરા વિશ્વાઃ સ્પૃધો અભિમાતીર્જયેમ ॥ ૧૦.૦૧૮.૦૯
ઉપ સર્પ માતરં ભૂમિમેતામુરુવ્યચસં પૃથિવીં સુશેવામ્ ।
ઊર્ણમ્રદા યુવતિર્દક્ષિણાવત એષા ત્વા પાતુ નિરૃતેરુપસ્થાત્ ॥ ૧૦.૦૧૮.૧૦
ઉચ્છ્વઞ્ચસ્વ પૃથિવિ મા નિ બાધથાઃ સૂપાયનાસ્મૈ ભવ સૂપવઞ્ચના ।
માતા પુત્રં યથા સિચાભ્યેનં ભૂમ ઊર્ણુહિ ॥ ૧૦.૦૧૮.૧૧

ઉચ્છ્વઞ્ચમાના પૃથિવી સુ તિષ્ઠતુ સહસ્રં મિત ઉપ હિ શ્રયન્તામ્ ।
તે ગૃહાસો ઘૃતશ્ચુતો ભવન્તુ વિશ્વાહાસ્મૈ શરણાઃ સન્ત્વત્ર ॥ ૧૦.૦૧૮.૧૨
ઉત્તે સ્તભ્નામિ પૃથિવીં ત્વત્પરીમં લોગં નિદધન્મો અહં રિષમ્ ।
એતાં સ્થૂણાં પિતરો ધારયન્તુ તેઽત્રા યમઃ સાદના તે મિનોતુ ॥ ૧૦.૦૧૮.૧૩
પ્રતીચીને મામહનીષ્વાઃ પર્ણમિવા દધુઃ ।
પ્રતીચીં જગ્રભા વાચમશ્વં રશનયા યથા ॥ ૧૦.૦૧૮.૧૪
નિ વર્તધ્વં માનુ ગાતાસ્માન્સિષક્ત રેવતીઃ ।
અગ્નીષોમા પુનર્વસૂ અસ્મે ધારયતં રયિમ્ ॥ ૧૦.૦૧૯.૦૧
પુનરેના નિ વર્તય પુનરેના ન્યા કુરુ ।
ઇન્દ્ર એણા નિ યચ્છત્વગ્નિરેના ઉપાજતુ ॥ ૧૦.૦૧૯.૦૨
પુનરેતા નિ વર્તન્તામસ્મિન્પુષ્યન્તુ ગોપતૌ ।
ઇહૈવાગ્ને નિ ધારયેહ તિષ્ઠતુ યા રયિઃ ॥ ૧૦.૦૧૯.૦૩
યન્નિયાનં ન્યયનં સંજ્ઞાનં યત્પરાયણમ્ ।
આવર્તનં નિવર્તનં યો ગોપા અપિ તં હુવે ॥ ૧૦.૦૧૯.૦૪
ય ઉદાનડ્વ્યયનં ય ઉદાનટ્ પરાયણમ્ ।
આવર્તનં નિવર્તનમપિ ગોપા નિ વર્તતામ્ ॥ ૧૦.૦૧૯.૦૫
આ નિવર્ત નિ વર્તય પુનર્ન ઇન્દ્ર ગા દેહિ ।
જીવાભિર્ભુનજામહૈ ॥ ૧૦.૦૧૯.૦૬
પરિ વો વિશ્વતો દધ ઊર્જા ઘૃતેન પયસા ।
યે દેવાઃ કે ચ યજ્ઞિયાસ્તે રય્યા સં સૃજન્તુ નઃ ॥ ૧૦.૦૧૯.૦૭
આ નિવર્તન વર્તય નિ નિવર્તન વર્તય ।
ભૂમ્યાશ્ચતસ્રઃ પ્રદિશસ્તાભ્ય એના નિ વર્તય ॥ ૧૦.૦૧૯.૦૮
ભદ્રં નો અપિ વાતય મનઃ ॥ ૧૦.૦૨૦.૦૧
અગ્નિમીળે ભુજાં યવિષ્ઠં શાસા મિત્રં દુર્ધરીતુમ્ ।
યસ્ય ધર્મન્સ્વ૧રેનીઃ સપર્યન્તિ માતુરૂધઃ ॥ ૧૦.૦૨૦.૦૨
યમાસા કૃપનીળં ભાસાકેતું વર્ધયન્તિ ।
ભ્રાજતે શ્રેણિદન્ ॥ ૧૦.૦૨૦.૦૩

અર્યો વિશાં ગાતુરેતિ પ્ર યદાનડ્દિવો અન્તાન્ ।
કવિરભ્રં દીદ્યાનઃ ॥ ૧૦.૦૨૦.૦૪

જુષદ્ધવ્યા માનુષસ્યોર્ધ્વસ્તસ્થાવૃભ્વા યજ્ઞે ।
મિન્વન્સદ્મ પુર એતિ ॥ ૧૦.૦૨૦.૦૫

સ હિ ક્ષેમો હવિર્યજ્ઞઃ શ્રુષ્ટીદસ્ય ગાતુરેતિ ।
અગ્નિં દેવા વાશીમન્તમ્ ॥ ૧૦.૦૨૦.૦૬

યજ્ઞાસાહં દુવ ઇષેઽગ્નિં પૂર્વસ્ય શેવસ્ય ।
અદ્રેઃ સૂનુમાયુમાહુઃ ॥ ૧૦.૦૨૦.૦૭

નરો યે કે ચાસ્મદા વિશ્વેત્તે વામ આ સ્યુઃ ।
અગ્નિં હવિષા વર્ધન્તઃ ॥ ૧૦.૦૨૦.૦૮

કૃષ્ણઃ શ્વેતોઽરુષો યામો અસ્ય બ્રધ્ન ઋજ ઉત શોણો યશસ્વાન્ ।
હિરણ્યરૂપં જનિતા જજાન ॥ ૧૦.૦૨૦.૦૯

એવા તે અગ્ને વિમદો મનીષામૂર્જો નપાદમૃતેભિઃ સજોષાઃ ।
ગિર આ વક્ષત્સુમતીરિયાન ઇષમૂર્જં સુક્ષિતિં વિશ્વમાભાઃ ॥ ૧૦.૦૨૦.૧૦

આગ્નિં ન સ્વવૃક્તિભિર્હોતારં ત્વા વૃણીમહે ।
યજ્ઞાય સ્તીર્ણબર્હિષે વિ વો મદે શીરં પાવકશોચિષં વિવક્ષસે ॥ ૧૦.૦૨૧.૦૧

ત્વામુ તે સ્વાભુવઃ શુમ્ભન્ત્યશ્વરાધસઃ ।
વેતિ ત્વામુપસેચની વિ વો મદ ઋજીતિરગ્ન આહુતિર્વિવક્ષસે ॥ ૧૦.૦૨૧.૦૨

ત્વે ધર્માણ આસતે જુહૂભિઃ સિઞ્ચતીરિવ ।
કૃષ્ણા રૂપાણ્યર્જુના વિ વો મદે વિશ્વા અધિ શ્રિયો ધિષે વિવક્ષસે ॥ ૧૦.૦૨૧.૦૩

યમગ્ને મન્યસે રયિં સહસાવન્નમર્ત્ય ।
તમા નો વાજસાતયે વિ વો મદે યજ્ઞેષુ ચિત્રમા ભરા વિવક્ષસે ॥ ૧૦.૦૨૧.૦૪

અગ્નિર્જાતો અથર્વણા વિદદ્વિશ્વાનિ કાવ્યા ।
ભુવદ્દૂતો વિવસ્વતો વિ વો મદે પ્રિયો યમસ્ય કામ્યો વિવક્ષસે ॥ ૧૦.૦૨૧.૦૫

ત્વાં યજ્ઞેષ્વીળતેઽગ્ને પ્રયત્યધ્વરે ।
ત્વં વસૂનિ કામ્યા વિ વો મદે વિશ્વા દધાસિ દાશુષે વિવક્ષસે ॥ ૧૦.૦૨૧.૦૬

ત્વાં યજ્ઞેષ્વૃત્વિજં ચારુમગ્ને નિ ષેદિરે ।

ઘૃતપ્રતીકં મનુષો વિ વો મદે શુક્રં ચેતિષ્ઠમક્ષભિર્વિવક્ષસે ॥ ૧૦.૦૨૧.૦૭
અગ્ને શુક્રેણ શોચિષોરુ પ્રથયસે બૃહત્ ।
અભિક્રન્દન્વૃષાયસે વિ વો મદે ગર્ભં દધાસિ જામિષુ વિવક્ષસે ॥ ૧૦.૦૨૧.૦૮
કુહ શ્રુત ઇન્દ્રઃ કસ્મિન્નદ્ય જને મિત્રો ન શ્રૂયતે ।
ઋષીણાં વા યઃ ક્ષયે ગુહા વા ચર્કૃષે ગિરા ॥ ૧૦.૦૨૨.૦૧
ઇહ શ્રુત ઇન્દ્રો અસ્મે અદ્ય સ્તવે વજ્ર્યૃચીષમઃ ।
મિત્રો ન યો જનેષ્વા યશશ્ચક્રે અસામ્યા ॥ ૧૦.૦૨૨.૦૨
મહો યસ્પતિઃ શવસો અસામ્યા મહો નૃમ્ણસ્ય તૂતુજિઃ ।
ભર્તા વજ્રસ્ય ધૃષ્ણોઃ પિતા પુત્રમિવ પ્રિયમ્ ॥ ૧૦.૦૨૨.૦૩
યુજાનો અશ્વા વાતસ્ય ધુની દેવો દેવસ્ય વજ્રિવઃ ।
સ્યન્તા પથા વિરુક્મતા સૃજાનઃ સ્તોષ્યધ્વનઃ ॥ ૧૦.૦૨૨.૦૪
ત્વં ત્યા ચિદ્વાતસ્યાશ્વાગા ઋજ્રા ત્મના વહધ્યૈ ।
યયોર્દેવો ન મર્ત્યો યન્તા નકિર્વિદાય્યઃ ॥ ૧૦.૦૨૨.૦૫
અધ ગ્મન્તોશના પૃચ્છતે વાં કદર્થા ન આ ગૃહમ્ ।
આ જગ્મથુઃ પરાકાદ્દિવશ્ચ ગ્મશ્ચ મર્ત્યમ્ ॥ ૧૦.૦૨૨.૦૬
આ ન ઇન્દ્ર પૃક્ષસેઽસ્માકં બ્રહ્મોદ્યતમ્ ।
તત્ત્વા યાચામહેઽવઃ શુષ્ણં યદ્ધન્નમાનુષમ્ ॥ ૧૦.૦૨૨.૦૭
અકર્મા દસ્યુરભિ નો અમન્તુરન્યવ્રતો અમાનુષઃ ।
ત્વં તસ્યામિત્રહન્વધર્દાસસ્ય દમ્ભય ॥ ૧૦.૦૨૨.૦૮
ત્વં ન ઇન્દ્ર શૂર શૂરૈરુત ત્વોતાસો બર્હણા ।
પુરુત્રા તે વિ પૂર્તયો નવન્ત ક્ષોણયો યથા ॥ ૧૦.૦૨૨.૦૯
ત્વં તાન્વૃત્રહત્યે ચોદયો નૄન્કાર્પાણે શૂર વજ્રિવઃ ।
ગુહા યદી કવીનાં વિશાં નક્ષત્રશવસામ્ ॥ ૧૦.૦૨૨.૧૦
મક્ષૂ તા ત ઇન્દ્ર દાનાપ્નસ આક્ષાણે શૂર વજ્રિવઃ ।
યદ્ધ શુષ્ણસ્ય દમ્ભયો જાતં વિશ્વં સયાવભિઃ ॥ ૧૦.૦૨૨.૧૧
માકુધ્ર્યગિન્દ્ર શૂર વસ્વીરસ્મે ભૂવન્નભિષ્ટયઃ ।
વયંવયં ત આસાં સુમ્ને સ્યામ વજ્રિવઃ ॥ ૧૦.૦૨૨.૧૨

અસ્મે તા ત ઇન્દ્ર સન્તુ સત્યાહિંસન્તીરુપસ્પૃશઃ ।
વિદ્યામ યાસાં ભુજો ધેનૂનાં ન વજ્રિવઃ ॥ ૧૦.૦૨૨.૧૩
અહસ્તા યદપદી વર્ધત ક્ષાઃ શચીભિર્વેદ્યાનામ્ ।
શુષ્ણં પરિ પ્રદક્ષિણિદ્વિશ્વાયવે નિ શિશ્નથઃ ॥ ૧૦.૦૨૨.૧૪
પિબાપિબેદિન્દ્ર શૂર સોમં મા રિષણ્યો વસવાન વસુઃ સન્ ।
ઉત ત્રાયસ્વ ગૃણતો મઘોનો મહશ્ચ રાયો રેવતસ્કૃધી નઃ ॥ ૧૦.૦૨૨.૧૫
યજામહ ઇન્દ્રં વજ્રદક્ષિણં હરીણાં રથ્યં વિવ્રતાનામ્ ।
પ્ર શ્મશ્રુ દોધુવદૂર્ધ્વથા ભૂદ્વિ સેનાભિર્દયમાનો વિ રાધસા ॥ ૧૦.૦૨૩.૦૧
હરી ન્વસ્ય યા વને વિદે વસ્વિન્દ્રો મઘૈર્મઘવા વૃત્રહા ભુવત્ ।
ઋભુર્વાજ ઋભુક્ષાઃ પત્યતે શવોऽવ ક્ષ્ણૌમિ દાસસ્ય નામ ચિત્ ॥ ૧૦.૦૨૩.૦૨
યદા વજ્રં હિરણ્યમિદથા રથં હરી યમસ્ય વહતો વિ સૂરિભિઃ ।
આ તિષ્ઠતિ મઘવા સનશ્રુત ઇન્દ્રો વાજસ્ય દીર્ઘશ્રવસસ્પતિઃ ॥ ૧૦.૦૨૩.૦૩
સો ચિન્નુ વૃષ્ટિર્યૂથ્યા૩ સ્વા સચાઁ ઇન્દ્રઃ શ્મશ્રૂણિ હરિતાભિ પ્રુષ્ણુતે ।
અવ વેતિ સુક્ષયં સુતે મધૂદિદ્ધૂનોતિ વાતો યથા વનમ્ ॥ ૧૦.૦૨૩.૦૪
યો વાચા વિવાચો મૃધ્રવાચઃ પુરૂ સહસ્રાશિવા જઘાન ।
તત્તદિદસ્ય પૌંસ્યં ગૃણીમસિ પિતેવ યસ્તવિષીં વાવૃધે શવઃ ॥ ૧૦.૦૨૩.૦૫
સ્તોમં ત ઇન્દ્ર વિમદા અજીજનન્નપૂર્વ્યં પુરુતમં સુદાનવે ।
વિદ્મા હ્યસ્ય ભોજનમિનસ્ય યદા પશું ન ગોપાઃ કરામહે ॥ ૧૦.૦૨૩.૦૬
માકિર્ન એના સખ્યા વિ યૌષુસ્તવ ચેન્દ્ર વિમદસ્ય ચ ઋષેઃ ।
વિદ્મા હિ તે પ્રમતિં દેવ જામિવદસ્મે તે સન્તુ સખ્યા શિવાનિ ॥ ૧૦.૦૨૩.૦૭
ઇન્દ્ર સોમમિમં પિબ મધુમન્તં ચમૂ સુતમ્ ।
અસ્મે રયિં નિ ધારય વિ વો મદે સહસ્રિણં પુરૂવસો વિવક્ષસે ॥ ૧૦.૦૨૪.૦૧
ત્વાં યજ્ઞેભિરુક્થૈરુપ હવ્યેભિરીમહે ।
શચીપતે શચીનાં વિ વો મદે શ્રેષ્ઠં નો ધેહિ વાર્યં વિવક્ષસે ॥ ૧૦.૦૨૪.૦૨
યસ્પતિર્વાર્યાણામસિ રધ્રસ્ય ચોદિતા ।
ઇન્દ્ર સ્તોતૄણામવિતા વિ વો મદે દ્વિષો નઃ પાહ્યંહસો વિવક્ષસે ॥ ૧૦.૦૨૪.૦૩
યુવં શક્રા માયાવિના સમીચી નિરમન્થતમ્ ।

વિમદેન યદીળિતા નાસત્યા નિરમન્થતમ્ ॥ ૧૦.૦૨૪.૦૪

વિશ્વે દેવા અકૃપન્ત સમીચ્યોર્નિષ્પતન્ત્યોઃ ।

નાસત્યાવબ્રુવન્દેવાઃ પુનરા વહતાદિતિ ॥ ૧૦.૦૨૪.૦૫

મધુમન્મે પરાયણં મધુમત્પુનરાયનમ્ ।

તા નો દેવા દેવતયા યુવં મધુમતસ્કૃતમ્ ॥ ૧૦.૦૨૪.૦૬

ભદ્રં નો અપિ વાતય મનો દક્ષમુત ક્રતુમ્ ।

અધા તે સખ્યે અન્ધસો વિ વો મદે રણન્ગાવો ન યવસે વિવક્ષસે ॥ ૧૦.૦૨૫.૦૧

હૃદિસ્પૃશસ્ત આસતે વિશ્વેષુ સોમ ધામસુ ।

અધા કામા ઇમે મમ વિ વો મદે વિ તિષ્ઠન્તે વસૂયવો વિવક્ષસે ॥ ૧૦.૦૨૫.૦૨

ઉત વ્રતાનિ સોમ તે પ્રાહં મિનામિ પાક્યા ।

અધા પિતેવ સૂનવે વિ વો મદે મૃળા નો અભિ ચિદ્વધાદ્વિવક્ષસે ॥ ૧૦.૦૨૫.૦૩

સમુ પ્ર યન્તિ ધીતયઃ સર્ગાસોઽવતાઁ ઇવ ।

ક્રતું નઃ સોમ જીવસે વિ વો મદે ધારયા ચમસાઁ ઇવ વિવક્ષસે ॥ ૧૦.૦૨૫.૦૪

તવ ત્યે સોમ શક્તિભિર્નિકામાસો વ્યૃણ્વિરે ।

ગૃત્સસ્ય ધીરાસ્તવસો વિ વો મદે વ્રજં ગોમન્તમશ્વિનં વિવક્ષસે ॥ ૧૦.૦૨૫.૦૫

પશું નઃ સોમ રક્ષસિ પુરુત્રા વિષ્ઠિતં જગત્ ।

સમાકૃણોષિ જીવસે વિ વો મદે વિશ્વા સમ્પશ્યન્ભુવના વિવક્ષસે ॥ ૧૦.૦૨૫.૦૬

ત્વં નઃ સોમ વિશ્વતો ગોપા અદાભ્યો ભવ ।

સેધ રાજન્નપ સ્રિધો વિ વો મદે મા નો દુઃશંસ ઈશતા વિવક્ષસે ॥ ૧૦.૦૨૫.૦૭

ત્વં નઃ સોમ સુક્રતુર્વયોધેયાય જાગૃહિ ।

ક્ષેત્રવિત્તરો મનુષો વિ વો મદે દ્રુહો નઃ પાહ્યંહસો વિવક્ષસે ॥ ૧૦.૦૨૫.૦૮

ત્વં નો વૃત્રહન્તમેન્દ્રસ્યેન્દો શિવઃ સખા ।

યત્સીં હવન્તે સમિથે વિ વો મદે યુધ્યમાનાસ્તોકસાતૌ વિવક્ષસે ॥ ૧૦.૦૨૫.૦૯

અયં ઘ સ તુરો મદ ઇન્દ્રસ્ય વર્ધત પ્રિયઃ ।

અયં કક્ષીવતો મહો વિ વો મદે મતિં વિપ્રસ્ય વર્ધયદ્વિવક્ષસે ॥ ૧૦.૦૨૫.૧૦

અયં વિપ્રાય દાશુષે વાજાઁ ઇયર્તિ ગોમતઃ ।

અયં સપ્તભ્ય આ વરં વિ વો મદે પ્રાન્ધં શ્રોણં ચ તારિષદ્વિવક્ષસે ॥ ૧૦.૦૨૫.૧૧

પ્ર હ્યચ્છા મનીષા સ્પાર્હા યન્તિ નિયુતઃ ।
પ્ર દસ્રા નિયુદ્રથઃ પૂષા અવિષ્ટુ માહિનઃ ॥ ૧૦.૦૨૬.૦૧
યસ્ય ત્યન્મહિત્વં વાતાપ્યમયં જનઃ ।
વિપ્ર આ વંસદ્ધીતિભિશ્ચિકેત સુષ્ટુતીનામ્ ॥ ૧૦.૦૨૬.૦૨
સ વેદ સુષ્ટુતીનામિન્દુર્ન પૂષા વૃષા ।
અભિ પ્સુરઃ પ્રુષાયતિ વ્રજં ન આ પ્રુષાયતિ ॥ ૧૦.૦૨૬.૦૩
મંસીમહિ ત્વા વયમસ્માકં દેવ પૂષન્ ।
મતીનાં ચ સાધનં વિપ્રાણાં ચાધવમ્ ॥ ૧૦.૦૨૬.૦૪
પ્રત્યર્ધિર્યજ્ઞાનામશ્વહયો રથાનામ્ ।
ઋષિઃ સ યો મનુર્હિતો વિપ્રસ્ય યાવયત્સખઃ ॥ ૧૦.૦૨૬.૦૫
આધીષમાણાયાઃ પતિઃ શુચાયાશ્ચ શુચસ્ય ચ ।
વાસોવાયોઽવીનામા વાસાંસિ મર્મૃજત્ ॥ ૧૦.૦૨૬.૦૬
ઇનો વાજાનાં પતિરિનઃ પુષ્ટીનાં સખા ।
પ્ર શ્મશ્રુ હર્યતો દૂધોદ્વિ વૃથા યો અદાભ્યઃ ॥ ૧૦.૦૨૬.૦૭
આ તે રથસ્ય પૂષન્નજા ધુરં વવૃત્યુઃ ।
વિશ્વસ્યાર્થિનઃ સખા સનોજા અનપચ્યુતઃ ॥ ૧૦.૦૨૬.૦૮
અસ્માકમૂર્જા રથં પૂષા અવિષ્ટુ માહિનઃ ।
ભુવદ્વાજાનાં વૃધ ઇમં નઃ શ◌ૃણવદ્ધવમ્ ॥ ૧૦.૦૨૬.૦૯

અસત્સુ મે જરિતઃ સાભિવેગો યત્સુન્વતે યજમાનાય શિક્ષમ્ ।
અનાશીર્દામહમસ્મિ પ્રહન્તા સત્યધ્વૃતં વૃજિનાયન્તમાભુમ્ ॥ ૧૦.૦૨૭.૦૧
યદીદહં યુધયે સંનયાન્યદેવયૂન્તન્વા૩ શૂશુજાનાન્ ।
અમા તે તુમ્રં વૃષભં પચાનિ તીવ્રં સુતં પઞ્ચદશં નિ ષિઞ્ચમ્ ॥ ૧૦.૦૨૭.૦૨
નાહં તં વેદ ય ઇતિ બ્રવીત્યદેવયૂન્સમરણે જઘન્વાન્ ।
યદાવાખ્યત્સમરણમૃઘાવદાદિદ્ધ મે વૃષભા પ્ર બ્રુવન્તિ ॥ ૧૦.૦૨૭.૦૩
યદજ્ઞાતેષુ વૃજનેષ્વાસં વિશ્વે સતો મઘવાનો મ આસન્ ।
જિનામિ વેત્ક્ષેમ આ સન્તમાભું પ્ર તં ક્ષિણાં પર્વતે પાદગૃહ્ય ॥ ૧૦.૦૨૭.૦૪
ન વા ઉ માં વૃજને વારયન્તે ન પર્વતાસો યદહં મનસ્યે ।

મમ સ્વનાત્કૃધુકર્ણો ભયાત એવેદનુ દ્યૂન્કિરણઃ સમેજાત્ ॥ ૧૦.૦૨૭.૦૫
દર્શન્ત્વત્ર શ◌ૃતપાઁ અનિન્દ્રાન્બાહુક્ષદઃ શરવે પત્યમાનાન્ ।
ઘૃષું વા યે નિનિદુઃ સખાયમધ્યૂ ન્વેષુ પવયો વવૃત્યુઃ ॥ ૧૦.૦૨૭.૦૬
અભૂર્વૌક્ષીર્વ્યુ૧ આયુરાનડ્દર્ષન્નુ પૂર્વો અપરો નુ દર્ષત્ ।
દ્વે પવસ્તે પરિ તં ન ભૂતો યો અસ્ય પારે રજસો વિવેષ ॥ ૧૦.૦૨૭.૦૭
ગાવો યવં પ્રયુતા અર્યો અક્ષન્તા અપશ્યં સહગોપાશ્ચરન્તીઃ ।
હવા ઇદર્યો અભિતઃ સમાયન્કિયદાસુ સ્વપતિશ્છન્દયાતે ॥ ૧૦.૦૨૭.૦૮
સં યદ્વયં યવસાદો જનાનામહં યવાદ ઉર્વજ્રે અન્તઃ ।
અત્રા યુક્તોઽવસાતારમિચ્છાદથો અયુક્તં યુનજદ્વવન્વાન્ ॥ ૧૦.૦૨૭.૦૯
અત્રેદુ મે મંસસે સત્યમુક્તં દ્વિપાચ્ચ યચ્ચતુષ્પાત્સંસૃજાનિ ।
સ્ત્રીભિર્યો અત્ર વૃષણં પૃતન્યાદયુદ્ધો અસ્ય વિ ભજાનિ વેદઃ ॥ ૧૦.૦૨૭.૧૦
યસ્યાનક્ષા દુહિતા જાત્વાસ કસ્તાં વિદ્વાઁ અભિ મન્યાતે અન્ધામ્ ।
કતરો મેનિં પ્રતિ તં મુચાતે ય ઈં વહાતે ય ઈં વા વરેયાત્ ॥ ૧૦.૦૨૭.૧૧
કિયતી યોષા મર્યતો વધૂયોઃ પરિપ્રીતા પન્યસા વાર્યેણ ।
ભદ્રા વધૂર્ભવતિ યત્સુપેશાઃ સ્વયં સા મિત્રં વનુતે જને ચિત્ ॥ ૧૦.૦૨૭.૧૨
પત્તો જગાર પ્રત્યઞ્ચમત્તિ શીર્ષ્ણા શિરઃ પ્રતિ દધૌ વરૂથમ્ ।
આસીન ઊર્ધ્વામુપસિ ક્ષિણાતિ ન્યઙ્ઙુત્તાનામન્વેતિ ભૂમિમ્ ॥ ૧૦.૦૨૭.૧૩
બૃહન્નચ્છાયો અપલાશો અર્વા તસ્થૌ માતા વિષિતો અત્તિ ગર્ભઃ ।
અન્યસ્યા વત્સં રિહતી મિમાય કયા ભુવા નિ દધે ધેનુરૂધઃ ॥ ૧૦.૦૨૭.૧૪
સપ્ત વીરાસો અધરાદુદાયન્નષ્ટોત્તરાત્તાત્સમજગ્મિરન્તે ।
નવ પશ્ચાતાત્સ્થિવિમન્ત આયન્દશ પ્રાક્સાનુ વિ તિરન્ત્યશ્નઃ ॥ ૧૦.૦૨૭.૧૫
દશાનામેકં કપિલં સમાનં તં હિન્વન્તિ ક્રતવે પાર્યાય ।
ગર્ભં માતા સુધિતં વક્ષણાસ્વવેનન્તં તુષયન્તી બિભર્તિ ॥ ૧૦.૦૨૭.૧૬
પીવાનં મેષમપચન્ત વીરા ન્યુપ્તા અક્ષા અનુ દીવ આસન્ ।
દ્વા ધનું બૃહતીમપ્સ્વ૧ન્તઃ પવિત્રવન્તા ચરતઃ પુનન્તા ॥ ૧૦.૦૨૭.૧૭
વિ ક્રોશનાસો વિષ્વઞ્ચ આયન્પચાતિ નેમો નહિ પક્ષદર્ધઃ ।
અયં મે દેવઃ સવિતા તદાહ દ્ર્વન્ન ઇદ્વનવત્સર્પિરન્નઃ ॥ ૧૦.૦૨૭.૧૮

અપશ્યં ગ્રામં વહમાનમારાદચક્રયા સ્વધયા વર્તમાનમ્ ।
સિષક્ત્યર્યઃ પ્ર યુગા જનાનાં સદ્યઃ શિશ્ના પ્રમિનાનો નવીયાન્ ॥ ૧૦.૦૨૭.૧૯
એતૌ મે ગાવૌ પ્રમરસ્ય યુક્તૌ મો ષુ પ્ર સેધીર્મુહુરિન્મમન્ધિ ।
આપશ્ચિદસ્ય વિ નશન્ત્યર્થં સૂરશ્ચ મર્ક ઉપરો બભૂવાન્ ॥ ૧૦.૦૨૭.૨૦
અયં યો વજ્રઃ પુરુધા વિવૃત્તોઽવઃ સૂર્યસ્ય બૃહતઃ પુરીષાત્ ।
શ્રવ ઇદેના પરો અન્યદસ્તિ તદવ્યથી જરિમાણસ્તરન્તિ ॥ ૧૦.૦૨૭.૨૧
વૃક્ષેવૃક્ષે નિયતા મીમયદ્ગૌસ્તતો વયઃ પ્ર પતાન્પૂરુષાદઃ ।
અથેદં વિશ્વં ભુવનં ભયાત ઇન્દ્રાય સુન્વદૃષયે ચ શિક્ષત્ ॥ ૧૦.૦૨૭.૨૨
દેવાનાં માને પ્રથમા અતિષ્ઠન્કૃન્તત્રાદેષામુપરા ઉદાયન્ ।
ત્રયસ્તપન્તિ પૃથિવીમનૂપા દ્વા બૃબૂકં વહતઃ પુરીષમ્ ॥ ૧૦.૦૨૭.૨૩
સા તે જીવાતુરુત તસ્ય વિદ્ધિ મા સ્મૈતાદૃગપ ગૂહઃ સમર્યે ।
આવિઃ સ્વઃ કૃણુતે ગૂહતે બુસં સ પાદુરસ્ય નિર્ણિજો ન મુચ્યતે ॥ ૧૦.૦૨૭.૨૪
વિશ્વો હ્યઽન્યો અરિરાજગામ મમેદહ શ્વશુરો ના જગામ ।
જક્ષીયાદ્ધાના ઉત સોમં પપીયાત્સ્વાશિતઃ પુનરસ્તં જગાયાત્ ॥ ૧૦.૦૨૮.૦૧
સ રોરુવદ્વૃષભસ્તિગ્મશ◌ૃઙ્ગો વર્ષ્મન્તસ્થૌ વરિમન્ના પૃથિવ્યાઃ ।
વિશ્વેષ્વેનં વૃજનેષુ પામિ યો મે કુક્ષી સુતસોમઃ પૃણાતિ ॥ ૧૦.૦૨૮.૦૨
અદ્રિણા તે મન્દિન ઇન્દ્ર તૂયાન્સુન્વન્તિ સોમાન્પિબસિ ત્વમેષામ્ ।
પચન્તિ તે વૃષભાઁ અત્સિ તેષાં પૃક્ષેણ યન્મઘવન્હૂયમાનઃ ॥ ૧૦.૦૨૮.૦૩
ઇદં સુ મે જરિતરા ચિકિદ્ધિ પ્રતીપં શાપં નદ્યો વહન્તિ ।
લોપાશઃ સિંહં પ્રત્યઞ્ચમત્સાઃ ક્રોષ્ટા વરાહં નિરતક્ત કક્ષાત્ ॥ ૧૦.૦૨૮.૦૪
કથા ત એતદહમા ચિકેતં ગૃત્સસ્ય પાકસ્તવસો મનીષામ્ ।
ત્વં નો વિદ્વાઁ ઋતુથા વિ વોચો યમર્ધં તે મઘવન્ક્ષેમ્યા ધૂઃ ॥ ૧૦.૦૨૮.૦૫
એવા હિ માં તવસં વર્ધયન્તિ દિવશ્ચિન્મે બૃહત ઉત્તરા ધૂઃ ।
પુરૂ સહસ્રા નિ શિશામિ સાકમશત્રું હિ મા જનિતા જજાન ॥ ૧૦.૦૨૮.૦૬
એવા હિ માં તવસં જજ્ઞુરુગ્રં કર્મન્કર્મન્વૃષણમિન્દ્ર દેવાઃ ।
વધીં વૃત્રં વજ્રેણ મન્દસાનોઽપ વ્રજં મહિના દાશુષે વમ્ ॥ ૧૦.૦૨૮.૦૭
દેવાસ આયન્પરશૂઁરબિભ્રન્વના વૃશ્ચન્તો અભિ વિડ્ભિરાયન્ ।

નિ સુદ્ર્વં૧ દધતો વક્ષણાસુ યત્રા કૃપીટમનુ તદ્દહન્તિ ॥ ૧૦.૦૨૮.૦૮

શશઃ ક્ષુરં પ્રત્યઞ્ચં જગારાદ્રિં લોગેન વ્યભેદમારાત્ ।

બૃહન્તં ચિદૃહતે રન્ધયાનિ વયદ્વત્સો વૃષભં શૂશુવાનઃ ॥ ૧૦.૦૨૮.૦૯

સુપર્ણ ઇત્થા નખમા સિષાયાવરુદ્ધઃ પરિપદં ન સિંહઃ ।

નિરુદ્ધશ્ચિન્મહિષસ્તર્ષ્યાવાન્ગોધા તસ્મા અયથં કર્ષદેતત્ ॥ ૧૦.૦૨૮.૧૦

તેભ્યો ગોધા અયથં કર્ષદેતદ્યે બ્રહ્મણઃ પ્રતિપીયન્ત્યન્નૈઃ ।

સિમ ઉક્ષ્ણોઽવસૃષ્ટાઁ અદન્તિ સ્વયં બલાનિ તન્વઃ શૃણાનાઃ ॥ ૧૦.૦૨૮.૧૧

એતે શમીભિઃ સુશમી અભૂવન્યે હિન્વિરે તન્વ૧ઃ સોમ ઉક્થૈઃ ।

નૃવદ્વદન્નુપ નો માહિ વાજાન્દિવિ શ્રવો દધિષે નામ વીરઃ ॥ ૧૦.૦૨૮.૧૨

વને ન વા યો ન્યધાયિ ચાકઞ્છુચિર્વાં સ્તોમો ભુરણાવજીગઃ ।

યસ્યેદિન્દ્રઃ પુરુદિનેષુ હોતા નૃણાં નર્યો નૃતમઃ ક્ષપાવાન્ ॥ ૧૦.૦૨૯.૦૧

પ્ર તે અસ્યા ઉષસઃ પ્રાપરસ્યા નૃતૌ સ્યામ નૃતમસ્ય નૃણામ્ ।

અનુ ત્રિશોકઃ શતમાવહન્નૄન્કુત્સેન રથો યો અસત્સસવાન્ ॥ ૧૦.૦૨૯.૦૨

કસ્તે મદ ઇન્દ્ર રન્ત્યો ભૂદ્દુરો ગિરો અભ્યુ૧ગ્રો વિ ધાવ ।

કદ્વાહો અર્વાગુપ મા મનીષા આ ત્વા શક્યામુપમં રાધો અન્નૈઃ ॥ ૧૦.૦૨૯.૦૩

કદુ દ્યુમ્નમિન્દ્ર ત્વાવતો નૄન્કયા ધિયા કરસે કન્ન આગન્ ।

મિત્રો ન સત્ય ઉરુગાય ભૃત્યા અન્ને સમસ્ય યદસન્મનીષાઃ ॥ ૧૦.૦૨૯.૦૪

પ્રેરય સૂરો અર્થં ન પારં યે અસ્ય કામં જનિધા ઇવ ગ્મન્ ।

ગિરશ્ચ યે તે તુવિજાત પૂર્વીર્નર ઇન્દ્ર પ્રતિશિક્ષન્ત્યન્નૈઃ ॥ ૧૦.૦૨૯.૦૫

માત્રે નુ તે સુમિતે ઇન્દ્ર પૂર્વી દ્યૌર્મજ્મના પૃથિવી કાવ્યેન ।

વરાય તે ઘૃતવન્તઃ સુતાસઃ સ્વાદ્મન્ભવન્તુ પીતયે મધૂનિ ॥ ૧૦.૦૨૯.૦૬

આ મધ્વો અસ્મા અસિચન્નમત્રમિન્દ્રાય પૂર્ણં સ હિ સત્યરાધાઃ ।

સ વાવૃધે વરિમન્ના પૃથિવ્યા અભિ ક્રત્વા નર્યઃ પૌંસ્યૈશ્ચ ॥ ૧૦.૦૨૯.૦૭

વ્યાનળિન્દ્રઃ પૃતનાઃ સ્વોજા આસ્મૈ યતન્તે સખ્યાય પૂર્વીઃ ।

આ સ્મા રથં ન પૃતનાસુ તિષ્ઠ યં ભદ્રયા સુમત્યા ચોદયાસે ॥ ૧૦.૦૨૯.૦૮

પ્ર દેવત્રા બ્રહ્મણે ગાતુરેત્વપો અચ્છા મનસો ન પ્રયુક્તિ ।

મહીં મિત્રસ્ય વરુણસ્ય ધાસિં પૃથુજ્રયસે રીરધા સુવૃક્તિમ્ ॥ ૧૦.૦૩૦.૦૧

અધ્વર્યવો હવિષ્મન્તો હિ ભૂતાચ્છાપ ઇતોશતીરુશન્તઃ ।
અવ યાશ્ચષ્ટે અરુણઃ સુપર્ણસ્તમાસ્યધ્વમૂર્મિમદ્યા સુહસ્તાઃ ॥ ૧૦.૦૩૦.૦૨
અધ્વર્યવોઽપ ઇતા સમુદ્રમપાં નપાતં હવિષા યજધ્વમ્ ।
સ વો દદદૂર્મિમદ્યા સુપૂતં તસ્મૈ સોમં મધુમન્તં સુનોત ॥ ૧૦.૦૩૦.૦૩
યો અનિધ્મો દીદયદપ્સ્વ૧ન્તર્યં વિપ્રાસ ઈળતે અધ્વરેષુ ।
અપાં નપાન્મધુમતીરપો દા યાભિરિન્દ્રો વાવૃધે વીર્યાય ॥ ૧૦.૦૩૦.૦૪
યાભિઃ સોમો મોદતે હર્ષતે ચ કલ્યાણીભિર્યુવતિભિર્ન મર્યઃ ।
તા અધ્વર્યો અપો અચ્છા પરેહિ યદાસિઞ્ચા ઓષધીભિઃ પુનીતાત્ ॥ ૧૦.૦૩૦.૦૫
એવેદ્યૂને યુવતયો નમન્ત યદીમુશન્નુશતીરેત્યચ્છ ।
સં જાનતે મનસા સં ચિકિત્રેઽધ્વર્યવો ધિષણાપશ્ચ દેવીઃ ॥ ૧૦.૦૩૦.૦૬
યો વો વૃતાભ્યો અકૃણોદુ લોકં યો વો મહ્યા અભિશસ્તેરમુઞ્ચત્ ।
તસ્મા ઇન્દ્રાય મધુમન્તમૂર્મિં દેવમાદનં પ્ર હિણોતનાપઃ ॥ ૧૦.૦૩૦.૦૭
પ્રાસ્મૈ હિનોત મધુમન્તમૂર્મિં ગર્ભો યો વઃ સિન્ધવો મધ્વ ઉત્સઃ ।
ઘૃતપૃષ્ઠમીડ્યમધ્વરેષ્વાપો રેવતીઃ શૃણુતા હવં મે ॥ ૧૦.૦૩૦.૦૮
તં સિન્ધવો મત્સરમિન્દ્રપાનમૂર્મિં પ્ર હેત ય ઉભે ઇયર્તિ ।
મદચ્યુતમૌશાનં નભોજાં પરિ ત્રિતન્તું વિચરન્તમુત્સમ્ ॥ ૧૦.૦૩૦.૦૯
આવર્વૃતતીરધ નુ દ્વિધારા ગોષુયુધો ન નિયવં ચરન્તીઃ ।
ઋષે જનિત્રીર્ભુવનસ્ય પત્નીરપો વન્દસ્વ સવૃધઃ સયોનીઃ ॥ ૧૦.૦૩૦.૧૦
હિનોતા નો અધ્વરં દેવયજ્યા હિનોત બ્રહ્મ સનયે ધનાનામ્ ।
ઋતસ્ય યોગે વિ ષ્યધ્વમૂધઃ શ્રુષ્ટીવરીર્ભૂતનાસ્મભ્યમાપઃ ॥ ૧૦.૦૩૦.૧૧
આપો રેવતીઃ ક્ષયથા હિ વસ્વઃ ક્રતું ચ ભદ્રં બિભૃથામૃતં ચ ।
રાયશ્ચ સ્થ સ્વપત્યસ્ય પત્નીઃ સરસ્વતી તદ્ગૃણતે વયો ધાત્ ॥ ૧૦.૦૩૦.૧૨
પ્રતિ યદાપો અદૃશ્રમાયતીર્ઘૃતં પયાંસિ બિભ્રતીર્મધૂનિ ।
અધ્વર્યુભિર્મનસા સંવિદાના ઇન્દ્રાય સોમં સુષુતં ભરન્તીઃ ॥ ૧૦.૦૩૦.૧૩
એમા અગ્મન્રેવતીર્જીવધન્યા અધ્વર્યવઃ સાદયતા સખાયઃ ।
નિ બર્હિષિ ધત્તન સોમ્યાસોઽપાં નપ્ત્રા સંવિદાનાસ એનાઃ ॥ ૧૦.૦૩૦.૧૪
આગ્મન્નાપ ઉશતીર્બર્હિરેદં ન્યધ્વરે અસદન્દેવયન્તીઃ ।

અધ્વર્યવઃ સુનુતેન્દ્રાય સોમમભૂદુ વઃ સુશકા દેવયજ્યા ॥ ૧૦.૦૩૦.૧૫

આ નો દેવાનામુપ વેતુ શંસો વિશ્વેભિસ્તુરૈરવસે યજત્રઃ ।
તેભિર્વયં સુષખાયો ભવેમ તરન્તો વિશ્વા દુરિતા સ્યામ ॥ ૧૦.૦૩૧.૦૧
પરિ ચિન્મર્તો દ્રવિણં મમન્યાદૃતસ્ય પથા નમસા વિવાસેત્ ।
ઉત સ્વેન ક્રતુના સં વદેત શ્રેયાંસં દક્ષં મનસા જગૃભ્યાત્ ॥ ૧૦.૦૩૧.૦૨
અધાયિ ધીતિરસસૃગ્રમંશાસ્તીર્થે ન દસ્મમુપ યન્ત્યૂમાઃ ।
અભ્યાનશ્મ સુવિતસ્ય શૂષં નવેદસો અમૃતાનામભૂમ ॥ ૧૦.૦૩૧.૦૩
નિત્યશ્ચાકન્યાત્સ્વપતિર્દમૂના યસ્મા ઉ દેવઃ સવિતા જજાન ।
ભગો વા ગોભિરર્યમેમનજ્યાત્સો અસ્મૈ ચારુશ્છદયદુત સ્યાત્ ॥ ૧૦.૦૩૧.૦૪
ઇયં સા ભૂયા ઉષસામિવ ક્ષા યદ્ધ ક્ષુમન્તઃ શવસા સમાયન્ ।
અસ્ય સ્તુતિં જરિતુર્ભિક્ષમાણા આ નઃ શગ્માસ ઉપ યન્તુ વાજાઃ ॥ ૧૦.૦૩૧.૦૫
અસ્યેદેષા સુમતિઃ પપ્રથાનાભવત્પૂર્વ્યા ભૂમના ગૌઃ ।
અસ્ય સનીળા અસુરસ્ય યોનૌ સમાન આ ભરણે બિભ્રમાણાઃ ॥ ૧૦.૦૩૧.૦૬
કિં સ્વિદ્વનં ક ઉ સ વૃક્ષ આસ યતો દ્યાવાપૃથિવી નિષ્ટતક્ષુઃ ।
સંતસ્થાને અજરે ઇતઊતી અહાનિ પૂર્વીરુષસો જરન્ત ॥ ૧૦.૦૩૧.૦૭
નૈતાવદેના પરો અન્યદસ્ત્યુક્ષા સ દ્યાવાપૃથિવી બિભર્તિ ।
ત્વચં પવિત્રં કૃણુત સ્વધાવાન્યદીં સૂર્યં ન હરિતો વહન્તિ ॥ ૧૦.૦૩૧.૦૮
સ્તેગો ન ક્ષામત્યેતિ પૃથ્વીં મિહં ન વાતો વિ હ વાતિ ભૂમ ।
મિત્રો યત્ર વરુણો અજ્યમાનોઽગ્નિર્વને ન વ્યસૃષ્ટ શોકમ્ ॥ ૧૦.૦૩૧.૦૯
સ્તરીર્યત્સૂત સદ્યો અજ્યમાના વ્યથિરવ્યથીઃ કૃણુત સ્વગોપા ।
પુત્રો યત્પૂર્વઃ પિત્રોર્જનિષ્ટ શમ્યાં ગૌર્જગાર યદ્ધ પૃચ્છાન્ ॥ ૧૦.૦૩૧.૧૦
ઉત કણ્વં નૃષદઃ પુત્રમાહુરુત શ્યાવો ધનમાદત્ત વાજી ।
પ્ર કૃષ્ણાય રુશદપિન્વતોધરૃતમત્ર નકિરસ્મા અપીપેત્ ॥ ૧૦.૦૩૧.૧૧

પ્ર સુ ગ્મન્તા ધિયસાનસ્ય સક્ષણિ વરેભિર્વરાઁ અભિ ષુ પ્રસીદતઃ ।
અસ્માકમિન્દ્ર ઉભયં જુજોષતિ યત્સોમ્યસ્યાન્ધસો બુબોધતિ ॥ ૧૦.૦૩૨.૦૧
વીન્દ્ર યાસિ દિવ્યાનિ રોચના વિ પાર્થિવાનિ રજસા પુરુષ્ટુત ।
યે ત્વા વહન્તિ મુહુરધ્વરાઁ ઉપ તે સુ વન્વન્તુ વગ્વનાઁ અરાધસઃ ॥ ૧૦.૦૩૨.૦૨

તદિન્મે છન્ત્સદ્વપુષો વપુષ્ટરં પુત્રો યજ્જાનં પિત્રોરધીયતિ ।
જાયા પતિં વહતિ વગ્નુના સુમત્પુંસ ઇદ્ભદ્રો વહતુઃ પરિષ્કૃતઃ ॥ ૧૦.૦૩૨.૦૩
તદિત્સધસ્થમભિ ચારુ દીધય ગાવો યચ્છાસન્વહતું ન ધેનવઃ ।
માતા યન્મન્તુર્યૂથસ્ય પૂર્વ્યાભિ વાણસ્ય સપ્તધાતુરિજ્જનઃ ॥ ૧૦.૦૩૨.૦૪
પ્ર વોઽચ્છા રિરિચે દેવયુષ્પદમેકો રુદ્રેભિર્યાતિ તુર્વણિઃ ।
જરા વા યેષ્વમૃતેષુ દાવને પરિ વ ઊમેભ્યઃ સિઞ્ચતા મધુ ॥ ૧૦.૦૩૨.૦૫
નિધીયમાનમપગૂળ્હમપ્સુ પ્ર મે દેવાનાં વ્રતપા ઉવાચ ।
ઇન્દ્રો વિદ્વાઁ અનુ હિ ત્વા ચચક્ષ તેનાહમગ્ને અનુશિષ્ટ આગામ્ ॥ ૧૦.૦૩૨.૦૬
અક્ષેત્રવિત્ક્ષેત્રવિદં હ્યપ્રાટ્ સ પ્રૈતિ ક્ષેત્રવિદાનુશિષ્ટઃ ।
એતદ્વૈ ભદ્રમનુશાસનસ્યોત સ્રુતિં વિન્દત્યઞ્જસીનામ્ ॥ ૧૦.૦૩૨.૦૭
અદ્યેદુ પ્રાણીદમમન્નિમાહાપીવૃતો અધયન્માતુરૂધઃ ।
એમેનમાપ જરિમા યુવાનમહેળન્વસુઃ સુમના બભૂવ ॥ ૧૦.૦૩૨.૦૮
એતાનિ ભદ્રા કલશ ક્રિયામ કુરુશ્રવણ દદતો મઘાનિ ।
દાન ઇદ્વો મઘવાનઃ સો અસ્ત્વયં ચ સોમો હૃદિ યં બિભર્મિ ॥ ૧૦.૦૩૨.૦૯
પ્ર મા યુયુજ્રે પ્રયુજો જનાનાં વહામિ સ્મ પૂષણમન્તરેણ ।
વિશ્વે દેવાસો અધ મામરક્ષન્દુઃશાસુરાગાદિતિ ઘોષ આસીત્ ॥ ૧૦.૦૩૩.૦૧
સં મા તપન્ત્યભિતઃ સપત્નીરિવ પર્શવઃ ।
નિ બાધતે અમતિર્નગ્નતા જસુર્વેર્ન વેવીયતે મતિઃ ॥ ૧૦.૦૩૩.૦૨
મૂષો ન શિશ્ના વ્યદન્તિ માધ્યઃ સ્તોતારં તે શતક્રતો ।
સકૃત્સુ નો મઘવન્નિન્દ્ર મૃળયાધા પિતેવ નો ભવ ॥ ૧૦.૦૩૩.૦૩
કુરુશ્રવણમાવૃણિ રાજાનં ત્રાસદસ્યવમ્ ।
મંહિષ્ઠં વાઘતામૃષિઃ ॥ ૧૦.૦૩૩.૦૪
યસ્ય મા હરિતો રથે તિસ્રો વહન્તિ સાધુયા ।
સ્તવૈ સહસ્રદક્ષિણે ॥ ૧૦.૦૩૩.૦૫
યસ્ય પ્રસ્વાદસો ગિર ઉપમશ્રવસઃ પિતુઃ ।
ક્ષેત્રં ન રણ્વમૂચુષે ॥ ૧૦.૦૩૩.૦૬
અધિ પુત્રોપમશ્રવો નપાન્મિત્રાતિથેરિહિ ।

પિતુષ્ટે અસ્મિ વન્દિતા ॥ ૧૦.૦૩૩.૦૭
યદીશીયામૃતાનામુત વા મર્ત્યાનામ્ ।
જીવેદિન્મઘવા મમ ॥ ૧૦.૦૩૩.૦૮
ન દેવાનામતિ વ્રતં શતાત્મા ચન જીવતિ ।
તથા યુજા વિ વાવૃતે ॥ ૧૦.૦૩૩.૦૯

પ્રાવેપા મા બૃહતો માદયન્તિ પ્રવાતેજા ઇરિણે વર્વૃતાનાઃ ।
સોમસ્યેવ મૌજવતસ્ય ભક્ષો વિભીદકો જાગૃવિર્મહ્યમચ્છાન્ ॥ ૧૦.૦૩૪.૦૧
ન મા મિમેથ ન જિહીળ એષા શિવા સખિભ્ય ઉત મહ્યમાસીત્ ।
અક્ષસ્યાહમેકપરસ્ય હેતોરનુવ્રતામપ જાયામરોધમ્ ॥ ૧૦.૦૩૪.૦૨
દ્વેષ્ટિ શ્વશ્રૂરપ જાયા રુણદ્ધિ ન નાથિતો વિન્દતે મર્ડિતારમ્ ।
અશ્વસ્યેવ જરતો વસ્ન્યસ્ય નાહં વિન્દામિ કિતવસ્ય ભોગમ્ ॥ ૧૦.૦૩૪.૦૩
અન્યે જાયાં પરિ મૃશન્ત્યસ્ય યસ્યાગૃધદ્વેદને વાજ્યક્ષઃ ।
પિતા માતા ભ્રાતર એનમાહુર્ન જાનીમો નયતા બદ્ધમેતમ્ ॥ ૧૦.૦૩૪.૦૪
યદાદીધ્યે ન દવિષાણ્યેભિઃ પરાયદ્‌ભ્યોઽવ હીયે સખિભ્યઃ ।
ન્યુપ્તાશ્ચ બભ્રવો વાચમક્રતઁ એમીદેષાં નિષ્કૃતં જારિણીવ ॥ ૧૦.૦૩૪.૦૫
સભામેતિ કિતવઃ પૃચ્છમાનો જેષ્યામીતિ તન્વા૩ શૂશુજાનઃ ।
અક્ષાસો અસ્ય વિ તિરન્તિ કામં પ્રતિદીવ્ને દધત આ કૃતાનિ ॥ ૧૦.૦૩૪.૦૬
અક્ષાસ ઇદઙ્કુશિનો નિતોદિનો નિકૃત્વાનસ્તપનાસ્તાપયિષ્ણવઃ ।
કુમારદેષ્ણા જયતઃ પુનર્હણો મધ્વા સમ્પૃક્તાઃ કિતવસ્ય બર્હણા ॥ ૧૦.૦૩૪.૦૭
ત્રિપઞ્ચાશઃ ક્રીળતિ વ્રાત એષાં દેવ ઇવ સવિતા સત્યધર્મા ।
ઉગ્રસ્ય ચિન્મન્યવે ના નમન્તે રાજા ચિદેભ્યો નમ ઇત્કૃણોતિ ॥ ૧૦.૦૩૪.૦૮
નીચા વર્તન્ત ઉપરિ સ્ફુરન્ત્યહસ્તાસો હસ્તવન્તં સહન્તે ।
દિવ્યા અઙ્ગારા ઇરિણે ન્યુપ્તાઃ શીતાઃ સન્તો હૃદયં નિર્દહન્તિ ॥ ૧૦.૦૩૪.૦૯
જાયા તપ્યતે કિતવસ્ય હીના માતા પુત્રસ્ય ચરતઃ ક્વ સ્વિત્ ।
ઋણાવા બિભ્યદ્ધનમિચ્છમાનોઽન્યેષામસ્તમુપ નક્તમેતિ ॥ ૧૦.૦૩૪.૧૦
સ્ત્રિયં દૃષ્ટ્વાય કિતવં તતાપાન્યેષાં જાયાં સુકૃતં ચ યોનિમ્ ।
પૂર્વાહ્ણે અશ્વાન્યુયુજે હિ બભ્રૂન્સો અગ્નેરન્તે વૃષલઃ પપાદ ॥ ૧૦.૦૩૪.૧૧

યો વઃ સેનાનીર્મહતો ગણસ્ય રાજા વ્રાતસ્ય પ્રથમો બભૂવ ।
તસ્મૈ કૃણોમિ ન ધના રુણધ્મિ દશાહં પ્રાચીસ્તદૃતં વદામિ ॥ ૧૦.૦૩૪.૧૨
અક્ષૈર્મા દીવ્યઃ કૃષિમિત્કૃષસ્વ વિત્તે રમસ્વ બહુ મન્યમાનઃ ।
તત્ર ગાવઃ કિતવ તત્ર જાયા તન્મે વિ ચષ્ટે સવિતાયમર્યઃ ॥ ૧૦.૦૩૪.૧૩
મિત્રં કૃણુધ્વં ખલુ મૃળતા નો મા નો ઘોરેણ ચરતાભિ ધૃષ્ણુ ।
નિ વો નુ મન્યુર્વિશતામરાતિરન્યો બભ્રૂણાં પ્રસિતૌ ન્વસ્તુ ॥ ૧૦.૦૩૪.૧૪
અબુધ્રમુ ત્ય ઇન્દ્રવન્તો અગ્નયો જ્યોતિર્ભરન્ત ઉષસો વ્યુષ્ટિષુ ।
મહી દ્યાવાપૃથિવી ચેતતામપોઽદ્યા દેવાનામવ આ વૃણીમહે ॥ ૧૦.૦૩૫.૦૧
દિવસ્પૃથિવ્યોરવ આ વૃણીમહે માતૃન્સિન્ધૂન્પર્વતાઞ્છર્યણાવતઃ ।
અનાગાસ્ત્વં સૂર્યમુષાસમીમહે ભદ્રં સોમઃ સુવાનો અદ્યા કૃણોતુ નઃ ॥ ૧૦.૦૩૫.૦૨
દ્યાવા નો અદ્ય પૃથિવી અનાગસો મહી ત્રાયેતાં સુવિતાય માતરા ।
ઉષા ઉચ્છન્ત્યપ બાધતામઘં સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૩
ઇયં ન ઉસ્રા પ્રથમા સુદેવ્યં રેવત્સનિભ્યો રેવતી વ્યુચ્છતુ ।
આરે મન્યું દુર્વિદત્રસ્ય ધીમહિ સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૪
પ્ર યાઃ સિસ્રતે સૂર્યસ્ય રશ્મિભિર્જ્યોતિર્ભરન્તીરુષસો વ્યુષ્ટિષુ ।
ભદ્રા નો અદ્ય શ્રવસે વ્યુચ્છત સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૫
અનમીવા ઉષસ આ ચરન્તુ ન ઉદગ્નયો જિહતાં જ્યોતિષા બૃહત્ ।
આયુક્ષાતામશ્વિના તૂતુજિં રથં સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૬
શ્રેષ્ઠં નો અદ્ય સવિતર્વરેણ્યં ભાગમા સુવ સ હિ રત્નધા અસિ ।
રાયો જનિત્રીં ધિષણામુપ બ્રુવે સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૭
પિપર્તુ મા તદૃતસ્ય પ્રવાચનં દેવાનાં યન્મનુષ્યા અમન્મહિ ।
વિશ્વા ઇદુસ્રાઃ સ્પળુદેતિ સૂર્યઃ સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૮
અદ્વેષો અદ્ય બર્હિષઃ સ્તરીમણિ ગ્રાવ્ણાં યોગે મન્મનઃ સાધ ઈમહે ।
આદિત્યાનાં શર્મણિ સ્થા ભુરણ્યસિ સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૦૯
આ નો બર્હિઃ સધમાદે બૃહદ્દિવિ દેવાઁ ઈળે સાદયા સપ્ત હોતૄન્ ।
ઇન્દ્રં મિત્રં વરુણં સાતયે ભગં સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૧૦
ત આદિત્યા આ ગતા સર્વતાતયે વૃધે નો યજ્ઞમવતા સજોષસઃ ।

બૃહસ્પતિં પૂષણમશ્વિના ભગં સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૧૧
તન્નો દેવા યચ્છત સુપ્રવાચનં છર્દિરાદિત્યાઃ સુભરં નૃપાય્યમ્ ।
પશ્વે તોકાય તનયાય જીવસે સ્વસ્ત્યગ્નિં સમિધાનમીમહે ॥ ૧૦.૦૩૫.૧૨
વિશ્વે અદ્ય મરુતો વિશ્વ ઊતી વિશ્વે ભવન્ત્વગ્નયઃ સમિદ્ધાઃ ।
વિશ્વે નો દેવા અવસા ગમન્તુ વિશ્વમસ્તુ દ્રવિણં વાજો અસ્મે ॥ ૧૦.૦૩૫.૧૩
યં દેવાસોઽવથ વાજસાતૌ યં ત્રાયધ્વે યં પિપૃથાત્યંહઃ ।
યો વો ગોપીથે ન ભયસ્ય વેદ તે સ્યામ દેવવીતયે તુરાસઃ ॥ ૧૦.૦૩૫.૧૪

ઉષાસાનક્તા બૃહતી સુપેશસા દ્યાવાક્ષામા વરુણો મિત્રો અર્યમા ।
ઇન્દ્રં હુવે મરુતઃ પર્વતાઁ અપ આદિત્યાન્દ્યાવાપૃથિવી અપઃ સ્વઃ ॥ ૧૦.૦૩૬.૦૧
દ્યૌશ્ચ નઃ પૃથિવી ચ પ્રચેતસ ઋતાવરી રક્ષતામંહસો રિષઃ ।
મા દુર્વિદત્રા નિરૃતિર્ન ઈશત તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૨
વિશ્વસ્માન્નો અદિતિઃ પાત્વંહસો માતા મિત્રસ્ય વરુણસ્ય રેવતઃ ।
સ્વર્વજ્જ્યોતિરવૃકં નશીમહિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૩
ગ્રાવા વદન્નપ રક્ષાંસિ સેધતુ દુષ્ષ્વપ્ન્યં નિરૃતિં વિશ્વમત્રિણમ્ ।
આદિત્યં શર્મ મરુતામશીમહિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૪
એન્દ્રો બર્હિઃ સીદતુ પિન્વતામિળા બૃહસ્પતિઃ સામભિરૃક્વો અર્ચતુ ।
સુપ્રકેતં જીવસે મન્મ ધીમહિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૫
દિવિસ્પૃશં યજ્ઞમસ્માકમશ્વિના જીરાધ્વરં કૃણુતં સુમ્નમિષ્ટયે ।
પ્રાચીનરશ્મિમાહુતં ઘૃતેન તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૬
ઉપ હ્વયે સુહવં મારુતં ગણં પાવકમૃષ્વં સખ્યાય શમ્ભુવમ્ ।
રાયસ્પોષં સૌશ્રવસાય ધીમહિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૭
અપાં પેરું જીવધન્યં ભરામહે દેવાવ્યં સુહવમધ્વરશ્રિયમ્ ।
સુરશ્મિં સોમમિન્દ્રિયં યમીમહિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૮
સનેમ તત્સુસનિતા સનિત્વભિર્વયં જીવા જીવપુત્રા અનાગસઃ ।
બ્રહ્મદ્વિષો વિષ્વગેનો ભરેરત તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૦૯
યે સ્થા મનોર્યજ્ઞિયાસ્તે શૃણોતન યદ્વો દેવા ઈમહે તદ્દદાતન ।
જૈત્રં ક્રતું રયિમદ્વીરવદ્યશસ્તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૧૦

મહદદ્ય મહતામા વૃણીમહેઽવો દેવાનાં બૃહતામનર્વણામ્ ।
યથા વસુ વીરજાતં નશામહૈ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૧૧
મહો અગ્નેઃ સમિધાનસ્ય શર્મણ્યનાગા મિત્રે વરુણે સ્વસ્તયે ।
શ્રેષ્ઠે સ્યામ સવિતુઃ સવીમનિ તદ્દેવાનામવો અદ્યા વૃણીમહે ॥ ૧૦.૦૩૬.૧૨
યે સવિતુઃ સત્યસવસ્ય વિશ્વે મિત્રસ્ય વ્રતે વરુણસ્ય દેવાઃ ।
તે સૌભગં વીરવદ્ગોમદપ્નો દધાતન દ્રવિણં ચિત્રમસ્મે ॥ ૧૦.૦૩૬.૧૩
સવિતા પશ્ચાતાત્સવિતા પુરસ્તાત્સવિતોત્તરાત્તાત્સવિતાધરાત્તાત્ ।
સવિતા નઃ સુવતુ સર્વતાતિં સવિતા નો રાસતાં દીર્ઘમાયુઃ ॥ ૧૦.૦૩૬.૧૪
નમો મિત્રસ્ય વરુણસ્ય ચક્ષસે મહો દેવાય તદૃતં સપર્યત ।
દૂરેદૃશે દેવજાતાય કેતવે દિવસ્પુત્રાય સૂર્યાય શંસત ॥ ૧૦.૦૩૭.૦૧
સા મા સત્યોક્તિઃ પરિ પાતુ વિશ્વતો દ્યાવા ચ યત્ર તતનન્નહાનિ ચ ।
વિશ્વમન્યન્નિ વિશતે યદેજતિ વિશ્વાહાપો વિશ્વાહોદેતિ સૂર્યઃ ॥ ૧૦.૦૩૭.૦૨
ન તે અદેવઃ પ્રદિવો નિ વાસતે યદેતશેભિઃ પતરૈ રથર્યસિ ।
પ્રાચીનમન્યદનુ વર્તતે રજ ઉદન્યેન જ્યોતિષા યાસિ સૂર્ય ॥ ૧૦.૦૩૭.૦૩
યેન સૂર્ય જ્યોતિષા બાધસે તમો જગચ્ચ વિશ્વમુદિયર્ષિ ભાનુના ।
તેનાસ્મદ્વિશ્વામનિરામનાહુતિમપામીવામપ દુષ્ષ્વપ્ન્યં સુવ ॥ ૧૦.૦૩૭.૦૪
વિશ્વસ્ય હિ પ્રેષિતો રક્ષસિ વ્રતમહેળયન્નુચ્ચરસિ સ્વધા અનુ ।
યદદ્ય ત્વા સૂર્યોપબ્રવામહૈ તં નો દેવા અનુ મંસીરત ક્રતુમ્ ॥ ૧૦.૦૩૭.૦૫
તં નો દ્યાવાપૃથિવી તન્ન આપ ઇન્દ્રઃ શ◌ૃણ્વન્તુ મરુતો હવં વચઃ ।
મા શૂને ભૂમ સૂર્યસ્ય સંદૃશિ ભદ્રં જીવન્તો જરણામશીમહિ ॥ ૧૦.૦૩૭.૦૬
વિશ્વાહા ત્વા સુમનસઃ સુચક્ષસઃ પ્રજાવન્તો અનમીવા અનાગસઃ ।
ઉદ્યન્તં ત્વા મિત્રમહો દિવેદિવે જ્યોગ્જીવાઃ પ્રતિ પશ્યેમ સૂર્ય ॥ ૧૦.૦૩૭.૦૭
મહિ જ્યોતિર્બિભ્રતં ત્વા વિચક્ષણ ભાસ્વન્તં ચક્ષુષેચક્ષુષે મયઃ ।
આરોહન્તં બૃહતઃ પાજસસ્પરિ વયં જીવાઃ પ્રતિ પશ્યેમ સૂર્ય ॥ ૧૦.૦૩૭.૦૮
યસ્ય તે વિશ્વા ભુવનાનિ કેતુના પ્ર ચેરતે નિ ચ વિશન્તે અક્તુભિઃ ।
અનાગાસ્ત્વેન હરિકેશ સૂર્યાહ્નાહ્ના નો વસ્યસાવસ્યસોદિહિ ॥ ૧૦.૦૩૭.૦૯
શં નો ભવ ચક્ષસા શં નો અહ્ના શં ભાનુના શં હિમા શં ઘૃણેન ।

યથા શમધ્વચ્છમસદ્દુરોણે તત્સૂર્ય દ્રવિણં ધેહિ ચિત્રમ્ ॥ ૧૦.૦૩૭.૧૦
અસ્માકં દેવા ઉભયાય જન્મને શર્મ યચ્છત દ્વિપદે ચતુષ્પદે ।
અદત્પિબદૂર્જયમાનમાશિતં તદસ્મે શં યોરરપો દધાતન ॥ ૧૦.૦૩૭.૧૧
યદ્વો દેવાશ્ચકૃમ જિહ્વયા ગુરુ મનસો વા પ્રયુતી દેવહેળનમ્ ।
અરાવા યો નો અભિ દુચ્છુનાયતે તસ્મિન્તદેનો વસવો નિ ધેતન ॥ ૧૦.૦૩૭.૧૨
અસ્મિન્ન ઇન્દ્ર પૃત્સુતૌ યશસ્વતિ શિમીવતિ ક્રન્દસિ પ્રાવ સાતયે ।
યત્ર ગોષાતા ધૃષિતેષુ ખાદિષુ વિષ્વક્પતન્તિ દિદ્યવો નૃષાહ્યે ॥ ૧૦.૦૩૮.૦૧
સ નઃ ક્ષુમન્તં સદને વ્યૂર્ણુહિ ગોઅર્ણસં રયિમિન્દ્ર શ્રવાય્યમ્ ।
સ્યામ તે જયતઃ શક્ર મેદિનો યથા વયમુશ્મસિ તદ્વસો કૃધિ ॥ ૧૦.૦૩૮.૦૨
યો નો દાસ આર્યો વા પુરુષ્ટુતાદેવ ઇન્દ્ર યુધયે ચિકેતતિ ।
અસ્માભિષ્ટે સુષહાઃ સન્તુ શત્રવસ્ત્વયા વયં તાન્વનુયામ સંગમે ॥ ૧૦.૦૩૮.૦૩
યો દભ્રેભિર્હવ્યો યશ્ચ ભૂરિભિર્યો અભીકે વરિવોવિન્નૃષાહ્યે ।
તં વિખાદે સસ્નિમદ્ય શ્રુતં નરમર્વાઞ્ચમિન્દ્રમવસે કરામહે ॥ ૧૦.૦૩૮.૦૪
સ્વવૃજં હિ ત્વામહમિન્દ્ર શુશ્રવાનાનુદં વૃષભ રધ્રચોદનમ્ ।
પ્ર મુઞ્ચસ્વ પરિ કુત્સાદિહા ગહિ કિમુ ત્વાવાન્મુષ્કયોર્બદ્ધ આસતે ॥ ૧૦.૦૩૮.૦૫
યો વાં પરિજ્મા સુવૃદશ્વિના રથો દોષામુષાસો હવ્યો હવિષ્મતા ।
શશ્વત્તમાસસ્તમુ વામિદં વયં પિતુર્ન નામ સુહવં હવામહે ॥ ૧૦.૦૩૯.૦૧
ચોદયતં સૂનૃતાઃ પિન્વતં ધિય ઉત્પુરંધીરીરયતં તદુશ્મસિ ।
યશસં ભાગં કૃણુતં નો અશ્વિના સોમં ન ચારું મઘવત્સુ નસ્કૃતમ્ ॥ ૧૦.૦૩૯.૦૨
અમાજુરશ્ચિદ્ભવથો યુવં ભગોઽનાશોશ્ચિદવિતારાપમસ્ય ચિત્ ।
અન્ધસ્ય ચિન્નાસત્યા કૃશસ્ય ચિદ્યુવામિદાહુર્ભિષજા રુતસ્ય ચિત્ ॥ ૧૦.૦૩૯.૦૩
યુવં ચ્યવાનં સનયં યથા રથં પુનર્યુવાનં ચરથાય તક્ષથુઃ ।
નિષ્ટૌગ્ર્યમૂહથુરદ્ભ્યસ્પરિ વિશ્વેત્તા વાં સવનેષુ પ્રવાચ્યા ॥ ૧૦.૦૩૯.૦૪
પુરાણા વાં વીર્યાઉ પ્ર બ્રવા જનેઽથો હાસથુર્ભિષજા મયોભુવા ।
તા વાં નુ નવ્યાવવસે કરામહેઽયં નાસત્યા શ્રદરિર્યથા દધત્ ॥ ૧૦.૦૩૯.૦૫
ઇયં વામહ્વે શૃણુતં મે અશ્વિના પુત્રાયેવ પિતરા મહ્યં શિક્ષતમ્ ।
અનાપિરજ્ઞા અસજાત્યામતિઃ પુરા તસ્યા અભિશસ્તેરવ સ્પૃતમ્ ॥ ૧૦.૦૩૯.૦૬

યુવં રથેન વિમદાય શુન્ધ્યુવં ન્યૂહથુઃ પુરુમિત્રસ્ય યોષણામ્ ।
યુવં હવં વધ્રિમત્યા અગચ્છતં યુવં સુષુતિં ચક્રથુઃ પુરંધયે ॥ ૧૦.૦૩૯.૦૭
યુવં વિપ્રસ્ય જરણામુપેયુષઃ પુનઃ કલેરકૃણુતં યુવદ્વયઃ ।
યુવં વન્દનમૃશ્યદાદુદૂપથુર્યુવં સદ્યો વિશ્પલામેતવે કૃથઃ ॥ ૧૦.૦૩૯.૦૮
યુવં હ રેભં વૃષણા ગુહા હિતમુદૈરયતં મમૃવાંસમશ્વિના ।
યુવમૃબીસમુત તપ્તમત્રય ઓમન્વન્તં ચક્રથુઃ સપ્તવધ્રયે ॥ ૧૦.૦૩૯.૦૯
યુવં શ્વેતં પેદવેઽશ્વિનાશ્વં નવભિર્વાજૈર્નવતી ચ વાજિનમ્ ।
ચર્કૃત્યં દદથુર્દ્રાવયત્સખં ભગં ન નૃભ્યો હવ્યં મયોભુવમ્ ॥ ૧૦.૦૩૯.૧૦
ન તં રાજાનાવદિતે કુતશ્ચન નાંહો અશ્નોતિ દુરિતં નકિર્ભયમ્ ।
યમશ્વિના સુહવા રુદ્રવર્તની પુરોરથં કૃણુથઃ પત્ન્યા સહ ॥ ૧૦.૦૩૯.૧૧
આ તેન યાતં મનસો જવીયસા રથં યં વામૃભવશ્ચક્રુરશ્વિના ।
યસ્ય યોગે દુહિતા જાયતે દિવ ઉભે અહની સુદિને વિવસ્વતઃ ॥ ૧૦.૦૩૯.૧૨
તા વર્તિર્યાતં જયુષા વિ પર્વતમપિન્વતં શયવે ધેનુમશ્વિના ।
વૃકસ્ય ચિદ્વર્તિકામન્તરાસ્યાદ્યુવં શચીભિર્ગ્રસિતામમુઞ્ચતમ્ ॥ ૧૦.૦૩૯.૧૩
એતં વાં સ્તોમમશ્વિનાવકર્માતક્ષામ ભૃગવો ન રથમ્ ।
ન્યમૃક્ષામ યોષણાં ન મર્યે નિત્યં ન સૂનું તનયં દધાનાઃ ॥ ૧૦.૦૩૯.૧૪

રથં યાન્તં કુહ કો હ વાં નરા પ્રતિ દ્યુમન્તં સુવિતાય ભૂષતિ ।
પ્રાતર્યાવાણં વિભ્વં વિશેવિશે વસ્તોર્વસ્તોર્વહમાનં ધિયા શમિ ॥ ૧૦.૦૪૦.૦૧
કુહ સ્વિદ્દોષા કુહ વસ્તોરશ્વિના કુહાભિપિત્વં કરતઃ કુહોષતુઃ ।
કો વાં શયુત્રા વિધવેવ દેવરં મર્યં ન યોષા કૃણુતે સધસ્થ આ ॥ ૧૦.૦૪૦.૦૨
પ્રાતર્જરેથે જરણેવ કાપયા વસ્તોર્વસ્તોર્યજતા ગચ્છથો ગૃહમ્ ।
કસ્ય ધ્વસ્રા ભવથઃ કસ્ય વા નરા રાજપુત્રેવ સવનાવ ગચ્છથઃ ॥ ૧૦.૦૪૦.૦૩
યુવાં મૃગેવ વારણા મૃગણ્યવો દોષા વસ્તોર્હવિષા નિ હ્વયામહે ।
યુવં હોત્રામૃતુથા જુહ્વતે નરેષં જનાય વહથઃ શુભસ્પતી ॥ ૧૦.૦૪૦.૦૪
યુવાં હ ઘોષા પર્યશ્વિના યતી રાજ્ઞ ઊચે દુહિતા પૃચ્છે વાં નરા ।
ભૂતં મે અહ્ન ઉત ભૂતમક્તવેઽશ્વાવતે રથિને શક્તમર્વતે ॥ ૧૦.૦૪૦.૦૫
યુવં કવી ષ્ઠઃ પર્યશ્વિના રથં વિશો ન કુત્સો જરિતુર્નશાયથઃ ।

યુવોર્હ મક્ષા પર્યશ્વિના મધ્વાસા ભરત નિષ્કૃતં ન યોષણા ॥ ૧૦.૦૪૦.૦૬
યુવં હ ભુજ્યું યુવમશ્વિના વશં યુવં શિઞ્જારમુશનામુપારથુઃ ।
યુવો રરાવા પરિ સખ્યમાસતે યુવોરહમવસા સુમ્નમા ચકે ॥ ૧૦.૦૪૦.૦૭
યુવં હ કૃશં યુવમશ્વિના શયું યુવં વિધન્તં વિધવામુરુષ્યથઃ ।
યુવં સનિભ્યઃ સ્તનયન્તમશ્વિનાપ વ્રજમૂર્ણુથઃ સપ્તાસ્યમ્ ॥ ૧૦.૦૪૦.૦૮
જનિષ્ટ યોષા પતયત્કનીનકો વિ ચારુહન્વીરુધો દંસના અનુ ।
આસ્મૈ રીયન્તે નિવનેવ સિન્ધવોઽસ્મા અહ્ને ભવતિ તત્પતિત્વનમ્ ॥ ૧૦.૦૪૦.૦૯
જીવં રુદન્તિ વિ મયન્તે અધ્વરે દીર્ઘામનુ પ્રસિતિં દીધિયુર્નરઃ ।
વામં પિતૃભ્યો ય ઇદં સમેરિરે મયઃ પતિભ્યો જનયઃ પરિષ્વજે ॥ ૧૦.૦૪૦.૧૦
ન તસ્ય વિદ્મ તદુ ષુ પ્ર વોચત યુવા હ યદ્યુવત્યાઃ ક્ષેતિ યોનિષુ ।
પ્રિયોસ્રિયસ્ય વૃષભસ્ય રેતિનો ગૃહં ગમેમાશ્વિના તદુશ્મસિ ॥ ૧૦.૦૪૦.૧૧
આ વામગન્સુમતિર્વાજિનીવસૂ ન્યશ્વિના હૃત્સુ કામા અયંસત ।
અભૂતં ગોપા મિથુના શુભસ્પતી પ્રિયા અર્યમ્ણો દુર્યા◌ઁ અશીમહિ ॥ ૧૦.૦૪૦.૧૨
તા મન્દસાના મનુષો દુરોણ આ ધત્તં રયિં સહવીરં વચસ્યવે ।
કૃતં તીર્થં સુપ્રપાણં શુભસ્પતી સ્થાણું પથેષ્ઠામપ દુર્મતિં હતમ્ ॥ ૧૦.૦૪૦.૧૩
ક્વ સ્વિદદ્ય કતમાસ્વશ્વિના વિક્ષુ દસ્રા માદયેતે શુભસ્પતી ।
ક ઈં નિ યેમે કતમસ્ય જગ્મતુર્વિપ્રસ્ય વા યજમાનસ્ય વા ગૃહમ્ ॥ ૧૦.૦૪૦.૧૪

સમાનમુ ત્યં પુરુહૂતમુક્થ્યં૧ રથં ત્રિચક્રં સવના ગનિગ્મતમ્ ।
પરિજ્માનં વિદથ્યં સુવૃક્તિભિર્વયં વ્યુષ્ટા ઉષસો હવામહે ॥ ૧૦.૦૪૧.૦૧
પ્રાતર્યુજં નાસત્યાધિ તિષ્ઠથઃ પ્રાતર્યાવાણં મધુવાહનં રથમ્ ।
વિશો યેન ગચ્છથો યજ્વરીર્નરા કીરેશ્ચિદ્યજ્ઞં હોતૃમન્તમશ્વિના ॥ ૧૦.૦૪૧.૦૨
અધ્વર્યું વા મધુપાણિં સુહસ્ત્યમગ્નિધં વા ધૃતદક્ષં દમૂનસમ્ ।
વિપ્રસ્ય વા યત્સવનાનિ ગચ્છથોઽત આ યાતં મધુપેયમશ્વિના ॥ ૧૦.૦૪૧.૦૩

અસ્તેવ સુ પ્રતરં લાયમસ્યન્ભૂષન્નિવ પ્ર ભરા સ્તોમમસ્મૈ ।
વાચા વિપ્રાસ્તરત વાચમર્યો નિ રામય જરિતઃ સોમ ઇન્દ્રમ્ ॥ ૧૦.૦૪૨.૦૧
દોહેન ગામુપ શિક્ષા સખાયં પ્ર બોધય જરિતર્જારમિન્દ્રમ્ ।
કોશં ન પૂર્ણં વસુના ન્યૃષ્ટમા ચ્યાવય મઘદેયાય શૂરમ્ ॥ ૧૦.૦૪૨.૦૨

કિમઙ્ગ ત્વા મઘવન્ભોજમાહુઃ શિશીહિ મા શિશયં ત્વા શૃણોમિ ।
અપ્નસ્વતી મમ ધીરસ્તુ શક્ર વસુવિદં ભગમિન્દ્રા ભરા નઃ ॥ ૧૦.૦૪૨.૦૩
ત્વાં જના મમસત્યેષ્વિન્દ્ર સંતસ્થાના વિ હ્વયન્તે સમીકે ।
અત્રા યુજં કૃણુતે યો હવિષ્માન્નાસુન્વતા સખ્યં વષ્ટિ શૂરઃ ॥ ૧૦.૦૪૨.૦૪
ધનં ન સ્યન્દ્રં બહુલં યો અસ્મૈ તીવ્રાન્સોમાઁ આસુનોતિ પ્રયસ્વાન્ ।
તસ્મૈ શત્રૂન્સુતુકાન્પ્રાતરહ્નો નિ સ્વષ્ટ્રાન્યુવતિ હન્તિ વૃત્રમ્ ॥ ૧૦.૦૪૨.૦૫
યસ્મિન્વયં દધિમા શંસમિન્દ્રે યઃ શિશ્રાય મઘવા કામમસ્મે ।
આરાચ્ચિત્સન્ભયતામસ્ય શત્રુર્ન્યસ્મૈ દ્યુમ્ના જન્યા નમન્તામ્ ॥ ૧૦.૦૪૨.૦૬
આરાચ્છત્રુમપ બાધસ્વ દૂરમુગ્રો યઃ શમ્બઃ પુરુહૂત તેન ।
અસ્મે ધેહિ યવમદ્ગોમદિન્દ્ર કૃધી ધિયં જરિત્રે વાજરત્નામ્ ॥ ૧૦.૦૪૨.૦૭
પ્ર યમન્તર્વૃષસવાસો અગ્મન્તીવ્રાઃ સોમા બહુલાન્તાસ ઇન્દ્રમ્ ।
નાહ દામાનં મઘવા નિ યંસન્નિ સુન્વતે વહતિ ભૂરિ વામમ્ ॥ ૧૦.૦૪૨.૦૮
ઉત પ્રહામતિદીવ્યા જયાતિ કૃતં યચ્છ્વઘ્ની વિચિનોતિ કાલે ।
યો દેવકામો ન ધના રુણદ્ધિ સમિત્તં રાયા સૃજતિ સ્વધાવાન્ ॥ ૧૦.૦૪૨.૦૯
ગોભિષ્ટરેમામતિં દુરેવાં યવેન ક્ષુધં પુરુહૂત વિશ્વામ્ ।
વયં રાજભિઃ પ્રથમા ધનાન્યસ્માકેન વૃજનેના જયેમ ॥ ૧૦.૦૪૨.૧૦
બૃહસ્પતિર્નઃ પરિ પાતુ પશ્ચાદુતોત્તરસ્માદધરાદઘાયોઃ ।
ઇન્દ્રઃ પુરસ્તાદુત મધ્યતો નઃ સખા સખિભ્યો વરિવઃ કૃણોતુ ॥ ૧૦.૦૪૨.૧૧
અચ્છા મ ઇન્દ્રં મતયઃ સ્વર્વિદઃ સધ્રીચીર્વિશ્વા ઉશતીરનૂષત ।
પરિ ષ્વજન્તે જનયો યથા પતિં મર્યં ન શુન્ધ્યું મઘવાનમૂતયે ॥ ૧૦.૦૪૩.૦૧
ન ઘા ત્વદ્રિગપ વેતિ મે મનસ્ત્વે ઇત્કામં પુરુહૂત શિશ્રય ।
રાજેવ દસ્મ નિ ષદોઽધિ બર્હિષ્યસ્મિન્સુ સોમેઽવપાનમસ્તુ તે ॥ ૧૦.૦૪૩.૦૨
વિષૂવૃદિન્દ્રો અમતેરુત ક્ષુધઃ સ ઇદ્રાયો મઘવા વસ્વ ઈશતે ।
તસ્યેદિમે પ્રવણે સપ્ત સિન્ધવો વયો વર્ધન્તિ વૃષભસ્ય શુષ્મિણઃ ॥ ૧૦.૦૪૩.૦૩
વયો ન વૃક્ષં સુપલાશમાસદન્સોમાસ ઇન્દ્રં મન્દિનશ્ચમૂષદઃ ।
પ્રૈષામનીકં શવસા દવિદ્યુતદ્વિદત્સ્વ૧ર્મનવે જ્યોતિરાર્યમ્ ॥ ૧૦.૦૪૩.૦૪
કૃતં ન શ્વઘ્ની વિ ચિનોતિ દેવને સંવર્ગં યન્મઘવા સૂર્યં જયત્ ।

ન તત્તે અન્યો અનુ વીર્યં શકન્ન પુરાણો મઘવન્નોત નૂતનઃ ॥ ૧૦.૦૪૩.૦૫

વિશંવિશં મઘવા પર્યશાયત જનાનાં ધેના અવચાકશદ્વૃષા ।

યસ્યાહ શક્રઃ સવનેષુ રણ્યતિ સ તીવ્રૈઃ સોમૈઃ સહતે પૃતન્યતઃ ॥ ૧૦.૦૪૩.૦૬

આપો ન સિન્ધુમભિ યત્સમક્ષરન્સોમાસ ઇન્દ્રં કુલ્યા ઇવ હ્રદમ્ ।

વર્ધન્તિ વિપ્રા મહો અસ્ય સાદને યવં ન વૃષ્ટિર્દિવ્યેન દાનુના ॥ ૧૦.૦૪૩.૦૭

વૃષા ન ક્રુદ્ધઃ પતયદ્રજસ્સ્વા યો અર્યપત્નીરકૃણોદિમા અપઃ ।

સ સુન્વતે મઘવા જીરદાનવેઽવિન્દજ્જ્યોતિર્મનવે હવિષ્મતે ॥ ૧૦.૦૪૩.૦૮

ઉજ્જાયતાં પરશુર્જ્યોતિષા સહ ભૂયા ઋતસ્ય સુદુઘા પુરાણવત્ ।

વિ રોચતામરુષો ભાનુના શુચિઃ સ્વ૧ર્ણ શુક્રં શુશુચીત સત્પતિઃ ॥ ૧૦.૦૪૩.૦૯

ગોભિષ્ટરેમામતિં દુરેવાં યવેન ક્ષુધં પુરુહૂત વિશ્વામ્ ।

વયં રાજભિઃ પ્રથમા ધનાન્યસ્માકેન વૃજનેના જયેમ ॥ ૧૦.૦૪૩.૧૦

બૃહસ્પતિર્નઃ પરિ પાતુ પશ્ચાદુતોત્તરસ્માદધરાદઘાયોઃ ।

ઇન્દ્રઃ પુરસ્તાદુત મધ્યતો નઃ સખા સખિભ્યો વરિવઃ કૃણોતુ ॥ ૧૦.૦૪૩.૧૧

આ યાત્વિન્દ્રઃ સ્વપતિર્મદાય યો ધર્મણા તૂતુજાનસ્તુવિષ્માન્ ।

પ્રત્વક્ષાણો અતિ વિશ્વા સહાંસ્યપારેણ મહતા વૃષ્ણ્યેન ॥ ૧૦.૦૪૪.૦૧

સુષ્ઠામા રથઃ સુયમા હરી તે મિમ્યક્ષ વજ્રો નૃપતે ગભસ્તૌ ।

શીભં રાજન્સુપથા યાહ્યર્વાઙ્વર્ધામ તે પપુષો વૃષ્ણ્યાનિ ॥ ૧૦.૦૪૪.૦૨

એન્દ્રવાહો નૃપતિં વજ્રબાહુમુગ્રમુગ્રાસસ્તવિષાસ એનમ્ ।

પ્રત્વક્ષસં વૃષભં સત્યશુષ્મમેમસ્મત્રા સધમાદો વહન્તુ ॥ ૧૦.૦૪૪.૦૩

એવા પતિં દ્રોણસાચં સચેતસમૂર્જઃ સ્કમ્ભં ધરુણ આ વૃષાયસે ।

ઓજઃ કૃષ્વ સં ગૃભાય ત્વે અપ્યસો યથા કેનિપાનામિનો વૃધે ॥ ૧૦.૦૪૪.૦૪

ગમન્નસ્મે વસૂન્યા હિ શંસિષં સ્વાશિષં ભરમા યાહિ સોમિનઃ ।

ત્વમીશિષે સાસ્મિન્ના સત્સિ બર્હિષ્યનાધૃષ્યા તવ પાત્રાણિ ધર્મણા ॥ ૧૦.૦૪૪.૦૫

પૃથક્પ્રાયન્પ્રથમા દેવહૂતયોઽકૃણ્વત શ્રવસ્યાનિ દુષ્ટરા ।

ન યે શેકુર્યજ્ઞિયાં નાવમારુહમીર્મૈવ તે ન્યવિશન્ત કેપયઃ ॥ ૧૦.૦૪૪.૦૬

એવૈવાપાગપરે સન્તુ દૂઢ્યોઽશ્વા યેષાં દુર્યુજ આયુયુજ્રે ।

ઇત્થા યે પ્રાગુપરે સન્તિ દાવને પુરૂણિ યત્ર વયુનાનિ ભોજના ॥ ૧૦.૦૪૪.૦૭

ગિરીઁરજ્રાન્રેજમાનાઁ અધારયદ્દ્યૌઃ ક્રન્દદન્તરિક્ષાણિ કોપયત્ ।
સમીચીને ધિષણે વિ ષ્કભાયતિ વૃષ્ણઃ પીત્વા મદ ઉક્થાનિ શંસતિ ॥ ૧૦.૦૪૪.૦૮
ઇમં બિભર્મિ સુકૃતં તે અઙ્કુશં યેનારુજાસિ મઘવઞ્છફારુજઃ ।
અસ્મિન્સુ તે સવને અસ્ત્વોક્યં સુત ઇષ્ટૌ મઘવન્બોધ્યાભગઃ ॥ ૧૦.૦૪૪.૦૯
ગોભિષ્ટરેમામતિં દુરેવાં યવેન ક્ષુધં પુરુહૂત વિશ્વામ્ ।
વયં રાજભિઃ પ્રથમા ધનાન્યસ્માકેન વૃજનેના જયેમ ॥ ૧૦.૦૪૪.૧૦
બૃહસ્પતિર્નઃ પરિ પાતુ પશ્ચાદુતોત્તરસ્માદધરાદઘાયોઃ ।
ઇન્દ્રઃ પુરસ્તાદુત મધ્યતો નઃ સખા સખિભ્યો વરિવઃ કૃણોતુ ॥ ૧૦.૦૪૪.૧૧
દિવસ્પરિ પ્રથમં જજ્ઞે અગ્નિરસ્મદ્દ્વિતીયં પરિ જાતવેદાઃ ।
તૃતીયમપ્સુ નૃમણા અજસ્રમિન્ધાન એનં જરતે સ્વાધીઃ ॥ ૧૦.૦૪૫.૦૧
વિદ્મા તે અગ્ને ત્રેધા ત્રયાણિ વિદ્મા તે ધામ વિભૃતા પુરુત્રા ।
વિદ્મા તે નામ પરમં ગુહા યદ્વિદ્મા તમુત્સં યત આજગન્થ ॥ ૧૦.૦૪૫.૦૨
સમુદ્રે ત્વા નૃમણા અપ્સ્વ૧ન્તર્નૃચક્ષા ઈધે દિવો અગ્ન ઊધન્ ।
તૃતીયે ત્વા રજસિ તસ્થિવાંસમપામુપસ્થે મહિષા અવર્ધન્ ॥ ૧૦.૦૪૫.૦૩
અક્રન્દદગ્નિઃ સ્તનયન્નિવ દ્યૌઃ ક્ષામા રેરિહદ્વીરુધઃ સમઞ્જન્ ।
સદ્યો જજ્ઞાનો વિ હીમિદ્ધો અખ્યદા રોદસી ભાનુના ભાત્યન્તઃ ॥ ૧૦.૦૪૫.૦૪
શ્રીણામુદારો ધરુણો રયીણાં મનીષાણાં પ્રાર્પણઃ સોમગોપાઃ ।
વસુઃ સૂનુઃ સહસો અપ્સુ રાજા વિ ભાત્યગ્ર ઉષસામિધાનઃ ॥ ૧૦.૦૪૫.૦૫
વિશ્વસ્ય કેતુર્ભુવનસ્ય ગર્ભ આ રોદસી અપૃણાજ્જાયમાનઃ ।
વીળું ચિદદ્રિમભિનત્પરાયઞ્જના યદગ્નિમયજન્ત પઞ્ચ ॥ ૧૦.૦૪૫.૦૬
ઉશિક્પાવકો અરતિઃ સુમેધા મર્તેષ્વગ્નિરમૃતો નિ ધાયિ ।
ઇયર્તિ ધૂમમરુષં ભરિભ્રદુચ્છુક્રેણ શોચિષા દ્યામિનક્ષન્ ॥ ૧૦.૦૪૫.૦૭
દૃશાનો રુક્મ ઉર્વિયા વ્યદ્યૌદ્દુર્મર્ષમાયુઃ શ્રિયે રુચાનઃ ।
અગ્નિરમૃતો અભવદ્વયોભિર્યદેનં દ્યૌર્જનયત્સુરેતાઃ ॥ ૧૦.૦૪૫.૦૮
યસ્તે અદ્ય કૃણવદ્ભદ્રશોચેઽપૂપં દેવ ઘૃતવન્તમગ્ને ।
પ્ર તં નય પ્રતરં વસ્યો અચ્છાભિ સુમ્નં દેવભક્તં યવિષ્ઠ ॥ ૧૦.૦૪૫.૦૯
આ તં ભજ સૌશ્રવસેષ્વગ્ન ઉક્થઉક્થ આ ભજ શસ્યમાને ।

પ્રિયઃ સૂર્યે પ્રિયો અગ્ના ભવાત્યુજ્જાતેન ભિનદદુજ્જનિત્વૈઃ ॥ ૧૦.૦૪૫.૧૦
ત્વામગ્ને યજમાના અનુ દ્યૂન્વિશ્વા વસુ દધિરે વાર્યાણિ ।
ત્વયા સહ દ્રવિણમિચ્છમાના વ્રજં ગોમન્તમુશિજો વિ વવ્રુઃ ॥ ૧૦.૦૪૫.૧૧
અસ્તાવ્યગ્નિર્નરાં સુશેવો વૈશ્વાનર ઋષિભિઃ સોમગોપાઃ ।
અદ્વેષે દ્યાવાપૃથિવી હુવેમ દેવા ધત્ત રયિમસ્મે સુવીરમ્ ॥ ૧૦.૦૪૫.૧૨

પ્ર હોતા જાતો મહાન્નભોવિન્નૃષદ્વા સીદદપામુપસ્થે ।
દધિર્યો ધાયિ સ તે વયાંસિ યન્તા વસૂનિ વિધતે તનૂપાઃ ॥ ૧૦.૦૪૬.૦૧
ઇમં વિધન્તો અપાં સધસ્થે પશું ન નષ્ટં પદૈરનુ ગ્મન્ ।
ગુહા ચતન્તમુશિજો નમોભિરિચ્છન્તો ધીરા ભૃગવોઽવિન્દન્ ॥ ૧૦.૦૪૬.૦૨
ઇમં ત્રિતો ભૂર્યવિન્દદિચ્છન્વૈભૂવસો મૂર્ધન્યઘ્યાયાઃ ।
સ શેવૃધો જાત આ હર્મ્યેષુ નાભિર્યુવા ભવતિ રોચનસ્ય ॥ ૧૦.૦૪૬.૦૩
મન્દ્રં હોતારમુશિજો નમોભિઃ પ્રાઞ્ચં યજ્ઞં નેતારમધ્વરાણામ્ ।
વિશામકૃણ્વન્નરતિં પાવકં હવ્યવાહં દધતો માનુષેષુ ॥ ૧૦.૦૪૬.૦૪
પ્ર ભૂર્જયન્તં મહાં વિપોધાં મૂરા અમૂરં પુરાં દર્માણમ્ ।
નયન્તો ગર્ભં વનાં ધિયં ધુર્હિરિશ્મશ્રું નાર્વાણં ધનર્ચમ્ ॥ ૧૦.૦૪૬.૦૫
નિ પસ્ત્યાસુ ત્રિતઃ સ્તભૂયન્પરિવીતો યોનૌ સીદદન્તઃ ।
અતઃ સંગૃભ્યા વિશાં દમૂના વિધર્મણાયન્ત્રૈરીયતે નૄન્ ॥ ૧૦.૦૪૬.૦૬
અસ્યાજરાસો દમામરિત્રા અર્ચદ્ધૂમાસો અગ્નયઃ પાવકાઃ ।
શ્વિતીચયઃ શ્વાત્રાસો ભુરણ્યવો વનર્ષદો વાયવો ન સોમાઃ ॥ ૧૦.૦૪૬.૦૭
પ્ર જિહ્વયા ભરતે વેપો અગ્નિઃ પ્ર વયુનાનિ ચેતસા પૃથિવ્યાઃ ।
તમાયવઃ શુચયન્તં પાવકં મન્દ્રં હોતારં દધિરે યજિષ્ઠમ્ ॥ ૧૦.૦૪૬.૦૮
દ્યાવા યમગ્નિં પૃથિવી જનિષ્ટામાપસ્ત્વષ્ટા ભૃગવો યં સહોભિઃ ।
ઈળેન્યં પ્રથમં માતરિશ્વા દેવાસ્તતક્ષુર્મનવે યજત્રમ્ ॥ ૧૦.૦૪૬.૦૯
યં ત્વા દેવા દધિરે હવ્યવાહં પુરુસ્પૃહો માનુષાસો યજત્રમ્ ।
સ યામન્નગ્ને સ્તુવતે વયો ધાઃ પ્ર દેવયન્યશસઃ સં હિ પૂર્વીઃ ॥ ૧૦.૦૪૬.૧૦

જગૃભ્મા તે દક્ષિણમિન્દ્ર હસ્તં વસૂયવો વસુપતે વસૂનામ્ ।
વિદ્મા હિ ત્વા ગોપતિં શૂર ગોનામસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૧

સ્વાયુધં સ્વવસં સુનીથં ચતુઃસમુદ્રં ધરુણં રયીણામ્ ।
ચર્કૃત્યં શંસ્યં ભૂરિવારમસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૨
સુબ્રહ્માણં દેવવન્તં બૃહન્તમુરું ગભીરં પૃથુબુધ્નમિન્દ્ર ।
શ્રુતઋષિમુગ્રમભિમાતિષાહમસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૩
સનદ્વાજં વિપ્રવીરં તરુત્રં ધનસ્પૃતં શૂશુવાંસં સુદક્ષમ્ ।
દસ્યુહનં પૂર્ભિદમિન્દ્ર સત્યમસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૪
અશ્વાવન્તં રથિનં વીરવન્તં સહસ્રિણં શતિનં વાજમિન્દ્ર ।
ભદ્રવ્રાતં વિપ્રવીરં સ્વર્ષામસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૫
પ્ર સપ્તગુમૃતધીતિં સુમેધાં બૃહસ્પતિં મતિરચ્છા જિગાતિ ।
ય આઙ્ગિરસો નમસોપસદ્યોઽસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૬
વનીવાનો મમ દૂતાસ ઇન્દ્રં સ્તોમાશ્ચરન્તિ સુમતીરિયાનાઃ ।
હૃદિસ્પૃશો મનસા વચ્યમાના અસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૭
યત્ત્વા યામિ દદ્ધિ તન્ન ઇન્દ્ર બૃહન્તં ક્ષયમસમં જનાનામ્ ।
અભિ તદ્દ્યાવાપૃથિવી ગૃણીતામસ્મભ્યં ચિત્રં વૃષણં રયિં દાઃ ॥ ૧૦.૦૪૭.૦૮
અહં ભુવં વસુનઃ પૂર્વ્યસ્પતિરહં ધનાનિ સં જયામિ શશ્વતઃ ।
માં હવન્તે પિતરં ન જન્તવોઽહં દાશુષે વિ ભજામિ ભોજનમ્ ॥ ૧૦.૦૪૮.૦૧
અહમિન્દ્રો રોધો વક્ષો અથર્વણસ્ત્રિતાય ગા અજનયમહેરધિ ।
અહં દસ્યુભ્યઃ પરિ નૃમ્ણમા દદે ગોત્રા શિક્ષન્દધીચે માતરિશ્વને ॥ ૧૦.૦૪૮.૦૨
મહ્યં ત્વષ્ટા વજ્રમતક્ષદાયસં મયિ દેવાસોઽવૃજન્નપિ ક્રતુમ્ ।
મમાનીકં સૂર્યસ્યેવ દુષ્ટરં મામાર્યન્તિ કૃતેન કર્ત્વેન ચ ॥ ૧૦.૦૪૮.૦૩
અહમેતં ગવ્યયમશ્વ્યં પશું પુરીષિણં સાયકેના હિરણ્યયમ્ ।
પુરૂ સહસ્રા નિ શિશામિ દાશુષે યન્મા સોમાસ ઉક્થિનો અમન્દિષુઃ ॥ ૧૦.૦૪૮.૦૪
અહમિન્દ્રો ન પરા જિગ્ય ઇદ્ધનં ન મૃત્યવેઽવ તસ્થે કદા ચન ।
સોમમિન્મા સુન્વન્તો યાચતા વસુ ન મે પૂરવઃ સખ્યે રિષાથન ॥ ૧૦.૦૪૮.૦૫
અહમેતાઞ્છાશ્વસતો દ્વાદ્વેન્દ્રં યે વજ્રં યુધયેઽકૃણ્વત ।
આહ્વયમાનાઁ અવ હન્મનાહનં દૃળ્હા વદન્નનમસ્યુર્નમસ્વિનઃ ॥ ૧૦.૦૪૮.૦૬
અભીઉદમેકમેકો અસ્મિ નિષ્ષાળભી દ્વા કિમુ ત્રયઃ કરન્તિ ।

ખલે ન પર્ષાન્પ્રતિ હન્મિ ભૂરિ કિં મા નિન્દન્તિ શત્રવોઽનિન્દ્રાઃ ॥ ૧૦.૦૪૮.૦૭
અહં ગુઙ્ગુભ્યો અતિથિગ્વમિષ્કરમિષં ન વૃત્રતુરં વિક્ષુ ધારયમ્ ।
યત્પર્ણયઘ્ન ઉત વા કરઞ્જહે પ્રાહં મહે વૃત્રહત્યે અશુશ્રવિ ॥ ૧૦.૦૪૮.૦૮
પ્ર મે નમી સાપ્ય ઇષે ભુજે ભૂદ્ગવામેષે સખ્યા કૃણુત દ્વિતા ।
દિદ્યું યદસ્ય સમિથેષુ મંહયમાદિદેનં શંસ્યમુક્થ્યં કરમ્ ॥ ૧૦.૦૪૮.૦૯
પ્ર નેમસ્મિન્દદૃશે સોમો અન્તર્ગોપા નેમમાવિરસ્થા કૃણોતિ ।
સ તિગ્મશૃઙ્ગં વૃષભં યુયુત્સન્દ્રુહસ્તસ્થૌ બહુલે બદ્ધો અન્તઃ ॥ ૧૦.૦૪૮.૧૦
આદિત્યાનાં વસૂનાં રુદ્રિયાણાં દેવો દેવાનાં ન મિનામિ ધામ ।
તે મા ભદ્રાય શવસે તતક્ષુરપરાજિતમસ્તૃતમષાળ્હમ્ ॥ ૧૦.૦૪૮.૧૧

અહં દાં ગૃણતે પૂર્વ્યં વસ્વહં બ્રહ્મ કૃણવં મહ્યં વર્ધનમ્ ।
અહં ભુવં યજમાનસ્ય ચોદિતાયજ્વનઃ સાક્ષિ વિશ્વસ્મિન્ભરે ॥ ૧૦.૦૪૯.૦૧
માં ધુરિન્દ્રં નામ દેવતા દિવશ્ચ ગ્મશ્ચાપાં ચ જન્તવઃ ।
અહં હરી વૃષણા વિવ્રતા રઘૂ અહં વજ્રં શવસે ધૃષ્ણ્વા દદે ॥ ૧૦.૦૪૯.૦૨
અહમત્કં કવયે શિશ્નથં હથૈરહં કુત્સમાવમાભિરૂતિભિઃ ।
અહં શુષ્ણસ્ય શ્નથિતા વધર્યમં ન યો રર આર્યં નામ દસ્યવે ॥ ૧૦.૦૪૯.૦૩
અહં પિતેવ વેતસૂઁરભિષ્ટયે તુગ્રં કુત્સાય સ્મદિભં ચ રન્ધયમ્ ।
અહં ભુવં યજમાનસ્ય રાજનિ પ્ર યદ્ભરે તુજયે ન પ્રિયાધૃષે ॥ ૧૦.૦૪૯.૦૪
અહં રન્ધયં મૃગયં શ્રુતર્વણે યન્માજિહીત વયુના ચનાનુષક્ ।
અહં વેશં નમ્રમાયવેઽકરમહં સવ્યાય પડ્ગૃભિમરન્ધયમ્ ॥ ૧૦.૦૪૯.૦૫
અહં સ યો નવવાસ્ત્વં બૃહદ્રથં સં વૃત્રેવ દાસં વૃત્રહારુજમ્ ।
યદ્વર્ધયન્તં પ્રથયન્તમાનુષગ્દૂરે પારે રજસો રોચનાકરમ્ ॥ ૧૦.૦૪૯.૦૬
અહં સૂર્યસ્ય પરિ યામ્યાશુભિઃ પ્રૈતશેભિર્વહમાન ઓજસા ।
યન્મા સાવો મનુષ આહ નિર્ણિજ ઋધક્કૃષે દાસં કૃત્વ્યં હથૈઃ ॥ ૧૦.૦૪૯.૦૭
અહં સપ્તહા નહુષો નહુષ્ટરઃ પ્રાશ્રાવયં શવસા તુર્વશં યદુમ્ ।
અહં ન્ય૧ન્યં સહસા સહસ્કરં નવ વ્રાધતો નવતિં ચ વક્ષયમ્ ॥ ૧૦.૦૪૯.૦૮
અહં સપ્ત સ્રવતો ધારયં વૃષા દ્રવિત્ન્વઃ પૃથિવ્યાં સીરા અધિ ।
અહમર્ણાંસિ વિ તિરામિ સુક્રતુર્યુધા વિદં મનવે ગાતુમિષ્ટયે ॥ ૧૦.૦૪૯.૦૯

અહં તદાસુ ધારયં યદાસુ ન દેવશ્ચન ત્વષ્ટાધારયદ્રુશત્ ।
સ્પાર્હં ગવામૂધસ્સુ વક્ષણાસ્વા મધોર્મધુ શ્વાત્ર્યં સોમમાશિરમ્ ॥ ૧૦.૦૪૯.૧૦
એવા દેવાઁ ઇન્દ્રો વિવ્યે નૄન્પ્ર ચ્યૌત્નેન મઘવા સત્યરાધાઃ ।
વિશ્વેત્તા તે હરિવઃ શચીવોઽભિ તુરાસઃ સ્વયશો ગૃણન્તિ ॥ ૧૦.૦૪૯.૧૧

પ્ર વો મહે મન્દમાનાયાન્ધસોઽર્ચા વિશ્વાનરાય વિશ્વાભુવે ।
ઇન્દ્રસ્ય યસ્ય સુમખં સહો મહિ શ્રવો નૃમ્ણં ચ રોદસી સપર્યતઃ ॥ ૧૦.૦૫૦.૦૧
સો ચિન્નુ સખ્યા નર્ય ઇનઃ સ્તુતશ્ચર્કૃત્ય ઇન્દ્રો માવતે નરે ।
વિશ્વાસુ ધૂર્ષુ વાજકૃત્યેષુ સત્પતે વૃત્રે વાપ્સ્વ૧ભિ શૂર મન્દસે ॥ ૧૦.૦૫૦.૦૨
કે તે નર ઇન્દ્ર યે ત ઇષે યે તે સુમ્નં સધન્ય૧મિયક્ષાન્ ।
કે તે વાજાયાસુર્યાય હિન્વિરે કે અપ્સુ સ્વાસૂર્વરાસુ પૌંસ્યે ॥ ૧૦.૦૫૦.૦૩
ભુવસ્ત્વમિન્દ્ર બ્રહ્મણા મહાન્ભુવો વિશ્વેષુ સવનેષુ યજ્ઞિયઃ ।
ભુવો નૄંશ્ચ્યૌત્નો વિશ્વસ્મિન્ભરે જ્યેષ્ઠશ્ચ મન્ત્રો વિશ્વચર્ષણે ॥ ૧૦.૦૫૦.૦૪
અવા નુ કં જ્યાયાન્યજ્ઞવનસો મહીં ત ઓમાત્રાં કૃષ્ટયો વિદુઃ ।
અસો નુ કમજરો વર્ધાશ્ચ વિશ્વેદેતા સવના તૂતુમા કૃષે ॥ ૧૦.૦૫૦.૦૫
એતા વિશ્વા સવના તૂતુમા કૃષે સ્વયં સૂનો સહસો યાનિ દધિષે ।
વરાય તે પાત્રં ધર્મણે તના યજ્ઞો મન્ત્રો બ્રહ્મોદ્યતં વચઃ ॥ ૧૦.૦૫૦.૦૬
યે તે વિપ્ર બ્રહ્મકૃતઃ સુતે સચા વસૂનાં ચ વસુનશ્ચ દાવને ।
પ્ર તે સુમ્નસ્ય મનસા પથા ભુવન્મદે સુતસ્ય સોમ્યસ્યાન્ધસઃ ॥ ૧૦.૦૫૦.૦૭

મહત્તદુલ્બં સ્થવિરં તદાસીદ્યેનાવિષ્ટિતઃ પ્રવિવેશિથાપઃ ।
વિશ્વા અપશ્યદ્બહુધા તે અગ્ને જાતવેદસ્તન્વો દેવ એકઃ ॥ ૧૦.૦૫૧.૦૧
કો મા દદર્શ કતમઃ સ દેવો યો મે તન્વો બહુધા પર્યપશ્યત્ ।
ક્વાહ મિત્રાવરુણા ક્ષિયન્ત્યગ્નેર્વિશ્વાઃ સમિધો દેવયાનીઃ ॥ ૧૦.૦૫૧.૦૨
ઐચ્છામ ત્વા બહુધા જાતવેદઃ પ્રવિષ્ટમગ્ને અપ્સ્વોષધીષુ ।
તં ત્વા યમો અચિકેચ્ચિત્રભાનો દશાન્તરુષ્યાદતિરોચમાનમ્ ॥ ૧૦.૦૫૧.૦૩
હોત્રાદહં વરુણ બિભ્યદાયં નેદેવ મા યુનજન્નત્ર દેવાઃ ।
તસ્ય મે તન્વો બહુધા નિવિષ્ટા એતમર્થં ન ચિકેતાહમગ્નિઃ ॥ ૧૦.૦૫૧.૦૪
એહિ મનુર્દેવયુર્યજ્ઞકામોઽરંકૃત્યા તમસિ ક્ષેષ્યગ્ને ।

સુગાન્પથઃ કૃણુહિ દેવયાનાન્વહ હવ્યાનિ સુમનસ્યમાનઃ ॥ ૧૦.૦૫૧.૦૫
અગ્નેઃ પૂર્વે ભ્રાતરો અર્થમેતં રથીવાધ્વાનમન્વાવરીવુઃ ।
તસ્માદ્ભિયા વરુણ દૂરમાયં ગૌરો ન ક્ષેપ્નોરવિજે જ્યાયાઃ ॥ ૧૦.૦૫૧.૦૬
કુર્મસ્ત આયુરજરં યદગ્ને યથા યુક્તો જાતવેદો ન રિષ્યાઃ ।
અથા વહાસિ સુમનસ્યમાનો ભાગં દેવેભ્યો હવિષઃ સુજાત ॥ ૧૦.૦૫૧.૦૭
પ્રયાજાન્મે અનુયાજાઁશ્ચ કેવલાનૂર્જસ્વન્તં હવિષો દત્ત ભાગમ્ ।
ઘૃતં ચાપાં પુરુષં ચૌષધીનામગ્નેશ્ચ દીર્ઘમાયુરસ્તુ દેવાઃ ॥ ૧૦.૦૫૧.૦૮
તવ પ્રયાજા અનુયાજાશ્ચ કેવલ ઊર્જસ્વન્તો હવિષઃ સન્તુ ભાગાઃ ।
તવાગ્ને યજ્ઞોઽયમસ્તુ સર્વસ્તુભ્યં નમન્તાં પ્રદિશશ્ચતસ્રઃ ॥ ૧૦.૦૫૧.૦૯

વિશ્વે દેવાઃ શાસ્તન મા યથેહ હોતા વૃતો મનવૈ યન્નિષદ્ય ।
પ્ર મે બ્રૂત ભાગધેયં યથા વો યેન પથા હવ્યમા વો વહાનિ ॥ ૧૦.૦૫૨.૦૧
અહં હોતા ન્યસીદં યજીયાન્વિશ્વે દેવા મરુતો મા જુનન્તિ ।
અહરહરશ્વિનાધ્વર્યવં વાં બ્રહ્મા સમિદ્ભવતિ સાહુતિર્વામ્ ॥ ૧૦.૦૫૨.૦૨
અયં યો હોતા કિરુ સ યમસ્ય કમપ્યૂહે યત્સમઞ્જન્તિ દેવાઃ ।
અહરહર્જાયતે માસિમાસ્યથા દેવા દધિરે હવ્યવાહમ્ ॥ ૧૦.૦૫૨.૦૩
માં દેવા દધિરે હવ્યવાહમપમ્લુક્તં બહુ કૃચ્છ્રા ચરન્તમ્ ।
અગ્નિર્વિદ્વાન્યજ્ઞં નઃ કલ્પયાતિ પઞ્ચયામં ત્રિવૃતં સપ્તતન્તુમ્ ॥ ૧૦.૦૫૨.૦૪
આ વો યક્ષ્યમૃતત્વં સુવીરં યથા વો દેવા વરિવઃ કરાણિ ।
આ બાહ્વોર્વજ્રમિન્દ્રસ્ય ધેયામથેમા વિશ્વાઃ પૃતના જયાતિ ॥ ૧૦.૦૫૨.૦૫
ત્રીણિ શતા ત્રી સહસ્રાણ્યગ્નિં ત્રિંશચ્ચ દેવા નવ ચાસપર્યન્ ।
ઔક્ષન્ઘૃતૈરસ્તૃણન્બર્હિરસ્મા આદિદ્ધોતારં ન્યસાદયન્ત ॥ ૧૦.૦૫૨.૦૬

યમૈચ્છામ મનસા સોઽયમાગાદ્યજ્ઞસ્ય વિદ્વાન્પરુષશ્ચિકિત્વાન્ ।
સ નો યક્ષદ્દેવતાતા યજીયાન્નિ હિ ષત્સદન્તરઃ પૂર્વો અસ્મત્ ॥ ૧૦.૦૫૩.૦૧
અરાધિ હોતા નિષદા યજીયાનભિ પ્રયાંસિ સુધિતાનિ હિ ખ્યત્ ।
યજામહૈ યજ્ઞિયાન્હન્ત દેવાઁ ઈળામહા ઈડ્યાઁ આજ્યેન ॥ ૧૦.૦૫૩.૦૨
સાધ્વીમકર્દેવવીતિં નો અદ્ય યજ્ઞસ્ય જિહ્વામવિદામ ગુહ્યામ્ ।
સ આયુરાગાત્સુરભિર્વસાનો ભદ્રામકર્દેવહૂતિં નો અદ્ય ॥ ૧૦.૦૫૩.૦૩

તદદ્ય વાચઃ પ્રથમં મસીય યેનાસુરાઁ અભિ દેવા અસામ ।
ઊર્જાદ ઉત યજ્ઞિયાસઃ પઞ્ચ જના મમ હોત્રં જુષધ્વમ્ ॥ ૧૦.૦૫૩.૦૪
પઞ્ચ જના મમ હોત્રં જુષન્તાં ગોજાતા ઉત યે યજ્ઞિયાસઃ ।
પૃથિવી નઃ પાર્થિવાત્પાત્વંહસોઽન્તરિક્ષં દિવ્યાત્પાત્વસ્માન્ ॥ ૧૦.૦૫૩.૦૫
તન્તું તન્વન્રજસો ભાનુમન્વિહિ જ્યોતિષ્મતઃ પથો રક્ષ ધિયા કૃતાન્ ।
અનુલ્બણં વયત જોગુવામપો મનુર્ભવ જનયા દૈવ્યં જનમ્ ॥ ૧૦.૦૫૩.૦૬
અક્ષાનહો નહ્યતનોત સોમ્યા ઇષ્કૃણુધ્વં રશના ઓત પિંશત ।
અષ્ટાવન્ધુરં વહતાભિતો રથં યેન દેવાસો અનયન્નભિ પ્રિયમ્ ॥ ૧૦.૦૫૩.૦૭
અશ્મન્વતી રીયતે સં રભધ્વમુત્તિષ્ઠત પ્ર તરતા સખાયઃ ।
અત્રા જહામ યે અસન્નશેવાઃ શિવાન્વયમુત્તરેમાભિ વાજાન્ ॥ ૧૦.૦૫૩.૦૮
ત્વષ્ટા માયા વેદપસામપસ્તમો બિભ્રત્પાત્રા દેવપાનાનિ શંતમા ।
શિશીતે નૂનં પરશું સ્વાયસં યેન વૃશ્ચાદેતશો બ્રહ્મણસ્પતિઃ ॥ ૧૦.૦૫૩.૦૯
સતો નૂનં કવયઃ સં શિશીત વાશીભિર્યાભિરમૃતાય તક્ષથ ।
વિદ્વાંસઃ પદા ગુહ્યાનિ કર્તન યેન દેવાસો અમૃતત્વમાનશુઃ ॥ ૧૦.૦૫૩.૧૦
ગર્ભે યોષામદધુર્વત્સમાસન્યપીચ્યેન મનસોત જિહ્વયા ।
સ વિશ્વાહા સુમના યોગ્યા અભિ સિષાસનિર્વનતે કાર ઇજ્જિતિમ્ ॥ ૧૦.૦૫૩.૧૧

તાં સુ તે કીર્તિં મઘવન્મહિત્વા યત્ત્વા ભીતે રોદસી અહ્વયેતામ્ ।
પ્રાવો દેવાઁ આતિરો દાસમોજઃ પ્રજાયૈ ત્વસ્યૈ યદશિક્ષ ઇન્દ્ર ॥ ૧૦.૦૫૪.૦૧
યદચરસ્તન્વા વાવૃધાનો બલાનીન્દ્ર પ્રબ્રુવાણો જનેષુ ।
માયેત્સા તે યાનિ યુદ્ધાન્યાહુર્નાદ્ય શત્રું નનુ પુરા વિવિત્સે ॥ ૧૦.૦૫૪.૦૨
ક ઉ નુ તે મહિમનઃ સમસ્યાસ્મત્પૂર્વ ઋષયોઽન્તમાપુઃ ।
યન્માતરં ચ પિતરં ચ સાકમજનયથાસ્તન્વ૧ઃ સ્વાયાઃ ॥ ૧૦.૦૫૪.૦૩
ચત્વારિ તે અસુર્યાણિ નામાદાભ્યાનિ મહિષસ્ય સન્તિ ।
ત્વમઙ્ગ તાનિ વિશ્વાનિ વિત્સે યેભિઃ કર્માણિ મઘવઞ્ચકર્થ ॥ ૧૦.૦૫૪.૦૪
ત્વં વિશ્વા દધિષે કેવલાનિ યાન્યાવિર્યા ચ ગુહા વસૂનિ ।
કામમિન્મે મઘવન્મા વિ તારીસ્ત્વમાજ્ઞાતા ત્વમિન્દ્રાસિ દાતા ॥ ૧૦.૦૫૪.૦૫
યો અદધાજ્જ્યોતિષિ જ્યોતિરન્તર્યો અસૃજન્મધુના સં મધૂનિ ।

અધ પ્રિયં શૂષમિન્દ્રાય મન્મ બ્રહ્મકૃતો બૃહદુક્થાદવાચિ ॥ ૧૦.૦૫૪.૦૬

દૂરે તન્નામ ગુહ્યં પરાચૈર્યત્ત્વા ભીતે અહ્વયેતાં વયોધૈ ।
ઉદસ્તભ્નાઃ પૃથિવીં દ્યામભીકે ભ્રાતુઃ પુત્રાન્મઘવન્તિત્વિષાણઃ ॥ ૧૦.૦૫૫.૦૧
મહત્તન્નામ ગુહ્યં પુરુસ્પૃગ્યેન ભૂતં જનયો યેન ભવ્યમ્ ।
પ્રત્નં જાતં જ્યોતિર્યદસ્ય પ્રિયં પ્રિયાઃ સમવિશન્ત પઞ્ચ ॥ ૧૦.૦૫૫.૦૨
આ રોદસી અપૃણાદોત મધ્યં પઞ્ચ દેવાઁ ઋતુશઃ સપ્તસપ્ત ।
ચતુસ્ત્રિંશતા પુરુધા વિ ચષ્ટે સરૂપેણ જ્યોતિષા વિવ્રતેન ॥ ૧૦.૦૫૫.૦૩
યદુષ ઔચ્છઃ પ્રથમા વિભાનામજનયો યેન પુષ્ટસ્ય પુષ્ટમ્ ।
યત્તે જામિત્વમવરં પરસ્યા મહન્મહત્યા અસુરત્વમેકમ્ ॥ ૧૦.૦૫૫.૦૪
વિધું દદ્રાણં સમને બહૂનાં યુવાનં સન્તં પલિતો જગાર ।
દેવસ્ય પશ્ય કાવ્યં મહિત્વાદ્યા મમાર સ હ્યઃ સમાન ॥ ૧૦.૦૫૫.૦૫
શાક્મના શાકો અરુણઃ સુપર્ણ આ યો મહઃ શૂરઃ સનાદનીળઃ ।
યચ્ચિકેત સત્યમિત્તન્ન મોઘં વસુ સ્પાર્હમુત જેતોત દાતા ॥ ૧૦.૦૫૫.૦૬
ઐભિર્દદે વૃષ્ણ્યા પૌંસ્યાનિ યેભિરૌક્ષદ્વૃત્રહત્યાય વજ્રી ।
યે કર્મણઃ ક્રિયમાણસ્ય મહ્ન ઋતેકર્મમુદજાયન્ત દેવાઃ ॥ ૧૦.૦૫૫.૦૭
યુજા કર્માણિ જનયન્વિશ્વૌજા અશસ્તિહા વિશ્વમનાસ્તુરાષાટ્ ।
પીત્વી સોમસ્ય દિવ આ વૃધાનઃ શૂરો નિર્યુધાધમદ્દસ્યૂન્ ॥ ૧૦.૦૫૫.૦૮

ઇદં ત એકં પર ઊ ત એકં તૃતીયેન જ્યોતિષા સં વિશસ્વ ।
સંવેશને તન્વ૧શ્ચારુરેધિ પ્રિયો દેવાનાં પરમે જનિત્રે ॥ ૧૦.૦૫૬.૦૧
તનૂષ્ટે વાજિન્તન્વં૧ નયન્તી વામમસ્મભ્યં ધાતુ શર્મ તુભ્યમ્ ।
અહ્રુતો મહો ધરુણાય દેવાન્દિવીવ જ્યોતિઃ સ્વમા મિમીયાઃ ॥ ૧૦.૦૫૬.૦૨
વાજ્યસિ વાજિનેના સુવેનીઃ સુવિતઃ સ્તોમં સુવિતો દિવં ગાઃ ।
સુવિતો ધર્મ પ્રથમાનુ સત્યા સુવિતો દેવાન્સુવિતોઽનુ પત્મ ॥ ૧૦.૦૫૬.૦૩
મહિમ્ન એષાં પિતરશ્ચનેશિરે દેવા દેવેષ્વદધુરપિ ક્રતુમ્ ।
સમવિવ્યચુરુત યાન્યત્વિષુરૈષાં તનૂષુ નિ વિવિશુઃ પુનઃ ॥ ૧૦.૦૫૬.૦૪
સહોભિર્વિશ્વં પરિ ચક્રમૂ રજઃ પૂર્વા ધામાન્યમિતા મિમાનાઃ ।
તનૂષુ વિશ્વા ભુવના નિ યેમિરે પ્રાસારયન્ત પુરુધ પ્રજા અનુ ॥ ૧૦.૦૫૬.૦૫

દ્વિધા સૂનવોઽસુરં સ્વર્વિદમાસ્થાપયન્ત તૃતીયેન કર્મણા ।
સ્વાં પ્રજાં પિતરઃ પિત્ર્યં સહ આવરેષ્વદધુસ્તન્તુમાતતમ્ ॥ ૧૦.૦૫૬.૦૬
નાવા ન ક્ષોદઃ પ્રદિશઃ પૃથિવ્યાઃ સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા ।
સ્વાં પ્રજાં બૃહદુક્થો મહિત્વાવરેષ્વદધાદા પરેષુ ॥ ૧૦.૦૫૬.૦૭
મા પ્ર ગામ પથો વયં મા યજ્ઞાદિન્દ્ર સોમિનઃ ।
માન્તઃ સ્થુર્નો અરાતયઃ ॥ ૧૦.૦૫૭.૦૧
યો યજ્ઞસ્ય પ્રસાધનસ્તન્તુર્દેવેષ્વાતતઃ ।
તમાહુતં નશીમહિ ॥ ૧૦.૦૫૭.૦૨
મનો ન્વા હુવામહે નારાશંસેન સોમેન ।
પિતૄણાં ચ મન્મભિઃ ॥ ૧૦.૦૫૭.૦૩
આ ત એતુ મનઃ પુનઃ ક્રત્વે દક્ષાય જીવસે ।
જ્યોક્ચ સૂર્યં દૃશે ॥ ૧૦.૦૫૭.૦૪
પુનર્નઃ પિતરો મનો દદાતુ દૈવ્યો જનઃ ।
જીવં વ્રાતં સચેમહિ ॥ ૧૦.૦૫૭.૦૫
વયં સોમ વ્રતે તવ મનસ્તનૂષુ બિભ્રતઃ ।
પ્રજાવન્તઃ સચેમહિ ॥ ૧૦.૦૫૭.૦૬
યત્તે યમં વૈવસ્વતં મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૧
યત્તે દિવં યત્પૃથિવીં મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૨
યત્તે ભૂમિં ચતુર્ભૃષ્ટિં મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૩
યત્તે ચતસ્રઃ પ્રદિશો મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૪
યત્તે સમુદ્રમર્ણવં મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૫
યત્તે મરીચીઃ પ્રવતો મનો જગામ દૂરકમ્ ।

તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૬
યત્તે અપો યદોષધીર્મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૭
યત્તે સૂર્યં યદુષસં મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૮
યત્તે પર્વતાન્બૃહતો મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૦૯
યત્તે વિશ્વમિદં જગન્મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૧૦
યત્તે પરાઃ પરાવતો મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૧૧
યત્તે ભૂતં ચ ભવ્યં ચ મનો જગામ દૂરકમ્ ।
તત્ત આ વર્તયામસીહ ક્ષયાય જીવસે ॥ ૧૦.૦૫૮.૧૨

પ્ર તાર્યાયુઃ પ્રતરં નવીયઃ સ્થાતારેવ ક્રતુમતા રથસ્ય ।
અધ ચ્યવાન ઉત્તવીત્યર્થં પરાતરં સુ નિરૃતિર્જિહીતામ્ ॥ ૧૦.૦૫૯.૦૧
સામન્નુ રાયે નિધિમન્ન્વન્નં કરામહે સુ પુરુધ શ્રવાંસિ ।
તા નો વિશ્વાનિ જરિતા મમત્તુ પરાતરં સુ નિરૃતિર્જિહીતામ્ ॥ ૧૦.૦૫૯.૦૨
અભી ષ્વર્યઃ પૌંસ્યૈર્ભવેમ દ્યૌર્ન ભૂમિં ગિરયો નાજ્રાન્ ।
તા નો વિશ્વાનિ જરિતા ચિકેત પરાતરં સુ નિરૃતિર્જિહીતામ્ ॥ ૧૦.૦૫૯.૦૩
મો ષુ ણઃ સોમ મૃત્યવે પરા દાઃ પશ્યેમ નુ સૂર્યમુચ્ચરન્તમ્ ।
દ્યુભિર્હિતો જરિમા સૂ નો અસ્તુ પરાતરં સુ નિરૃતિર્જિહીતામ્ ॥ ૧૦.૦૫૯.૦૪
અસુનીતે મનો અસ્માસુ ધારય જીવાતવે સુ પ્ર તિરા ન આયુઃ ।
રારન્ધિ નઃ સૂર્યસ્ય સંદૃશિ ઘૃતેન ત્વં તન્વં વર્ધયસ્વ ॥ ૧૦.૦૫૯.૦૫
અસુનીતે પુનરસ્માસુ ચક્ષુઃ પુનઃ પ્રાણમિહ નો ધેહિ ભોગમ્ ।
જ્યોક્પશ્યેમ સૂર્યમુચ્ચરન્તમનુમતે મૃળયા નઃ સ્વસ્તિ ॥ ૧૦.૦૫૯.૦૬
પુનર્નો અસું પૃથિવી દદાતુ પુનર્દ્યૌર્દેવી પુનરન્તરિક્ષમ્ ।
પુનર્નઃ સોમસ્તન્વં દદાતુ પુનઃ પૂષા પથ્યાં૩ યા સ્વસ્તિઃ ॥ ૧૦.૦૫૯.૦૭

શં રોદસી સુબન્ધવે યહ્વી ઋતસ્ય માતરા ।
ભરતામપ યદ્રપો દ્યૌઃ પૃથિવિ ક્ષમા રપો મો ષુ તે કિં ચનામમત્ ॥ ૧૦.૦૫૯.૦૮
અવ દ્વકે અવ ત્રિકા દિવશ્ચરન્તિ ભેષજા ।
ક્ષમા ચરિષ્ણ્વેકકં ભરતામપ યદ્રપો દ્યૌઃ પૃથિવિ ક્ષમા રપો મો ષુ તે કિં ચનામમત્ ॥ ૧૦.૦૫૯.૦૯
સમિન્દ્રેરય ગામનડ્વાહં ય આવહદુશીનરાણ્યા અનઃ ।
ભરતામપ યદ્રપો દ્યૌઃ પૃથિવિ ક્ષમા રપો મો ષુ તે કિં ચનામમત્ ॥ ૧૦.૦૫૯.૧૦
આ જનં ત્વેષસંદૃશં માહીનાનામુપસ્તુતમ્ ।
અગન્મ બિભ્રતો નમઃ ॥ ૧૦.૦૬૦.૦૧
અસમાતિં નિતોશનં ત્વેષં નિયયિનં રથમ્ ।
ભજેરથસ્ય સત્પતિમ્ ॥ ૧૦.૦૬૦.૦૨
યો જનાન્મહિષાઁ ઇવાતિતસ્થૌ પવીરવાન્ ।
ઉતાપવીરવાન્યુધા ॥ ૧૦.૦૬૦.૦૩
યસ્યેક્ષ્વાકુરુપ વ્રતે રેવાન્મરાય્યેધતે ।
દિવીવ પઞ્ચ કૃષ્ટયઃ ॥ ૧૦.૦૬૦.૦૪
ઇન્દ્ર ક્ષત્રાસમાતિષુ રથપ્રોષ્ઠેષુ ધારય ।
દિવીવ સૂર્યં દૃશે ॥ ૧૦.૦૬૦.૦૫
અગસ્ત્યસ્ય નદ્ભ્યઃ સપ્તી યુનક્ષિ રોહિતા ।
પણીન્ન્યક્રમીરભિ વિશ્વાન્રાજન્નરાધસઃ ॥ ૧૦.૦૬૦.૦૬
અયં માતાયં પિતાયં જીવાતુરાગમત્ ।
ઇદં તવ પ્રસર્પણં સુબન્ધવેહિ નિરિહિ ॥ ૧૦.૦૬૦.૦૭
યથા યુગં વરત્રયા નહ્યન્તિ ધરુણાય કમ્ ।
એવા દાધાર તે મનો જીવાતવે ન મૃત્યવેઽથો અરિષ્ટતાતયે ॥ ૧૦.૦૬૦.૦૮
યથેયં પૃથિવી મહી દાધારેમાન્વનસ્પતીન્ ।
એવા દાધાર તે મનો જીવાતવે ન મૃત્યવેઽથો અરિષ્ટતાતયે ॥ ૧૦.૦૬૦.૦૯
યમાદહં વૈવસ્વતાત્સુબન્ધોર્મન આભરમ્ ।
જીવાતવે ન મૃત્યવેઽથો અરિષ્ટતાતયે ॥ ૧૦.૦૬૦.૧૦
ન્યગ્વાતોઽવ વાતિ ન્યક્તપતિ સૂર્યઃ ।

નીચીનમઘ્યા દુહે ન્યગ્ભવતુ તે રપઃ ॥ ૧૦.૦૬૦.૧૧
અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૦૬૦.૧૨

ઇદમિત્થા રૌદ્રં ગૂર્તવચા બ્રહ્મ ક્રત્વા શચ્યામન્તરાજૌ ।
ક્રાણા યદસ્ય પિતરા મંહનેષ્ઠાઃ પર્ષત્પક્થે અહન્ના સપ્ત હોતૄન્ ॥ ૧૦.૦૬૧.૦૧
સ ઇદ્દાનાય દભ્યાય વન્વઞ્ચ્યવાનઃ સૂદૈરમિમીત વેદિમ્ ।
તૂર્વયાણો ગૂર્તવચસ્તમઃ ક્ષોદો ન રેત ઇતઊતિ સિઞ્ચત્ ॥ ૧૦.૦૬૧.૦૨
મનો ન યેષુ હવનેષુ તિગ્મં વિપઃ શચ્યા વનુથો દ્રવન્તા ।
આ યઃ શર્યાભિસ્તુવિનૃમ્ણો અસ્યાશ્રીણીતાદિશં ગભસ્તૌ ॥ ૧૦.૦૬૧.૦૩
કૃષ્ણા યદ્ગોષ્વરુણીષુ સીદદ્દિવો નપાતાશ્વિના હુવે વામ્ ।
વીતં મે યજ્ઞમા ગતં મે અન્નં વવન્વાંસા નેષમસ્મૃતધ્રૂ ॥ ૧૦.૦૬૧.૦૪
પ્રથિષ્ટ યસ્ય વીરકર્મમિષ્ણદનુષ્ઠિતં નુ નર્યો અપૌહત્ ।
પુનસ્તદા વૃહતિ યત્કનાયા દુહિતુરા અનુભૃતમનર્વા ॥ ૧૦.૦૬૧.૦૫
મધ્યા યત્કર્ત્વમભવદભીકે કામં કૃણ્વાને પિતરિ યુવત્યામ્ ।
મનાનગ્રેતો જહતુર્વિયન્તા સાનૌ નિષિક્તં સુકૃતસ્ય યોનૌ ॥ ૧૦.૦૬૧.૦૬
પિતા યત્સ્વાં દુહિતરમધિષ્કન્ક્ષ્મયા રેતઃ સંજગ્માનો નિ ષિઞ્ચત્ ।
સ્વાધ્યોઽજનયન્બ્રહ્મ દેવા વાસ્તોષ્પતિં વ્રતપાં નિરતક્ષન્ ॥ ૧૦.૦૬૧.૦૭
સ ઈં વૃષા ન ફેનમસ્યદાજૌ સ્મદા પરૈદપ દભ્રચેતાઃ ।
સરત્પદા ન દક્ષિણા પરાવૃઙ્ન તા નુ મે પૃશન્યો જગૃભ્રે ॥ ૧૦.૦૬૧.૦૮
મક્ષૂ ન વહ્નિઃ પ્રજાયા ઉપબ્દિરગ્નિં ન નગ્ન ઉપ સીદદૂધઃ ।
સનિતેધ્મં સનિતોત વાજં સ ધર્તા જજ્ઞે સહસા યવીયુત્ ॥ ૧૦.૦૬૧.૦૯
મક્ષૂ કનાયાઃ સખ્યં નવગ્વા ઋતં વદન્ત ઋતયુક્તિમગ્મન્ ।
દ્વિબર્હસો ય ઉપ ગોપમાગુરદક્ષિણાસો અચ્યુતા દુદુક્ષન્ ॥ ૧૦.૦૬૧.૧૦
મક્ષૂ કનાયાઃ સખ્યં નવીયો રાધો ન રેત ઋતમિત્તુરણ્યન્ ।
શુચિ યત્તે રેક્ણ આયજન્ત સબર્દુઘાયાઃ પય ઉસ્રિયાયાઃ ॥ ૧૦.૦૬૧.૧૧
પશ્વા યત્પશ્ચા વિયુતા બુધન્તેતિ બ્રવીતિ વક્તરી રરાણઃ ।
વસોર્વસુત્વા કારવોઽનેહા વિશ્વં વિવેષ્ટિ દ્રવિણમુપ ક્ષુ ॥ ૧૦.૦૬૧.૧૨

તદિન્ન્વસ્ય પરિષદ્વાનો અગ્મન્પુરૂ સદન્તો નાર્ષદં બિભિત્સન્ ।
વિ શુષ્ણસ્ય સંગ્રથિતમનર્વા વિદત્પુરુપ્રજાતસ્ય ગુહા યત્ ॥ ૧૦.૦૬૧.૧૩
ભર્ગો હ નામોત યસ્ય દેવાઃ સ્વ૧ર્ણ યે ત્રિષધસ્થે નિષેદુઃ ।
અગ્નિર્હ નામોત જાતવેદાઃ શ્રુધી નો હોતરૃતસ્ય હોતાધ્રુક્ ॥ ૧૦.૦૬૧.૧૪
ઉત ત્યા મે રૌદ્રાવર્ચિમન્તા નાસત્યાવિન્દ્ર ગૂર્તયે યજધ્યૈ ।
મનુષ્વદ્વૃક્તબર્હિષે રરાણા મન્દૂ હિતપ્રયસા વિક્ષુ યજ્યૂ ॥ ૧૦.૦૬૧.૧૫
અયં સ્તુતો રાજા વન્દિ વેધા અપશ્ચ વિપ્રસ્તરતિ સ્વસેતુઃ ।
સ કક્ષીવન્તં રેજયત્સો અગ્નિં નેમિં ન ચક્રમર્વતો રઘુદ્રુ ॥ ૧૦.૦૬૧.૧૬
સ દ્વિબન્ધુર્વૈતરણો યષ્ટા સબર્ધું ધેનુમસ્વં દુહધ્યૈ ।
સં યન્મિત્રાવરુણા વૃઞ્જ ઉક્થૈર્જ્યેષ્ઠેભિરર્યમણં વરૂથૈઃ ॥ ૧૦.૦૬૧.૧૭
તદ્બન્ધુઃ સૂરિર્દિવિ તે ધિયંધા નાભાનેદિષ્ઠો રપતિ પ્ર વેનન્ ।
સા નો નાભિઃ પરમાસ્ય વા ઘાહં તત્પશ્ચા કતિથશ્ચિદાસ ॥ ૧૦.૦૬૧.૧૮
ઇયં મે નાભિરિહ મે સધસ્થમિમે મે દેવા અયમસ્મિ સર્વઃ ।
દ્વિજા અહ પ્રથમજા ઋતસ્યેદં ધેનુરદુહજ્જાયમાના ॥ ૧૦.૦૬૧.૧૯
અધાસુ મન્દ્રો અરતિર્વિભાવાવ સ્યતિ દ્વિવર્તનિર્વનેષાટ્ ।
ઊર્ધ્વા યચ્છ્રેણિર્ન શિશુર્દન્મક્ષૂ સ્થિરં શેવૃધં સૂત માતા ॥ ૧૦.૦૬૧.૨૦
અધા ગાવ ઉપમાતિં કનાયા અનુ શ્વાન્તસ્ય કસ્ય ચિત્પરેયુઃ ।
શ્રુધિ ત્વં સુદ્રવિણો નસ્ત્વં યાળાશ્વઘ્નસ્ય વાવૃધે સૂનૃતાભિઃ ॥ ૧૦.૦૬૧.૨૧
અધ ત્વમિન્દ્ર વિદ્ધ્ય૧સ્માન્મહો રાયે નૃપતે વજ્રબાહુઃ ।
રક્ષા ચ નો મઘોનઃ પાહિ સૂરીનનેહસસ્તે હરિવો અભિષ્ટૌ ॥ ૧૦.૦૬૧.૨૨
અધ યદ્રાજાના ગવિષ્ટૌ સરત્સરણ્યુઃ કારવે જરણ્યુઃ ।
વિપ્રઃ પ્રેષ્ઠઃ સ હ્યેષાં બભૂવ પરા ચ વક્ષદુત પર્ષદેનાન્ ॥ ૧૦.૦૬૧.૨૩
અધા ન્વસ્ય જેન્યસ્ય પુષ્ટૌ વૃથા રેભન્ત ઈમહે તદૂ નુ ।
સરણ્યુરસ્ય સૂનુરશ્વો વિપ્રશ્ચાસિ શ્રવસશ્ચ સાતૌ ॥ ૧૦.૦૬૧.૨૪
યુવોર્યદિ સખ્યાયાસ્મે શર્ધાય સ્તોમં જુજુષે નમસ્વાન્ ।
વિશ્વત્ર યસ્મિન્ના ગિરઃ સમીચીઃ પૂર્વીવ ગાતુર્દાશત્સૂનૃતાયૈ ॥ ૧૦.૦૬૧.૨૫
સ ગૃણાનો અદ્ભિર્દેવવાનિતિ સુબન્ધુર્નમસા સૂક્તૈઃ ।

વર્ધદુક્થૈર્વચોભિરા હિ નૂનં વ્યધ્વૈતિ પયસ ઉસ્રિયાયાઃ ॥ ૧૦.૦૬૧.૨૬
ત ઊ ષુ ણો મહો યજત્રા ભૂત દેવાસ ઊતયે સજોષાઃ ।
યે વાજાઁ અનયતા વિયન્તો યે સ્થા નિચેતારો અમૂરાઃ ॥ ૧૦.૦૬૧.૨૭

યે યજ્ઞેન દક્ષિણયા સમક્તા ઇન્દ્રસ્ય સખ્યમમૃતત્વમાનશ ।
તેભ્યો ભદ્રમઙ્ગિરસો વો અસ્તુ પ્રતિ ગૃભ્ણીત માનવં સુમેધસઃ ॥ ૧૦.૦૬૨.૦૧
ય ઉદાજન્પિતરો ગોમયં વસ્વૃતેનાભિન્દન્પરિવત્સરે વલમ્ ।
દીર્ઘાયુત્વમઙ્ગિરસો વો અસ્તુ પ્રતિ ગૃભ્ણીત માનવં સુમેધસઃ ॥ ૧૦.૦૬૨.૦૨
ય ઋતેન સૂર્યમારોહયન્દિવ્યપ્રથયન્પૃથિવીં માતરં વિ ।
સુપ્રજાસ્ત્વમઙ્ગિરસો વો અસ્તુ પ્રતિ ગૃભ્ણીત માનવં સુમેધસઃ ॥ ૧૦.૦૬૨.૦૩
અયં નાભા વદતિ વલ્ગુ વો ગૃહે દેવપુત્રા ઋષયસ્તચ્છૃણોતન ।
સુબ્રહ્મણ્યમઙ્ગિરસો વો અસ્તુ પ્રતિ ગૃભ્ણીત માનવં સુમેધસઃ ॥ ૧૦.૦૬૨.૦૪
વિરૂપાસ ઇદૃષયસ્ત ઇદ્ગમ્ભીરવેપસઃ ।
તે અઙ્ગિરસઃ સૂનવસ્તે અગ્નેઃ પરિ જજ્ઞિરે ॥ ૧૦.૦૬૨.૦૫
યે અગ્નેઃ પરિ જજ્ઞિરે વિરૂપાસો દિવસ્પરિ ।
નવગ્વો નુ દશગ્વો અઙ્ગિરસ્તમો સચા દેવેષુ મંહતે ॥ ૧૦.૦૬૨.૦૬
ઇન્દ્રેણ યુજા નિઃ સૃજન્ત વાઘતો વ્રજં ગોમન્તમશ્વિનમ્ ।
સહસ્રં મે દદતો અષ્ટકર્ણ્યઃ શ્રવો દેવેષ્વક્રત ॥ ૧૦.૦૬૨.૦૭
પ્ર નૂનં જાયતામયં મનુસ્તોક્મેવ રોહતુ ।
યઃ સહસ્રં શતાશ્વં સદ્યો દાનાય મંહતે ॥ ૧૦.૦૬૨.૦૮
ન તમશ્નોતિ કશ્ચન દિવ ઇવ સાન્વારભમ્ ।
સાવર્ણ્યસ્ય દક્ષિણા વિ સિન્ધુરિવ પપ્રથે ॥ ૧૦.૦૬૨.૦૯
ઉત દાસા પરિવિષે સ્મદ્દિષ્ટી ગોપરીણસા ।
યદુસ્તુર્વશ્ચ મામહે ॥ ૧૦.૦૬૨.૧૦
સહસ્રદા ગ્રામણીર્મા રિષન્મનુઃ સૂર્યેણાસ્ય યતમાનૈતુ દક્ષિણા ।
સાવર્ણેર્દેવાઃ પ્ર તિરન્ત્વાયુર્યસ્મિન્નશ્રાન્તા અસનામ વાજમ્ ॥ ૧૦.૦૬૨.૧૧

પરાવતો યે દિધિષન્ત આપ્યં મનુપ્રીતાસો જનિમા વિવસ્વતઃ ।
યયાતેર્યે નહુષ્યસ્ય બર્હિષિ દેવા આસતે તે અધિ બ્રુવન્તુ નઃ ॥ ૧૦.૦૬૩.૦૧

વિશ્વા હિ વો નમસ્યાનિ વન્દ્યા નામાનિ દેવા ઉત યજ્ઞિયાનિ વઃ ।
યે સ્થ જાતા અદિતેરદ્ભ્યસ્પરિ યે પૃથિવ્યાસ્તે મ ઇહ શ્રુતા હવમ્ ॥ ૧૦.૦૬૩.૦૨
યેભ્યો માતા મધુમત્પિન્વતે પયઃ પીયૂષં દ્યૌરદિતિરદ્રિબર્હાઃ ।
ઉક્થશુષ્માન્વૃષભરાન્સ્વપ્નસસ્તાઁ આદિત્યાઁ અનુ મદા સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૩
નૃચક્ષસો અનિમિષન્તો અર્હણા બૃહદ્દેવાસો અમૃતત્વમાનશુઃ ।
જ્યોતીરથા અહિમાયા અનાગસો દિવો વર્ષ્માણં વસતે સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૪
સમ્રાજો યે સુવૃધો યજ્ઞમાયયુરપરિહ્વૃતા દધિરે દિવિ ક્ષયમ્ ।
તાઁ આ વિવાસ નમસા સુવૃક્તિભિર્મહો આદિત્યાઁ અદિતિં સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૫
કો વઃ સ્તોમં રાધતિ યં જુજોષથ વિશ્વે દેવાસો મનુષો યતિ ષ્ઠન ।
કો વોઽધ્વરં તુવિજાતા અરં કરદ્યો નઃ પર્ષદત્યંહઃ સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૬
યેભ્યો હોત્રાં પ્રથમામાયેજે મનુઃ સમિદ્ધાગ્નિર્મનસા સપ્ત હોતૃભિઃ ।
ત આદિત્યા અભયં શર્મ યચ્છત સુગા નઃ કર્ત સુપથા સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૭
ય ઈશિરે ભુવનસ્ય પ્રચેતસો વિશ્વસ્ય સ્થાતુર્જગતશ્ચ મન્તવઃ ।
તે નઃ કૃતાદકૃતાદેનસસ્પર્યદ્યા દેવાસઃ પિપૃતા સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૮
ભરેષ્વિન્દ્રં સુહવં હવામહેંઽહોમુચં સુકૃતં દૈવ્યં જનમ્ ।
અગ્નિં મિત્રં વરુણં સાતયે ભગં દ્યાવાપૃથિવી મરુતઃ સ્વસ્તયે ॥ ૧૦.૦૬૩.૦૯
સુત્રામાણં પૃથિવીં દ્યામનેહસં સુશર્માણમદિતિં સુપ્રણીતિમ્ ।
દૈવીં નાવં સ્વરિત્રામનાગસમસ્રવન્તીમા રુહેમા સ્વસ્તયે ॥ ૧૦.૦૬૩.૧૦
વિશ્વે યજત્રા અધિ વોચતોતયે ત્રાયધ્વં નો દુરેવાયા અભિહ્રુતઃ ।
સત્યયા વો દેવહૂત્યા હુવેમ શ◌ૃણ્વતો દેવા અવસે સ્વસ્તયે ॥ ૧૦.૦૬૩.૧૧
અપામીવામપ વિશ્વામનાહુતિમપારાતિં દુર્વિદત્રામઘાયતઃ ।
આરે દેવા દ્વેષો અસ્મદ્યુયોતનોરુ ણઃ શર્મ યચ્છતા સ્વસ્તયે ॥ ૧૦.૦૬૩.૧૨
અરિષ્ટઃ સ મર્તો વિશ્વ એધતે પ્ર પ્રજાભિર્જાયતે ધર્મણસ્પરિ ।
યમાદિત્યાસો નયથા સુનીતિભિરતિ વિશ્વાનિ દુરિતા સ્વસ્તયે ॥ ૧૦.૦૬૩.૧૩
યં દેવાસોઽવથ વાજસાતૌ યં શૂરસાતા મરુતો હિતે ધને ।
પ્રાતર્યાવાણં રથમિન્દ્ર સાનસિમરિષ્યન્તમા રુહેમા સ્વસ્તયે ॥ ૧૦.૦૬૩.૧૪
સ્વસ્તિ નઃ પથ્યાસુ ધન્વસુ સ્વસ્ત્ય૧પ્સુ વૃજને સ્વર્વતિ ।

સ્વસ્તિ નઃ પુત્રકૃથેષુ યોનિષુ સ્વસ્તિ રાયે મરુતો દધાતન ॥ ૧૦.૦૬૩.૧૫
સ્વસ્તિરિદ્ધિ પ્રપથે શ્રેષ્ઠા રેક્ણસ્વત્યભિ યા વામમેતિ ।
સા નો અમા સો અરણે નિ પાતુ સ્વાવેશા ભવતુ દેવગોપા ॥ ૧૦.૦૬૩.૧૬
એવા પ્લતેઃ સૂનુરવીવૃધદ્વો વિશ્વ આદિત્યા અદિતે મનીષી ।
ઈશાનાસો નરો અમર્ત્યેનાસ્તાવિ જનો દિવ્યો ગયેન ॥ ૧૦.૦૬૩.૧૭
કથા દેવાનાં કતમસ્ય યામનિ સુમન્તુ નામ શૃણ્વતાં મનામહે ।
કો મૃળાતિ કતમો નો મયસ્કરત્કતમ ઊતી અભ્યા વવર્તતિ ॥ ૧૦.૦૬૪.૦૧
ક્રતૂયન્તિ ક્રતવો હૃત્સુ ધીતયો વેનન્તિ વેનાઃ પતયન્ત્યા દિશઃ ।
ન મર્ડિતા વિદ્યતે અન્ય એભ્યો દેવેષુ મે અધિ કામા અયંસત ॥ ૧૦.૦૬૪.૦૨
નરા વા શંસં પૂષણમગોહ્યમગ્નિં દેવેદ્ધમભ્યર્ચસે ગિરા ।
સૂર્યામાસા ચન્દ્રમસા યમં દિવિ ત્રિતં વાતમુષસમક્તુમશ્વિના ॥ ૧૦.૦૬૪.૦૩
કથા કવિસ્તુવીરવાન્કયા ગિરા બૃહસ્પતિર્વાવૃધતે સુવૃક્તિભિઃ ।
અજ એકપાત્સુહવેભિરૃક્વભિરહિઃ શૃણોતુ બુધ્ન્યો હવીમનિ ॥ ૧૦.૦૬૪.૦૪
દક્ષસ્ય વાદિતે જન્મનિ વ્રતે રાજાના મિત્રાવરુણા વિવાસસિ ।
અતૂર્તપન્થાઃ પુરુરથો અર્યમા સપ્તહોતા વિષુરૂપેષુ જન્મસુ ॥ ૧૦.૦૬૪.૦૫
તે નો અર્વન્તો હવનશ્રુતો હવં વિશ્વે શૃણ્વન્તુ વાજિનો મિતદ્રવઃ ।
સહસ્રસા મેધસાતાવિવ ત્મના મહો યે ધનં સમિથેષુ જભ્રિરે ॥ ૧૦.૦૬૪.૦૬
પ્ર વો વાયું રથયુજં પુરંધિં સ્તોમૈઃ કૃણુધ્વં સખ્યાય પૂષણમ્ ।
તે હિ દેવસ્ય સવિતુઃ સવીમનિ ક્રતું સચન્તે સચિતઃ સચેતસઃ ॥ ૧૦.૦૬૪.૦૭
ત્રિઃ સપ્ત સસ્રા નદ્યો મહીરપો વનસ્પતીન્પર્વતાઁ અગ્નિમૂતયે ।
કૃશાનુમસ્તૄન્તિષ્યં સધસ્થ આ રુદ્રં રુદ્રેષુ રુદ્રિયં હવામહે ॥ ૧૦.૦૬૪.૦૮
સરસ્વતી સરયુઃ સિન્ધુરૂર્મિભિર્મહો મહીરવસા યન્તુ વક્ષણીઃ ।
દેવીરાપો માતરઃ સૂદયિત્વ્યો ઘૃતવત્પયો મધુમન્નો અર્ચત ॥ ૧૦.૦૬૪.૦૯
ઉત માતા બૃહદ્દિવા શૃણોતુ નસ્ત્વષ્ટા દેવેભિર્જનિભિઃ પિતા વચઃ ।
ઋભુક્ષા વાજો રથસ્પતિર્ભગો રણ્વઃ શંસઃ શશમાનસ્ય પાતુ નઃ ॥ ૧૦.૦૬૪.૧૦
રણ્વઃ સંદૃષ્ટૌ પિતુમાઁ ઇવ ક્ષયો ભદ્રા રુદ્રાણાં મરુતામુપસ્તુતિઃ ।
ગોભિઃ ષ્યામ યશસો જનેષ્વા સદા દેવાસ ઇળયા સચેમહિ ॥ ૧૦.૦૬૪.૧૧

યાં મે ધિયં મરુત ઇન્દ્ર દેવા અદદાત વરુણ મિત્ર યૂયમ્ ।
તાં પીપયત પયસેવ ધેનું કુવિદ્ગિરો અધિ રથે વહાથ ॥ ૧૦.૦૬૪.૧૨
કુવિદઙ્ગ પ્રતિ યથા ચિદસ્ય નઃ સજાત્યસ્ય મરુતો બુબોધથ ।
નાભા યત્ર પ્રથમં સંનસામહે તત્ર જામિત્વમદિતિર્દધાતુ નઃ ॥ ૧૦.૦૬૪.૧૩
તે હિ દ્યાવાપૃથિવી માતરા મહી દેવી દેવાઞ્જન્મના યજ્ઞિયે ઇતઃ ।
ઉભે બિભૃત ઉભયં ભરીમભિઃ પુરૂ રેતાંસિ પિતૃભિશ્ચ સિઞ્ચતઃ ॥ ૧૦.૦૬૪.૧૪
વિ ષા હોત્રા વિશ્વમશ્નોતિ વાર્યં બૃહસ્પતિરરમતિઃ પનીયસી ।
ગ્રાવા યત્ર મધુષુદુચ્યતે બૃહદવીવશન્ત મતિભિર્મનીષિણઃ ॥ ૧૦.૦૬૪.૧૫
એવા કવિસ્તુવીરવાઁ ઋતજ્ઞા દ્રવિણસ્યુર્દ્રવિણસશ્ચકાનઃ ।
ઉક્થેભિરત્ર મતિભિશ્ચ વિપ્રોઽપીપયદ્ગયો દિવ્યાનિ જન્મ ॥ ૧૦.૦૬૪.૧૬
એવા પ્લતેઃ સૂનુરવીવૃધદ્વો વિશ્વ આદિત્યા અદિતે મનીષી ।
ઈશાનાસો નરો અમર્ત્યેનાસ્તાવિ જનો દિવ્યો ગયેન ॥ ૧૦.૦૬૪.૧૭
અગ્નિરિન્દ્રો વરુણો મિત્રો અર્યમા વાયુઃ પૂષા સરસ્વતી સજોષસઃ ।
આદિત્યા વિષ્ણુર્મરુતઃ સ્વર્બૃહત્સોમો રુદ્રો અદિતિર્બ્રહ્મણસ્પતિઃ ॥ ૧૦.૦૬૫.૦૧
ઇન્દ્રાગ્ની વૃત્રહત્યેષુ સત્પતી મિથો હિન્વાના તન્વા૩ સમોકસા ।
અન્તરિક્ષં મહ્યા પપ્રુરોજસા સોમો ઘૃતશ્રીર્મહિમાનમીરયન્ ॥ ૧૦.૦૬૫.૦૨
તેષાં હિ મહ્ના મહતામનર્વણાં સ્તોમાઁ ઇયર્મ્યૃતજ્ઞા ઋતાવૃધામ્ ।
યે અપ્સવમર્ણવં ચિત્રરાધસસ્તે નો રાસન્તાં મહયે સુમિત્ર્યાઃ ॥ ૧૦.૦૬૫.૦૩
સ્વર્ણરમન્તરિક્ષાણિ રોચના દ્યાવાભૂમી પૃથિવીં સ્કમ્ભુરોજસા ।
પૃક્ષા ઇવ મહયન્તઃ સુરાતયો દેવાઃ સ્તવન્તે મનુષાય સૂરયઃ ॥ ૧૦.૦૬૫.૦૪
મિત્રાય શિક્ષ વરુણાય દાશુષે યા સમ્રાજા મનસા ન પ્રયુચ્છતઃ ।
યયોર્ધામ ધર્મણા રોચતે બૃહદ્યયોરુભે રોદસી નાધસી વૃતૌ ॥ ૧૦.૦૬૫.૦૫
યા ગૌર્વર્તનિં પર્યેતિ નિષ્કૃતં પયો દુહાના વ્રતનીરવારતઃ ।
સા પ્રબ્રુવાણા વરુણાય દાશુષે દેવેભ્યો દાશદ્ધવિષા વિવસ્વતે ॥ ૧૦.૦૬૫.૦૬
દિવક્ષસો અગ્નિજિહ્વા ઋતાવૃધ ઋતસ્ય યોનિં વિમૃશન્ત આસતે ।
દ્યાં સ્કભિત્વ્ય૧પ આ ચક્રુરોજસા યજ્ઞં જનિત્વી તન્વી૩ નિ મામૃજુઃ ॥ ૧૦.૦૬૫.૦૭
પરિક્ષિતા પિતરા પૂર્વજાવરી ઋતસ્ય યોના ક્ષયતઃ સમોકસા ।

દ્યાવાપૃથિવી વરુણાય સવ્રતે ધૃતવત્પયો મહિષાય પિન્વતઃ ॥ ૧૦.૦૬૫.૦૮

પર્જન્યાવાતા વૃષભા પુરીષિણેન્દ્રવાયૂ વરુણો મિત્રો અર્યમા ।

દેવાઁ આદિત્યાઁ અદિતિં હવામહે યે પાર્થિવાસો દિવ્યાસો અપ્સુ યે ॥ ૧૦.૦૬૫.૦૯

ત્વષ્ટારં વાયુમૃભવો ય ઓહતે દૈવ્યા હોતારા ઉષસં સ્વસ્તયે ।

બૃહસ્પતિં વૃત્રખાદં સુમેધસમિન્દ્રિયં સોમં ધનસા ઉ ઈમહે ॥ ૧૦.૦૬૫.૧૦

બ્રહ્મ ગામશ્વં જનયન્ત ઓષધીર્વનસ્પતીન્પૃથિવીં પર્વતાઁ અપઃ ।

સૂર્યં દિવિ રોહયન્તઃ સુદાનવ આર્યા વ્રતા વિસૃજન્તો અધિ ક્ષમિ ॥ ૧૦.૦૬૫.૧૧

ભુજ્યુમંહસઃ પિપૃથો નિરશ્વિના શ્યાવં પુત્રં વધ્રિમત્યા અજિન્વતમ્ ।

કમદ્યુવં વિમદાયોહથુર્યુવં વિષ્ણાપ્વં૧ વિશ્વકાયાવ સૃજથઃ ॥ ૧૦.૦૬૫.૧૨

પાવીરવી તન્યતુરેકપાદજો દિવો ધર્તા સિન્ધુરાપઃ સમુદ્રિયઃ ।

વિશ્વે દેવાસઃ શ◌ૃણવન્વચાંસિ મે સરસ્વતી સહ ધીભિઃ પુરંધ્યા ॥ ૧૦.૦૬૫.૧૩

વિશ્વે દેવાઃ સહ ધીભિઃ પુરંધ્યા મનોર્યજત્રા અમૃતા ઋતજ્ઞાઃ ।

રાતિષાચો અભિષાચઃ સ્વર્વિદઃ સ્વ૧ર્ગિરો બ્રહ્મ સૂક્તં જુષેરત ॥ ૧૦.૦૬૫.૧૪

દેવાન્વસિષ્ઠો અમૃતાન્વવન્દે યે વિશ્વા ભુવનાભિ પ્રતસ્થુઃ ।

તે નો રાસન્તામુરુગાયમદ્ય યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૧૦.૦૬૫.૧૫

દેવાન્હુવે બૃહચ્છ્રવસઃ સ્વસ્તયે જ્યોતિષ્કૃતો અધ્વરસ્ય પ્રચેતસઃ ।

યે વાવૃધુઃ પ્રતરં વિશ્વવેદસ ઇન્દ્રજ્યેષ્ઠાસો અમૃતા ઋતાવૃધઃ ॥ ૧૦.૦૬૬.૦૧

ઇન્દ્રપ્રસૂતા વરુણપ્રશિષ્ટા યે સૂર્યસ્ય જ્યોતિષો ભાગમાનશુઃ ।

મરુદ્ગણે વૃજને મન્મ ધીમહિ માઘોને યજ્ઞં જનયન્ત સૂરયઃ ॥ ૧૦.૦૬૬.૦૨

ઇન્દ્રો વસુભિઃ પરિ પાતુ નો ગયમાદિત્યૈર્નો અદિતિઃ શર્મ યચ્છતુ ।

રુદ્રો રુદ્રેભિર્દેવો મૃળયાતિ નસ્ત્વષ્ટા નો ગ્નાભિઃ સુવિતાય જિન્વતુ ॥ ૧૦.૦૬૬.૦૩

અદિતિર્દ્યાવાપૃથિવી ઋતં મહદિન્દ્રાવિષ્ણૂ મરુતઃ સ્વર્બૃહત્ ।

દેવાઁ આદિત્યાઁ અવસે હવામહે વસૂન્રુદ્રાન્સવિતારં સુદંસસમ્ ॥ ૧૦.૦૬૬.૦૪

સરસ્વાન્ધીભિર્વરુણો ધૃતવ્રતઃ પૂષા વિષ્ણુર્મહિમા વાયુરશ્વિના ।

બ્રહ્મકૃતો અમૃતા વિશ્વવેદસઃ શર્મ નો યંસન્ત્રિવરૂથમંહસઃ ॥ ૧૦.૦૬૬.૦૫

વૃષા યજ્ઞો વૃષણઃ સન્તુ યજ્ઞિયા વૃષણો દેવા વૃષણો હવિષ્કૃતઃ ।

વૃષણા દ્યાવાપૃથિવી ઋતાવરી વૃષા પર્જન્યો વૃષણો વૃષસ્તુભઃ ॥ ૧૦.૦૬૬.૦૬

અગ્નીષોમા વૃષણા વાજસાતયે પુરુપ્રશસ્તા વૃષણા ઉપ બ્રુવે ।
યાવીજિરે વૃષણો દેવયજ્યયા તા નઃ શર્મ ત્રિવરૂથં વિ યંસતઃ ॥ ૧૦.૦૬૬.૦૭
ધૃતવ્રતાઃ ક્ષત્રિયા યજ્ઞનિષ્કૃતો બૃહદ્દિવા અધ્વરાણામભિશ્રિયઃ ।
અગ્નિહોતાર ઋતસાપો અદ્રુહોઽપો અસૃજન્નનુ વૃત્રતૂર્યે ॥ ૧૦.૦૬૬.૦૮
દ્યાવાપૃથિવી જનયન્નભિ વ્રતાપ ઓષધીર્વનિનાનિ યજ્ઞિયા ।
અન્તરિક્ષં સ્વ૧રા પપ્રુરૂતયે વશં દેવાસસ્તન્વી૩ નિ મામૃજુઃ ॥ ૧૦.૦૬૬.૦૯
ધર્તારો દિવ ઋભવઃ સુહસ્તા વાતાપર્જન્યા મહિષસ્ય તન્યતોઃ ।
આપ ઓષધીઃ પ્ર તિરન્તુ નો ગિરો ભગો રાતિર્વાજિનો યન્તુ મે હવમ્ ॥ ૧૦.૦૬૬.૧૦
સમુદ્રઃ સિન્ધૂ રજો અન્તરિક્ષમજ એકપાત્તનયિત્નુરર્ણવઃ ।
અહિર્બુધ્ન્યઃ શ઼ૃણવદ્વચાંસિ મે વિશ્વે દેવાસ ઉત સૂરયો મમ ॥ ૧૦.૦૬૬.૧૧
સ્યામ વો મનવો દેવવીતયે પ્રાઞ્ચં નો યજ્ઞં પ્ર ણયત સાધુયા ।
આદિત્યા રુદ્રા વસવઃ સુદાનવ ઇમા બ્રહ્મ શસ્યમાનાનિ જિન્વત ॥ ૧૦.૦૬૬.૧૨
દૈવ્યા હોતારા પ્રથમા પુરોહિત ઋતસ્ય પન્થામન્વેમિ સાધુયા ।
ક્ષેત્રસ્ય પતિં પ્રતિવેશમીમહે વિશ્વાન્દેવાઁ અમૃતાઁ અપ્રયુચ્છતઃ ॥ ૧૦.૦૬૬.૧૩
વસિષ્ઠાસઃ પિતૃવદ્વાચમક્રત દેવાઁ ઈળાના ઋષિવત્સ્વસ્તયે ।
પ્રીતા ઇવ જ્ઞાતયઃ કામમેત્યાસ્મે દેવાસોઽવ ધૂનુતા વસુ ॥ ૧૦.૦૬૬.૧૪
દેવાન્વસિષ્ઠો અમૃતાન્વવન્દે યે વિશ્વા ભુવનાભિ પ્રતસ્થુઃ ।
તે નો રાસન્તામુરુગાયમદ્ય યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૧૦.૦૬૬.૧૫

ઇમાં ધિયં સપ્તશીર્ષ્ણીં પિતા ન ઋતપ્રજાતાં બૃહતીમવિન્દત્ ।
તુરીયં સ્વિજ્જનયદ્વિશ્વજન્યોઽયાસ્ય ઉક્થમિન્દ્રાય શંસન્ ॥ ૧૦.૦૬૭.૦૧
ઋતં શંસન્ત ઋજુ દીધ્યાના દિવસ્પુત્રાસો અસુરસ્ય વીરાઃ ।
વિપ્રં પદમઙ્ગિરસો દધાના યજ્ઞસ્ય ધામ પ્રથમં મનન્ત ॥ ૧૦.૦૬૭.૦૨
હંસૈરિવ સખિભિર્વાવદદ્ભિરશ્મન્મયાનિ નહના વ્યસ્યન્ ।
બૃહસ્પતિરભિકનિક્રદદ્ગા ઉત પ્રાસ્તૌદુચ્ચ વિદ્વાઁ અગાયત્ ॥ ૧૦.૦૬૭.૦૩
અવો દ્વાભ્યાં પર એકયા ગા ગુહા તિષ્ઠન્તીરનૃતસ્ય સેતૌ ।
બૃહસ્પતિસ્તમસિ જ્યોતિરિચ્છન્નુદુસ્રા આકર્વિ હિ તિસ્ર આવઃ ॥ ૧૦.૦૬૭.૦૪
વિભિદ્યા પુરં શયથેમપાચીં નિસ્ત્રીણિ સાકમુદધેરકૃન્તત્ ।

બૃહસ્પતિરુષસં સૂર્યં ગામર્કં વિવેદ સ્તનયન્નિવ દ્યૌઃ ॥ ૧૦.૦૬૭.૦૫
ઇન્દ્રો વલં રક્ષિતારં દુઘાનાં કરેણેવ વિ ચકર્તા રવેણ ।
સ્વેદાઞ્જિભિરાશિરમિચ્છમાનોઽરોદયત્પણિમા ગા અમુષ્ણાત્ ॥ ૧૦.૦૬૭.૦૬
સ ઈં સત્યેભિઃ સખિભિઃ શુચદ્ભિર્ગોધાયસં વિ ધનસૈરદર્દઃ ।
બ્રહ્મણસ્પતિર્વૃષભિર્વરાહૈર્ઘર્મસ્વેદેભિર્દ્રવિણં વ્યાનટ્ ॥ ૧૦.૦૬૭.૦૭
તે સત્યેન મનસા ગોપતિં ગા ઇયાનાસ ઇષણયન્ત ધીભિઃ ।
બૃહસ્પતિર્મિથોઅવદ્યપેભિરુદુસ્રિયા અસૃજત સ્વયુગ્ભિઃ ॥ ૧૦.૦૬૭.૦૮
તં વર્ધયન્તો મતિભિઃ શિવાભિઃ સિંહમિવ નાનદતં સધસ્થે ।
બૃહસ્પતિં વૃષણં શૂરસાતૌ ભરેભરે અનુ મદેમ જિષ્ણુમ્ ॥ ૧૦.૦૬૭.૦૯
યદા વાજમસનદ્વિશ્વરૂપમા દ્યામરુક્ષદુત્તરાણિ સદ્મ ।
બૃહસ્પતિં વૃષણં વર્ધયન્તો નાના સન્તો બિભ્રતો જ્યોતિરાસા ॥ ૧૦.૦૬૭.૧૦
સત્યામાશિષં કૃણુતા વયોધૈ કીરિં ચિદ્ધ્યવથ સ્વેભિરેવૈઃ ।
પશ્ચા મૃધો અપ ભવન્તુ વિશ્વાસ્તદ્રોદસી શ◌ૃણુતં વિશ્વમિન્વે ॥ ૧૦.૦૬૭.૧૧
ઇન્દ્રો મહ્ના મહતો અર્ણવસ્ય વિ મૂર્ધાનમભિનદર્બુદસ્ય ।
અહન્નહિમરિણાત્સપ્ત સિન્ધૂન્દેવૈર્દ્યાવાપૃથિવી પ્રાવતં નઃ ॥ ૧૦.૦૬૭.૧૨

ઉદપ્રુતો ન વયો રક્ષમાણા વાવદતો અભ્રિયસ્યેવ ઘોષાઃ ।
ગિરિભ્રજો નોર્મયો મદન્તો બૃહસ્પતિમભ્યર્કા અનાવન્ ॥ ૧૦.૦૬૮.૦૧
સં ગોભિરાઙ્ગિરસો નક્ષમાણો ભગ ઇવેદર્યમણં નિનાય ।
જને મિત્રો ન દમ્પતી અનક્તિ બૃહસ્પતે વાજયાશૂઁરિવાજૌ ॥ ૧૦.૦૬૮.૦૨
સાધ્વર્યા અતિથિનીરિષિરાઃ સ્પાર્હાઃ સુવર્ણા અનવદ્યરૂપાઃ ।
બૃહસ્પતિઃ પર્વતેભ્યો વિતૂર્યા નિર્ગા ઊપે યવમિવ સ્થિવિભ્યઃ ॥ ૧૦.૦૬૮.૦૩
આપ્રુષાયન્મધુન ઋતસ્ય યોનિમવક્ષિપન્નર્ક ઉલ્કામિવ દ્યોઃ ।
બૃહસ્પતિરુદ્ધરન્નશ્મનો ગા ભૂમ્યા ઉદ્નેવ વિ ત્વચં બિભેદ ॥ ૧૦.૦૬૮.૦૪
અપ જ્યોતિષા તમો અન્તરિક્ષાદુદ્નઃ શીપાલમિવ વાત આજત્ ।
બૃહસ્પતિરનુમૃશ્યા વલસ્યાભ્રમિવ વાત આ ચક્ર આ ગાઃ ॥ ૧૦.૦૬૮.૦૫
યદા વલસ્ય પીયતો જસું ભેદ્બૃહસ્પતિરગ્નિતપોભિરર્કૈઃ ।
દદ્ભિર્ન જિહ્વા પરિવિષ્ટમાદદાવિર્નિધીઁરકૃણોદુસ્રિયાણામ્ ॥ ૧૦.૦૬૮.૦૬

બૃહસ્પતિરમત હિ ત્યદાસાં નામ સ્વરીણાં સદને ગુહા યત્ ।
આણ્ડેવ ભિત્ત્વા શકુનસ્ય ગર્ભમુદુસ્રિયાઃ પર્વતસ્ય ત્મનાજત્ ॥ ૧૦.૦૬૮.૦૭
અશ્નાપિનદ્ધં મધુ પર્યપશ્યન્મત્સ્યં ન દીન ઉદનિ ક્ષિયન્તમ્ ।
નિષ્ટજ્જભાર ચમસં ન વૃક્ષાદ્બૃહસ્પતિર્વિરવેણા વિકૃત્ય ॥ ૧૦.૦૬૮.૦૮
સોષામવિન્દત્સ સ્વ१ઃ સો અગ્નિં સો અર્કેણ વિ બબાધે તમાંસિ ।
બૃહસ્પતિર્ગોવપુષો વલસ્ય નિર્મજ્જાનં ન પર્વણો જભાર ॥ ૧૦.૦૬૮.૦૯
હિમેવ પર્ણા મુષિતા વનાનિ બૃહસ્પતિનાકૃપયદ્વલો ગાઃ ।
અનાનુકૃત્યમપુનશ્ચકાર યાત્સૂર્યામાસા મિથ ઉચ્ચરાતઃ ॥ ૧૦.૦૬૮.૧૦
અભિ શ્યાવં ન કૃશનેભિરશ્વં નક્ષત્રેભિઃ પિતરો દ્યામપિંશન્ ।
રાત્ર્યાં તમો અદધુર્જ્યોતિરહન્બૃહસ્પતિર્ભિનદદ્રિં વિદદ્ગાઃ ॥ ૧૦.૦૬૮.૧૧
ઇદમકર્મ નમો અભ્રિયાય યઃ પૂર્વીરન્વાનોનવીતિ ।
બૃહસ્પતિઃ સ હિ ગોભિઃ સો અશ્વૈઃ સ વીરેભિઃ સ નૃભિર્નો વયો ધાત્ ॥ ૧૦.૦૬૮.૧૨
ભદ્રા અગ્નેર્વધ્ર્યશ્વસ્ય સંદૃશો વામી પ્રણીતિઃ સુરણા ઉપેતયઃ ।
યદીં સુમિત્રા વિશો અગ્ર ઇન્ધતે ઘૃતેનાહુતો જરતે દવિદ્યુતત્ ॥ ૧૦.૦૬૯.૦૧
ઘૃતમગ્નેર્વધ્ર્યશ્વસ્ય વર્ધનં ઘૃતમન્નં ઘૃતમ્વસ્ય મેદનમ્ ।
ઘૃતેનાહુત ઉર્વિયા વિ પપ્રથે સૂર્ય ઇવ રોચતે સર્પિરાસુતિઃ ॥ ૧૦.૦૬૯.૦૨
યત્તે મનુર્યદનીકં સુમિત્રઃ સમીધે અગ્ને તદિદં નવીયઃ ।
સ રેવચ્છોચ સ ગિરો જુષસ્વ સ વાજં દર્ષિ સ ઇહ શ્રવો ધાઃ ॥ ૧૦.૦૬૯.૦૩
યં ત્વા પૂર્વમીળિતો વધ્ર્યશ્વઃ સમીધે અગ્ને સ ઇદં જુષસ્વ ।
સ નઃ સ્તિપા ઉત ભવા તનૂપા દાત્રં રક્ષસ્વ યદિદં તે અસ્મે ॥ ૧૦.૦૬૯.૦૪
ભવા દ્યુમ્ની વાધ્ર્યશ્વોત ગોપા મા ત્વા તારીદભિમાતિર્જનાનામ્ ।
શૂર ઇવ ધૃષ્ણુશ્ચ્યવનઃ સુમિત્રઃ પ્ર નુ વોચં વાધ્ર્યશ્વસ્ય નામ ॥ ૧૦.૦૬૯.૦૫
સમજ્યા પર્વત્યા૩ વસૂનિ દાસા વૃત્રાણ્યાર્યા જિગેથ ।
શૂર ઇવ ધૃષ્ણુશ્ચ્યવનો જનાનાં ત્વમગ્ને પૃતનાયૂँરભિ ષ્યાઃ ॥ ૧૦.૦૬૯.૦૬
દીર્ઘતન્તુર્બૃહદુક્ષાયમગ્નિઃ સહસ્રસ્તરીઃ શતનીથ ઋભ્વા ।
દ્યુમાન્દ્યુમત્સુ નૃભિર્મૃજ્યમાનઃ સુમિત્રેષુ દીદયો દેવયત્સુ ॥ ૧૦.૦૬૯.૦૭
ત્વે ધેનુઃ સુદુઘા જાતવેદોઽસશ્ચતેવ સમના સબર્ધુક્ ।

ત્વં નૃભિર્દક્ષિણાવદ્ભિરગ્ને સુમિત્રેભિરિધ્યસે દેવયદ્ભિઃ ॥ ૧૦.૦૬૯.૦૮
દેવાશ્ચિત્તે અમૃતા જાતવેદો મહિમાનં વાધ્ર્યશ્વ પ્ર વોચન્ ।
યત્સમ્પૃચ્છં માનુષીર્વિશ આયન્ત્વં નૃભિરજયસ્ત્વાવૃધેભિઃ ॥ ૧૦.૦૬૯.૦૯
પિતેવ પુત્રમબિભરુપસ્થે ત્વામગ્ને વધ્ર્યશ્વઃ સપર્યન્ ।
જુષાણો અસ્ય સમિધં યવિષ્ઠોત પૂર્વાઁ અવનોર્વ્રાધતશ્ચિત્ ॥ ૧૦.૦૬૯.૧૦
શશ્વદગ્નિર્વધ્ર્યશ્વસ્ય શત્રૂન્નૃભિર્જિગાય સુતસોમવદ્ભિઃ ।
સમનં ચિદદહશ્ચિત્રભાનોઽવ વ્રાધન્તમભિનદ્વૃધશ્ચિત્ ॥ ૧૦.૦૬૯.૧૧
અયમગ્નિર્વધ્ર્યશ્વસ્ય વૃત્રહા સનકાત્પ્રેદ્ધો નમસોપવાક્યઃ ।
સ નો અજામીઁરુત વા વિજામીનભિ તિષ્ઠ શર્ધતો વાધ્ર્યશ્વ ॥ ૧૦.૦૬૯.૧૨

ઇમાં મે અગ્ને સમિધં જુષસ્વેળસ્પદે પ્રતિ હર્યા ઘૃતાચીમ્ ।
વર્ષ્મન્પૃથિવ્યાઃ સુદિનત્વે અહ્નામૂર્ધ્વો ભવ સુક્રતો દેવયજ્યા ॥ ૧૦.૦૭૦.૦૧
આ દેવાનામગ્રયાવેહ યાતુ નરાશંસો વિશ્વરૂપેભિરશ્વૈઃ ।
ઋતસ્ય પથા નમસા મિયેધો દેવેભ્યો દેવતમઃ સુષૂદત્ ॥ ૧૦.૦૭૦.૦૨
શશ્વત્તમમીળતે દૂત્યાય હવિષ્મન્તો મનુષ્યાસો અગ્નિમ્ ।
વહિષ્ઠૈરશ્વૈઃ સુવૃતા રથેના દેવાન્વક્ષિ નિ ષદેહ હોતા ॥ ૧૦.૦૭૦.૦૩
વિ પ્રથતાં દેવજુષ્ટં તિરશ્ચા દીર્ઘં દ્રાઘ્મા સુરભિ ભૂત્વસ્મે ।
અહેળતા મનસા દેવ બર્હિરિન્દ્રજ્યેષ્ઠાઁ ઉશતો યક્ષિ દેવાન્ ॥ ૧૦.૦૭૦.૦૪
દિવો વા સાનુ સ્પૃશતા વરીયઃ પૃથિવ્યા વા માત્રયા વિ શ્રયધ્વમ્ ।
ઉશતીર્દ્વારો મહિના મહદ્ભિર્દેવં રથં રથયુર્ધારયધ્વમ્ ॥ ૧૦.૦૭૦.૦૫
દેવી દિવો દુહિતરા સુશિલ્પે ઉષાસાનક્તા સદતાં નિ યોનૌ ।
આ વાં દેવાસ ઉશતી ઉશન્ત ઉરૌ સીદન્તુ સુભગે ઉપસ્થે ॥ ૧૦.૦૭૦.૦૬
ઊર્ધ્વો ગ્રાવા બૃહદગ્નિઃ સમિદ્ધઃ પ્રિયા ધામાન્યદિતેરુપસ્થે ।
પુરોહિતાવૃત્વિજા યજ્ઞે અસ્મિન્વિદુષ્ટરા દ્રવિણમા યજેથામ્ ॥ ૧૦.૦૭૦.૦૭
તિસ્રો દેવીર્બર્હિરિદં વરીય આ સીદત ચકૃમા વઃ સ્યોનમ્ ।
મનુષ્વદ્યજ્ઞં સુધિતા હવીંષીળા દેવી ઘૃતપદી જુષન્ત ॥ ૧૦.૦૭૦.૦૮
દેવ ત્વષ્ટર્યદ્ધ ચારુત્વમાનડ્યદઙ્ગિરસામભવઃ સચાભૂઃ ।
સ દેવાનાં પાથ ઉપ પ્ર વિદ્વાઁ ઉશન્યક્ષિ દ્રવિણોદઃ સુરત્નઃ ॥ ૧૦.૦૭૦.૦૯

વનસ્પતે રશનયા નિયૂયા દેવાનાં પાથ ઉપ વક્ષિ વિદ્વાન્ ।
સ્વદાતિ દેવઃ કૃણવદ્ધવીંષ્યવતાં દ્યાવાપૃથિવી હવં મે ॥ ૧૦.૦૭૦.૧૦
આગ્ને વહ વરુણમિષ્ટયે ન ઇન્દ્રં દિવો મરુતો અન્તરિક્ષાત્ ।
સીદન્તુ બર્હિર્વિશ્વ આ યજત્રાઃ સ્વાહા દેવા અમૃતા માદયન્તામ્ ॥ ૧૦.૦૭૦.૧૧

બૃહસ્પતે પ્રથમં વાચો અગ્રં યત્પ્રૈરત નામધેયં દધાનાઃ ।
યદેષાં શ્રેષ્ઠં યદરિપ્રમાસીત્પ્રેણા તદેષાં નિહિતં ગુહાવિઃ ॥ ૧૦.૦૭૧.૦૧
સક્તુમિવ તિતઉના પુનન્તો યત્ર ધીરા મનસા વાચમક્રત ।
અત્રા સખાયઃ સખ્યાનિ જાનતે ભદ્રૈષાં લક્ષ્મીર્નિહિતાધિ વાચિ ॥ ૧૦.૦૭૧.૦૨
યજ્ઞેન વાચઃ પદવીયમાયન્તામન્વવિન્દન્નૃષિષુ પ્રવિષ્ટામ્ ।
તામાભૃત્યા વ્યદધુઃ પુરુત્રા તાં સપ્ત રેભા અભિ સં નવન્તે ॥ ૧૦.૦૭૧.૦૩
ઉત ત્વઃ પશ્યન્ન દદર્શ વાચમુત ત્વઃ શ◌ૃણ્વન્ન શ◌ૃણોત્યેનામ્ ।
ઉતો ત્વસ્મૈ તન્વં૧ વિ સસ્ને જાયેવ પત્ય ઉશતી સુવાસાઃ ॥ ૧૦.૦૭૧.૦૪
ઉત ત્વં સખ્યે સ્થિરપીતમાહુર્નૈનં હિન્વન્ત્યપિ વાજિનેષુ ।
અધેન્વા ચરતિ માયયૈષ વાચં શુશ્રુવાઁ અફલામપુષ્પામ્ ॥ ૧૦.૦૭૧.૦૫
યસ્તિત્યાજ સચિવિદં સખાયં ન તસ્ય વાચ્યપિ ભાગો અસ્તિ ।
યદીં શ◌ૃણોત્યલકં શ◌ૃણોતિ નહિ પ્રવેદ સુકૃતસ્ય પન્થામ્ ॥ ૧૦.૦૭૧.૦૬
અક્ષણ્વન્તઃ કર્ણવન્તઃ સખાયો મનોજવેષ્વસમા બભૂવુઃ ।
આદઘ્નાસ ઉપકક્ષાસ ઉ ત્વે હ્રદા ઇવ સ્નાત્વા ઉ ત્વે દદૃશ્રે ॥ ૧૦.૦૭૧.૦૭
હૃદા તષ્ટેષુ મનસો જવેષુ યદ્બ્રાહ્મણાઃ સંયજન્તે સખાયઃ ।
અત્રાહ ત્વં વિ જહુર્વેદ્યાભિરોહબ્રહ્માણો વિ ચરન્ત્યુ ત્વે ॥ ૧૦.૦૭૧.૦૮
ઇમે યે નાર્વાઙ્ન પરશ્ચરન્તિ ન બ્રાહ્મણાસો ન સુતેકરાસઃ ।
ત એતે વાચમભિપદ્ય પાપયા સિરીસ્તન્ત્રં તન્વતે અપ્રજજ્ઞયઃ ॥ ૧૦.૦૭૧.૦૯
સર્વે નન્દન્તિ યશસાગતેન સભાસાહેન સખ્યા સખાયઃ ।
કિલ્બિષસ્પૃત્પિતુષણિર્હ્યેષામરં હિતો ભવતિ વાજિનાય ॥ ૧૦.૦૭૧.૧૦
ઋચાં ત્વઃ પોષમાસ્તે પુપુષ્વાન્ગાયત્રં ત્વો ગાયતિ શક્વરીષુ ।
બ્રહ્મા ત્વો વદતિ જાતવિદ્યાં યજ્ઞસ્ય માત્રાં વિ મિમીત ઉ ત્વઃ ॥ ૧૦.૦૭૧.૧૧

દેવાનાં નુ વયં જાના પ્ર વોચામ વિપન્યયા ।

ઉક્થેષુ શસ્યમાનેષુ યઃ પશ્યાદુત્તરે યુગે ॥ ૧૦.૦૭૨.૦૧
બ્રહ્મણસ્પતિરેતા સં કર્માર ઇવાધમત્ ।
દેવાનાં પૂર્વ્યે યુગેઽસતઃ સદજાયત ॥ ૧૦.૦૭૨.૦૨
દેવાનાં યુગે પ્રથમેઽસતઃ સદજાયત ।
તદાશા અન્વજાયન્ત તદુત્તાનપદસ્પરિ ॥ ૧૦.૦૭૨.૦૩
ભૂર્જજ્ઞ ઉત્તાનપદો ભુવ આશા અજાયન્ત ।
અદિતેર્દક્ષો અજાયત દક્ષાદ્વદિતિઃ પરિ ॥ ૧૦.૦૭૨.૦૪
અદિતિર્હ્યજનિષ્ટ દક્ષ યા દુહિતા તવ ।
તાં દેવા અન્વજાયન્ત ભદ્રા અમૃતબન્ધવઃ ॥ ૧૦.૦૭૨.૦૫
યદ્દેવા અદઃ સલિલે સુસંરબ્ધા અતિષ્ઠત ।
અત્રા વો નૃત્યતામિવ તીવ્રો રેણુરપાયત ॥ ૧૦.૦૭૨.૦૬
યદ્દેવા યતયો યથા ભુવનાન્યપિન્વત ।
અત્રા સમુદ્ર આ ગૂળ્હમા સૂર્યમજભર્તન ॥ ૧૦.૦૭૨.૦૭
અષ્ટૌ પુત્રાસો અદિતેર્યે જાતાસ્તન્વ૧સ્પરિ ।
દેવાઁ ઉપ પ્રૈત્સપ્તભિઃ પરા માર્તાણ્ડમાસ્યત્ ॥ ૧૦.૦૭૨.૦૮
સપ્તભિઃ પુત્રૈરદિતિરુપ પ્રૈત્પૂર્વ્યં યુગમ્ ।
પ્રજાયૈ મૃત્યવે ત્વત્પુનર્માર્તાણ્ડમાભરત્ ॥ ૧૦.૦૭૨.૦૯

જનિષ્ઠા ઉગ્રઃ સહસે તુરાય મન્દ્ર ઓજિષ્ઠો બહુલાભિમાનઃ ।
અવર્ધન્નિન્દ્રં મરુતશ્ચિદત્ર માતા યદ્વીરં દધનદ્ધનિષ્ઠા ॥ ૧૦.૦૭૩.૦૧
દ્રુહો નિષત્તા પૃશની ચિદેવૈઃ પુરૂ શંસેન વાવૃધુષ્ટ ઇન્દ્રમ્ ।
અભીવૃતેવ તા મહાપદેન ધ્વાન્તાત્પ્રપિત્વાદુદરન્ત ગર્ભાઃ ॥ ૧૦.૦૭૩.૦૨
ઋષ્વા તે પાદા પ્ર યજ્જિગાસ્યવર્ધન્વાજા ઉત યે ચિદત્ર ।
ત્વમિન્દ્ર સાલાવૃકાન્સહસ્રમાસન્દધિષે અશ્વિના વવૃત્યાઃ ॥ ૧૦.૦૭૩.૦૩
સમના તૂર્ણિરુપ યાસિ યજ્ઞમા નાસત્યા સખ્યાય વક્ષિ ।
વસાવ્યામિન્દ્ર ધારયઃ સહસ્રાશ્વિના શૂર દદતુર્મઘાનિ ॥ ૧૦.૦૭૩.૦૪
મન્દમાન ઋતાદધિ પ્રજાયૈ સખિભિરિન્દ્ર ઇષિરેભિરર્થમ્ ।
આભિર્હિ માયા ઉપ દસ્યુમાગાન્મિહઃ પ્ર તમ્રા અવપત્તમાંસિ ॥ ૧૦.૦૭૩.૦૫

સનામાના ચિદ્ધ્વસયો ન્યસ્મા અવાહન્નિન્દ્ર ઉષસો યથાનઃ ।
ઋષ્વૈરગચ્છઃ સખિભિર્નિકામૈઃ સાકં પ્રતિષ્ઠા હૃદ્યા જઘન્થ ॥ ૧૦.૦૭૩.૦૬

ત્વં જઘન્થ નમુચિં મખસ્યું દાસં કૃણ્વાન ઋષયે વિમાયમ્ ।
ત્વં ચકર્થ મનવે સ્યોનાન્પથો દેવત્રાઞ્જસેવ યાનાન્ ॥ ૧૦.૦૭૩.૦૭

ત્વમેતાનિ પપ્રિષે વિ નામેશાન ઇન્દ્ર દધિષે ગભસ્તૌ ।
અનુ ત્વા દેવાઃ શવસા મદન્ત્યુપરિબુધ્નાન્વનિનશ્ચકર્થ ॥ ૧૦.૦૭૩.૦૮

ચક્રં યદસ્યાપ્સ્વા નિષત્તમુતો તદસ્મૈ મધ્વિચ્ચચ્છદ્યાત્ ।
પૃથિવ્યામતિષિતં યદૂધઃ પયો ગોષ્વદધા ઓષધીષુ ॥ ૧૦.૦૭૩.૦૯

અશ્વાદિયાયેતિ યદ્વદન્ત્યોજસો જાતમુત મન્ય એનમ્ ।
મન્યોરિયાય હર્મ્યેષુ તસ્થૌ યતઃ પ્રજજ્ઞ ઇન્દ્રો અસ્ય વેદ ॥ ૧૦.૦૭૩.૧૦

વયઃ સુપર્ણા ઉપ સેદુરિન્દ્રં પ્રિયમેધા ઋષયો નાધમાનાઃ ।
અપ ધ્વાન્તમૂર્ણુહિ પૂર્ધિ ચક્ષુર્મુમુગ્ધ્ય૧સ્માન્નિધયેવ બદ્ધાન્ ॥ ૧૦.૦૭૩.૧૧

વસૂનાં વા ચર્કૃષ ઇયક્ષન્ધિયા વા યજ્ઞૈર્વા રોદસ્યોઃ ।
અર્વન્તો વા યે રયિમન્તઃ સાતૌ વનું વા યે સુશ્રુણં સુશ્રુતો ધુઃ ॥ ૧૦.૦૭૪.૦૧

હવ એષામસુરો નક્ષત દ્યાં શ્રવસ્યતા મનસા નિંસત ક્ષામ્ ।
ચક્ષાણા યત્ર સુવિતાય દેવા દ્યૌર્ન વારેભિઃ કૃણવન્ત સ્વૈઃ ॥ ૧૦.૦૭૪.૦૨

ઇયમેષામમૃતાનાં ગીઃ સર્વતાતા યે કૃપણન્ત રત્નમ્ ।
ધિયં ચ યજ્ઞં ચ સાધન્તસ્તે નો ધાન્તુ વસવ્ય૧મસામિ ॥ ૧૦.૦૭૪.૦૩

આ તત્ત ઇન્દ્રાયવઃ પનન્તાભિ ય ઊર્વં ગોમન્તં તિતૃત્સાન્ ।
સકૃત્સ્વં૧ યે પુરુપુત્રાં મહીં સહસ્રધારાં બૃહતીં દુદુક્ષન્ ॥ ૧૦.૦૭૪.૦૪

શચીવ ઇન્દ્રમવસે કૃણુધ્વમનાનતં દમયન્તં પૃતન્યૂન્ ।
ઋભુક્ષણં મઘવાનં સુવૃક્તિં ભર્તા યો વજ્રં નર્યં પુરુક્ષુઃ ॥ ૧૦.૦૭૪.૦૫

યદ્વાવાન પુરુતમં પુરાષાળ્ળા વૃત્રહેન્દ્રો નામાન્યપ્રાઃ ।
અચેતિ પ્રાસહસ્પતિસ્તુવિષ્માન્યદીમુશ્મસિ કર્તવે કરત્તત્ ॥ ૧૦.૦૭૪.૦૬

પ્ર સુ વ આપો મહિમાનમુત્તમં કારુર્વોચાતિ સદને વિવસ્વતઃ ।
પ્ર સપ્તસપ્ત ત્રેધા હિ ચક્રમુઃ પ્ર સૃત્વરીણામતિ સિન્ધુરોજસા ॥ ૧૦.૦૭૫.૦૧

પ્ર તેઽરદદ્વરુણો યાતવે પથઃ સિન્ધો યદ્વાજાઁ અભ્યદ્રવસ્ત્વમ્ ।

ભૂમ્યા અધિ પ્રવતા યાસિ સાનુના યદેષામગ્રં જગતામિરજ્યસિ ॥ ૧૦.૦૭૫.૦૨
દિવિ સ્વનો યતતે ભૂમ્યોપર્યનન્તં શુષ્મમુદિયર્તિ ભાનુના ।
અભ્રાદિવ પ્ર સ્તનયન્તિ વૃષ્ટયઃ સિન્ધુર્યદેતિ વૃષભો ન રોરુવત્ ॥ ૧૦.૦૭૫.૦૩
અભિ ત્વા સિન્ધો શિશુમિન્ન માતરો વાશ્રા અર્ષન્તિ પયસેવ ધેનવઃ ।
રાજેવ યુધ્વા નયસિ ત્વમિત્સિચૌ યદાસામગ્રં પ્રવતામિનક્ષસિ ॥ ૧૦.૦૭૫.૦૪
ઇમં મે ગઙ્ગે યમુને સરસ્વતિ શુતુદ્રિ સ્તોમં સચતા પરુષ્ણ્યા ।
અસિક્ન્યા મરુદ્વૃધે વિતસ્તયાર્જીકીયે શ઼ૃણુહ્યા સુષોમયા ॥ ૧૦.૦૭૫.૦૫
તૃષ્ટામયા પ્રથમં યાતવે સજૂઃ સુસર્ત્વા રસયા શ્વેત્યા ત્યા ।
ત્વં સિન્ધો કુભયા ગોમતીં ક્રુમું મેહત્ન્વા સરથં યાભિરીયસે ॥ ૧૦.૦૭૫.૦૬
ઋજીત્યેની રુશતી મહિત્વા પરિ જ્રયાંસિ ભરતે રજાંસિ ।
અદબ્ધા સિન્ધુરપસામપસ્તમાશ્વા ન ચિત્રા વપુષીવ દર્શતા ॥ ૧૦.૦૭૫.૦૭
સ્વશ્વા સિન્ધુઃ સુરથા સુવાસા હિરણ્યયી સુકૃતા વાજિનીવતી ।
ઊર્ણાવતી યુવતિઃ સીલમાવત્યુતાધિ વસ્તે સુભગા મધુવૃધમ્ ॥ ૧૦.૦૭૫.૦૮
સુખં રથં યુયુજે સિન્ધુરશ્વિનં તેન વાજં સનિષદસ્મિન્નાજૌ ।
મહાન્હ્યસ્ય મહિમા પનસ્યતેઽદબ્ધસ્ય સ્વયશસો વિરપ્શિનઃ ॥ ૧૦.૦૭૫.૦૯

આ વ ઋઞ્જસ ઊર્જાં વ્યુષ્ટિષ્વિન્દ્રં મરુતો રોદસી અનક્તન ।
ઉભે યથા નો અહની સચાભુવા સદઃસદો વરિવસ્યાત ઉદ્ભિદા ॥ ૧૦.૦૭૬.૦૧
તદુ શ્રેષ્ઠં સવનં સુનોતનાત્યો ન હસ્તયતો અદ્રિઃ સોતરિ ।
વિદદ્ધ્યર્યો અભિભૂતિ પૌંસ્યં મહો રાયે ચિત્તરુતે યદર્વતઃ ॥ ૧૦.૦૭૬.૦૨
તદિદ્ધ્યસ્ય સવનં વિવેરપો યથા પુરા મનવે ગાતુમશ્રેત્ ।
ગોઅર્ણસિ ત્વાષ્ટ્રે અશ્વનિર્ણિજિ પ્રેમધ્વરેષ્વધ્વરાઁ અશિશ્રયુઃ ॥ ૧૦.૦૭૬.૦૩
અપ હત રક્ષસો ભઙ્ગુરાવતઃ સ્કભાયત નિરૃતિં સેધતામતિમ્ ।
આ નો રયિં સર્વવીરં સુનોતન દેવાવ્યં ભરત શ્લોકમદ્રયઃ ॥ ૧૦.૦૭૬.૦૪
દિવશ્ચિદા વોઽમવત્તરેભ્યો વિભ્વના ચિદાશ્વપસ્તરેભ્યઃ ।
વાયોશ્ચિદા સોમરભસ્તરેભ્યોઽગ્નેશ્ચિદર્ચ પિતુકૃત્તરેભ્યઃ ॥ ૧૦.૦૭૬.૦૫
ભુરન્તુ નો યશસઃ સોત્વન્ધસો ગ્રાવાણો વાચા દિવિતા દિવિત્મતા ।
નરો યત્ર દુહતે કામ્યં મધ્વાઘોષયન્તો અભિતો મિથસ્તુરઃ ॥ ૧૦.૦૭૬.૦૬

સુન્વન્તિ સોમં રથિરાસો અદ્રયો નિરસ્ય રસં ગવિષો દુહન્તિ તે ।
દુહન્ત્યૂધરુપસેચનાય કં નરો હવ્યા ન મર્જયન્ત આસભિઃ ॥ ૧૦.૦૭૬.૦૭
એતે નરઃ સ્વપસો અભૂતન ય ઇન્દ્રાય સુનુથ સોમમદ્રયઃ ।
વામંવામં વો દિવ્યાય ધામ્ને વસુવસુ વઃ પાર્થિવાય સુન્વતે ॥ ૧૦.૦૭૬.૦૮
અભ્રપ્રુષો ન વાચા પ્રુષા વસુ હવિષ્મન્તો ન યજ્ઞા વિજાનુષઃ ।
સુમારુતં ન બ્રહ્માણમર્હસે ગણમસ્તોષ્યેષાં ન શોભસે ॥ ૧૦.૦૭૭.૦૧
શ્રિયે મર્યાસો અઞ્જીઁરકૃણ્વત સુમારુતં ન પૂર્વીરતિ ક્ષપઃ ।
દિવસ્પુત્રાસ એતા ન યેતિર આદિત્યાસસ્તે અક્રા ન વાવૃધુઃ ॥ ૧૦.૦૭૭.૦૨
પ્ર યે દિવઃ પૃથિવ્યા ન બર્હણા ત્મના રિરિચ્રે અભ્રાન્ન સૂર્યઃ ।
પાજસ્વન્તો ન વીરાઃ પનસ્યવો રિશાદસો ન મર્યા અભિદ્યવઃ ॥ ૧૦.૦૭૭.૦૩
યુષ્માકં બુધ્ને અપાં ન યામનિ વિથુર્યતિ ન મહી શ્રથર્યતિ ।
વિશ્વપ્સુર્યજ્ઞો અર્વાગયં સુ વઃ પ્રયસ્વન્તો ન સત્રાચ આ ગત ॥ ૧૦.૦૭૭.૦૪
યૂયં ધૂર્ષુ પ્રયુજો ન રશ્મિભિર્જ્યોતિષ્મન્તો ન ભાસા વ્યુષ્ટિષુ ।
શ્યેનાસો ન સ્વયશસો રિશાદસઃ પ્રવાસો ન પ્રસિતાસઃ પરિપ્રુષઃ ॥ ૧૦.૦૭૭.૦૫
પ્ર યદ્વહધ્વે મરુતઃ પરાકાદ્યૂયં મહઃ સંવરણસ્ય વસ્વઃ ।
વિદાનાસો વસવો રાધ્યસ્યારાચ્ચિદ્દ્વેષઃ સનુતર્યુયોત ॥ ૧૦.૦૭૭.૦૬
ય ઉદૃચિ યજ્ઞે અધ્વરેષ્ઠા મરુદ્ભ્યો ન માનુષો દદાશત્ ।
રેવત્સ વયો દધતે સુવીરં સ દેવાનામપિ ગોપીથે અસ્તુ ॥ ૧૦.૦૭૭.૦૭
તે હિ યજ્ઞેષુ યજ્ઞિયાસ ઊમા આદિત્યેન નામ્ના શમ્ભવિષ્ઠાઃ ।
તે નોઽવન્તુ રથતૂર્મનીષાં મહશ્ચ યામન્નધ્વરે ચકાનાઃ ॥ ૧૦.૦૭૭.૦૮
વિપ્રાસો ન મન્મભિઃ સ્વાધ્યો દેવાવ્યો૩ ન યજ્ઞૈઃ સ્વપ્નસઃ ।
રાજાનો ન ચિત્રાઃ સુસંદૃશઃ ક્ષિતીનાં ન મર્યા અરેપસઃ ॥ ૧૦.૦૭૮.૦૧
અગ્નિર્ન યે ભ્રાજસા રુક્મવક્ષસો વાતાસો ન સ્વયુજઃ સદ્યઊતયઃ ।
પ્રજ્ઞાતારો ન જ્યેષ્ઠાઃ સુનીતયઃ સુશર્માણો ન સોમા ઋતં યતે ॥ ૧૦.૦૭૮.૦૨
વાતાસો ન યે ધુનયો જિગત્નવોઽગ્નીનાં ન જિહ્વા વિરોકિણઃ ।
વર્મણ્વન્તો ન યોધાઃ શિમીવન્તઃ પિતૄણાં ન શંસાઃ સુરાતયઃ ॥ ૧૦.૦૭૮.૦૩
રથાનાં ન યે૩ઽરાઃ સનાભયો જિગીવાંસો ન શૂરા અભિદ્યવઃ ।

વરેયવો ન મર્યા ઘૃતપ્રુષોઽભિસ્વર્તારો અર્કં ન સુષ્ટુભઃ ॥ ૧૦.૦૭૮.૦૪
અશ્વાસો ન યે જ્યેષ્ઠાસ આશવો દિધિષવો ન રથ્યઃ સુદાનવઃ ।
આપો ન નિમ્નૈરુદભિર્જિગત્નવો વિશ્વરૂપા અઙ્ગિરસો ન સામભિઃ ॥ ૧૦.૦૭૮.૦૫
ગ્રાવાણો ન સૂરયઃ સિન્ધુમાતર આદર્દિરાસો અદ્રયો ન વિશ્વહા ।
શિશૂલા ન ક્રીળયઃ સુમાતરો મહાગ્રામો ન યામન્નુત ત્વિષા ॥ ૧૦.૦૭૮.૦૬
ઉષસાં ન કેતવોઽધ્વરશ્રિયઃ શુભંયવો નાઞ્જિભિર્વ્યશ્વિતન્ ।
સિન્ધવો ન યયિયો ભ્રાજદૃષ્ટયઃ પરાવતો ન યોજનાનિ મમિરે ॥ ૧૦.૦૭૮.૦૭
સુભાગાન્નો દેવાઃ કૃણુતા સુરત્નાનસ્માન્સ્તોતૄન્મરુતો વાવૃધાનાઃ ।
અધિ સ્તોત્રસ્ય સખ્યસ્ય ગાત સનાદ્ધિ વો રત્નધેયાનિ સન્તિ ॥ ૧૦.૦૭૮.૦૮

અપશ્યમસ્ય મહતો મહિત્વમમર્ત્યસ્ય મર્ત્યાસુ વિક્ષુ ।
નાના હનૂ વિભૃતે સં ભરેતે અસિન્વતી બપ્સતી ભૂર્યત્તઃ ॥ ૧૦.૦૭૯.૦૧
ગુહા શિરો નિહિતમૃધગક્ષી અસિન્વન્નત્તિ જિહ્વયા વનાનિ ।
અત્રાણ્યસ્મૈ પડ્ભિઃ સં ભરન્ત્યુત્તાનહસ્તા નમસાધિ વિક્ષુ ॥ ૧૦.૦૭૯.૦૨
પ્ર માતુઃ પ્રતરં ગુહ્યમિચ્છન્કુમારો ન વીરુધઃ સર્પદુર્વીઃ ।
સસં ન પક્વમવિદચ્છુચન્તં રિરિહ્વાંસં રિપ ઉપસ્થે અન્તઃ ॥ ૧૦.૦૭૯.૦૩
તદ્વામૃતં રોદસી પ્ર બ્રવીમિ જાયમાનો માતરા ગર્ભો અત્તિ ।
નાહં દેવસ્ય મર્ત્યશ્ચિકેતાગ્નિરઙ્ગ વિચેતાઃ સ પ્રચેતાઃ ॥ ૧૦.૦૭૯.૦૪
યો અસ્મા અન્નં તૃષ્વાઽદધાત્યાજ્યૈર્ઘૃતૈર્જુહોતિ પુષ્યતિ ।
તસ્મૈ સહસ્રમક્ષભિર્વિ ચક્ષેઽગ્ને વિશ્વતઃ પ્રત્યઙ્ઙસિ ત્વમ્ ॥ ૧૦.૦૭૯.૦૫
કિં દેવેષુ ત્યજ એનશ્ચકર્થાગ્ને પૃચ્છામિ નુ ત્વામવિદ્વાન્ ।
અક્રીળન્ક્રીળન્હરિરત્તવેઽદન્વિ પર્વશશ્ચકર્ત ગામિવાસિઃ ॥ ૧૦.૦૭૯.૦૬
વિષૂચો અશ્વાન્યુયુજે વનેજા ઋજીતિભી રશનાભિર્ગૃભીતાન્ ।
ચક્ષદે મિત્રો વસુભિઃ સુજાતઃ સમાનૃધે પર્વભિર્વાવૃધાનઃ ॥ ૧૦.૦૭૯.૦૭

અગ્નિઃ સપ્તિં વાજમ્ભરં દદાત્યગ્નિર્વીરં શ્રુત્યં કર્મનિઃષ્ઠામ્ ।
અગ્ની રોદસી વિ ચરત્સમઞ્જન્નગ્નિર્નારીં વીરકુક્ષિં પુરંધિમ્ ॥ ૧૦.૦૮૦.૦૧
અગ્નેરપ્નસઃ સમિદસ્તુ ભદ્રાગ્નિર્મહી રોદસી આ વિવેશ ।
અગ્નિરેકં ચોદયત્સમત્સ્વગ્નિર્વૃત્રાણિ દયતે પુરૂણિ ॥ ૧૦.૦૮૦.૦૨

અગ્નિર્હ ત્યં જરતઃ કર્ણમાવાગ્નિરદ્ભ્યો નિરદહજ્જરૂથમ્ ।
અગ્નિરત્રિં ઘર્મ ઉરુષ્યદન્તરગ્નિર્નૃમેધં પ્રજયાસૃજત્સમ્ ॥ ૧૦.૦૮૦.૦૩
અગ્નિર્દાદ્દ્રવિણં વીરપેશા અગ્નિરૃષિં યઃ સહસ્રા સનોતિ ।
અગ્નિર્દિવિ હવ્યમા તતાનાગ્નેર્ધામાનિ વિભૃતા પુરુત્રા ॥ ૧૦.૦૮૦.૦૪
અગ્નિમુક્થૈરૃષયો વિ હ્વયન્તેઽગ્નિં નરો યામનિ બાધિતાસઃ ।
અગ્નિં વયો અન્તરિક્ષે પતન્તોઽગ્નિઃ સહસ્રા પરિ યાતિ ગોનામ્ ॥ ૧૦.૦૮૦.૦૫
અગ્નિં વિશ ઈળતે માનુષીર્યા અગ્નિં મનુષો નહુષો વિ જાતાઃ ।
અગ્નિર્ગાન્ધર્વીં પથ્યામૃતસ્યાગ્નેર્ગવ્યૂતિર્ઘૃત આ નિષત્તા ॥ ૧૦.૦૮૦.૦૬
અગ્નયે બ્રહ્મ ઋભવસ્તતક્ષુરગ્નિં મહામવોચામા સુવૃક્તિમ્ ।
અગ્ને પ્રાવ જરિતારં યવિષ્ઠાગ્ને મહિ દ્રવિણમા યજસ્વ ॥ ૧૦.૦૮૦.૦૭

ય ઇમા વિશ્વા ભુવનાનિ જુહ્વદૃષિર્હોતા ન્યસીદત્પિતા નઃ ।
સ આશિષા દ્રવિણમિચ્છમાનઃ પ્રથમચ્છદવરાઁ આ વિવેશ ॥ ૧૦.૦૮૧.૦૧
કિં સ્વિદાસીદધિષ્ઠાનમારમ્ભણં કતમત્સ્વિત્કથાસીત્ ।
યતો ભૂમિં જનયન્વિશ્વકર્મા વિ દ્યામૌર્ણોન્મહિના વિશ્વચક્ષાઃ ॥ ૧૦.૦૮૧.૦૨
વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોબાહુરુત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં ધમતિ સં પતત્રૈર્દ્યાવાભૂમી જનયન્દેવ એકઃ ॥ ૧૦.૦૮૧.૦૩
કિં સ્વિદ્વનં ક ઉ સ વૃક્ષ આસ યતો દ્યાવાપૃથિવી નિષ્ટતક્ષુઃ ।
મનીષિણો મનસા પૃચ્છતેદુ તદ્યદધ્યતિષ્ઠદ્ભુવનાનિ ધારયન્ ॥ ૧૦.૦૮૧.૦૪
યા તે ધામાનિ પરમાણિ યાવમા યા મધ્યમા વિશ્વકર્મન્નુતેમા ।
શિક્ષા સખિભ્યો હવિષિ સ્વધાવઃ સ્વયં યજસ્વ તન્વં વૃધાનઃ ॥ ૧૦.૦૮૧.૦૫
વિશ્વકર્મન્હવિષા વાવૃધાનઃ સ્વયં યજસ્વ પૃથિવીમુત દ્યામ્ ।
મુહ્યન્ત્વન્યે અભિતો જનાસ ઇહાસ્માકં મઘવા સૂરિરસ્તુ ॥ ૧૦.૦૮૧.૦૬
વાચસ્પતિં વિશ્વકર્માણમૂતયે મનોજુવં વાજે અદ્યા હુવેમ ।
સ નો વિશ્વાનિ હવનાનિ જોષદ્વિશ્વશમ્ભૂરવસે સાધુકર્મા ॥ ૧૦.૦૮૧.૦૭

ચક્ષુષઃ પિતા મનસા હિ ધીરો ઘૃતમેને અજનન્નમ્નમાને ।
યદેદન્તા અદદૃહન્ત પૂર્વ આદિદ્દ્યાવાપૃથિવી અપ્રથેતામ્ ॥ ૧૦.૦૮૨.૦૧
વિશ્વકર્મા વિમના આદ્વિહાયા ધાતા વિધાતા પરમોત સંદૃક્ ।

તેષામિષ્ટાનિ સમિષા મદન્તિ યત્રા સપ્તઋષીન્પર એકમાહુઃ ॥ ૧૦.૦૮૨.૦૨
યો નઃ પિતા જનિતા યો વિધાતા ધામાનિ વેદ ભુવનાનિ વિશ્વા ।
યો દેવાનાં નામધા એક એવ તં સમ્પ્રશ્નં ભુવના યન્ત્યન્યા ॥ ૧૦.૦૮૨.૦૩
ત આયજન્ત દ્રવિણં સમસ્મા ઋષયઃ પૂર્વે જરિતારો ન ભૂના ।
અસૂર્તે સૂર્તે રજસિ નિષત્તે યે ભૂતાનિ સમકૃણ્વન્નિમાનિ ॥ ૧૦.૦૮૨.૦૪
પરો દિવા પર એના પૃથિવ્યા પરો દેવેભિરસુરૈર્યદસ્તિ ।
કં સ્વિદ્ગર્ભં પ્રથમં દધ્ર આપો યત્ર દેવાઃ સમપશ્યન્ત વિશ્વે ॥ ૧૦.૦૮૨.૦૫
તમિદ્ગર્ભં પ્રથમં દધ્ર આપો યત્ર દેવાઃ સમગચ્છન્ત વિશ્વે ।
અજસ્ય નાભાવધ્યેકમર્પિતં યસ્મિન્વિશ્વાનિ ભુવનાનિ તસ્થુઃ ॥ ૧૦.૦૮૨.૦૬
ન તં વિદાથ ય ઇમા જજાનાન્યદ્યુષ્માકમન્તરં બભૂવ ।
નીહારેણ પ્રાવૃતા જલ્પ્યા ચાસુતૃપ ઉક્થશાસશ્ચરન્તિ ॥ ૧૦.૦૮૨.૦૭
યસ્તે મન્યોઽવિધદ્વજ્ર સાયક સહ ઓજઃ પુષ્યતિ વિશ્વમાનુષક્ ।
સાહ્યામ દાસમાર્યં ત્વયા યુજા સહસ્કૃતેન સહસા સહસ્વતા ॥ ૧૦.૦૮૩.૦૧
મન્યુરિન્દ્રો મન્યુરેવાસ દેવો મન્યુર્હોતા વરુણો જાતવેદાઃ ।
મન્યું વિશ ઈળતે માનુષીર્યાઃ પાહિ નો મન્યો તપસા સજોષાઃ ॥ ૧૦.૦૮૩.૦૨
અભીહિ મન્યો તવસસ્તવીયાન્તપસા યુજા વિ જહિ શત્રૂન્ ।
અમિત્રહા વૃત્રહા દસ્યુહા ચ વિશ્વા વસૂન્યા ભરા ત્વં નઃ ॥ ૧૦.૦૮૩.૦૩
ત્વં હિ મન્યો અભિભૂત્યોજાઃ સ્વયમ્ભૂર્ભામો અભિમાતિષાહઃ ।
વિશ્વચર્ષણિઃ સહુરિઃ સહાવાનસ્માસ્વોજઃ પૃતનાસુ ધેહિ ॥ ૧૦.૦૮૩.૦૪
અભાગઃ સન્નપ પરેતો અસ્મિ તવ ક્રત્વા તવિષસ્ય પ્રચેતઃ ।
તં ત્વા મન્યો અક્રતુર્જિહીળાહં સ્વા તનૂર્બલદેયાય મેહિ ॥ ૧૦.૦૮૩.૦૫
અયં તે અસ્મ્યુપ મેહ્યર્વાઙ્પ્રતીચીનઃ સહુરે વિશ્વધાયઃ ।
મન્યો વજ્રિન્નભિ મામા વવૃત્સ્વ હનાવ દસ્યૂઁરુત બોધ્યાપેઃ ॥ ૧૦.૦૮૩.૦૬
અભિ પ્રેહિ દક્ષિણતો ભવા મેઽધા વૃત્રાણિ જઙ્ઘનાવ ભૂરિ ।
જુહોમિ તે ધરુણં મધ્વો અગ્રમુભા ઉપાંશુ પ્રથમા પિબાવ ॥ ૧૦.૦૮૩.૦૭
ત્વયા મન્યો સરથમારુજન્તો હર્ષમાણાસો ધૃષિતા મરુત્વઃ ।
તિગ્મેષવ આયુધા સંશિશાના અભિ પ્ર યન્તુ નરો અગ્નિરૂપાઃ ॥ ૧૦.૦૮૪.૦૧

અગ્નિરિવ મન્યો ત્વિષિતઃ સહસ્વ સેનાનીર્નઃ સહુરે હૂત એધિ ।
હત્વાય શત્રૂન્વિ ભજસ્વ વેદ ઓજો મિમાનો વિ મૃધો નુદસ્વ ॥ ૧૦.૦૮૪.૦૨
સહસ્વ મન્યો અભિમાતિમસ્મે રુજન્મૃણન્પ્રમૃણન્પ્રેહિ શત્રૂન્ ।
ઉગ્રં તે પાજો નન્વા રુરુધ્રે વશી વશં નયસ એકજ ત્વમ્ ॥ ૧૦.૦૮૪.૦૩
એકો બહૂનામસિ મન્યવીળિતો વિશંવિશં યુધયે સં શિશાધિ ।
અકૃત્તરુક્ત્વયા યુજા વયં દ્યુમન્તં ઘોષં વિજયાય કૃણ્મહે ॥ ૧૦.૦૮૪.૦૪
વિજેષકૃદિન્દ્ર ઇવાનવબ્રવોઽસ્માકં મન્યો અધિપા ભવેહ ।
પ્રિયં તે નામ સહુરે ગૃણીમસિ વિદ્મા તમુત્સં યત આબભૂથ ॥ ૧૦.૦૮૪.૦૫
આભૂત્યા સહજા વજ્ર સાયક સહો બિભર્ષ્યભિભૂત ઉત્તરમ્ ।
ક્રત્વા નો મન્યો સહ મેદ્યેધિ મહાધનસ્ય પુરુહૂત સંસૃજિ ॥ ૧૦.૦૮૪.૦૬
સંસૃષ્ટં ધનમુભયં સમાકૃતમસ્મભ્યં દત્તાં વરુણશ્ચ મન્યુઃ ।
ભિયં દધાના હૃદયેષુ શત્રવઃ પરાજિતાસો અપ નિ લયન્તામ્ ॥ ૧૦.૦૮૪.૦૭
સત્યેનોત્તભિતા ભૂમિઃ સૂર્યેણોત્તભિતા દ્યૌઃ ।
ઋતેનાદિત્યાસ્તિષ્ઠન્તિ દિવિ સોમો અધિ શ્રિતઃ ॥ ૧૦.૦૮૫.૦૧
સોમેનાદિત્યા બલિનઃ સોમેન પૃથિવી મહી ।
અથો નક્ષત્રાણામેષામુપસ્થે સોમ આહિતઃ ॥ ૧૦.૦૮૫.૦૨
સોમં મન્યતે પપિવાન્યત્સમ્પિંષન્ત્યોષધિમ્ ।
સોમં યં બ્રહ્માણો વિદુર્ન તસ્યાશ્નાતિ કશ્ચન ॥ ૧૦.૦૮૫.૦૩
આચ્છદ્વિધાનૈર્ગુપિતો બાર્હતૈઃ સોમ રક્ષિતઃ ।
ગ્રાવ્ણામિચ્છૃણ્વન્તિષ્ઠસિ ન તે અશ્નાતિ પાર્થિવઃ ॥ ૧૦.૦૮૫.૦૪
યત્ત્વા દેવ પ્રપિબન્તિ તત આ પ્યાયસે પુનઃ ।
વાયુઃ સોમસ્ય રક્ષિતા સમાનાં માસ આકૃતિઃ ॥ ૧૦.૦૮૫.૦૫
રૈભ્યાસીદનુદેયી નારાશંસી ન્યોચની ।
સૂર્યાયા ભદ્રમિદ્વાસો ગાથયૈતિ પરિષ્કૃતમ્ ॥ ૧૦.૦૮૫.૦૬
ચિત્તિરા ઉપબર્હણં ચક્ષુરા અભ્યઞ્જનમ્ ।
દ્યૌર્ભૂમિઃ કોશ આસીદ્યદયાત્સૂર્યા પતિમ્ ॥ ૧૦.૦૮૫.૦૭
સ્તોમા આસન્પ્રતિધયઃ કુરીરં છન્દ ઓપશઃ ।

સૂર્યાયા અશ્વિના વરાગ્નિરાસીત્પુરોગવઃ ॥ ૧૦.૦૮૫.૦૮
સોમો વધૂયુરભવદશ્વિનાસ્તામુભા વરા ।
સૂર્યાં યત્પત્યે શંસન્તીં મનસા સવિતાદદાત્ ॥ ૧૦.૦૮૫.૦૯
મનો અસ્યા અન આસીદ્યૌરાસીદુત ચ્છદિઃ ।
શુક્રાવનડ્વાહાવાસ્તાં યદયાત્સૂર્યા ગૃહમ્ ॥ ૧૦.૦૮૫.૧૦
ઋક્સામાભ્યામભિહિતૌ ગાવૌ તે સામનાવિતઃ ।
શ્રોત્રં તે ચક્રે આસ્તાં દિવિ પન્થાશ્ચરાચારઃ ॥ ૧૦.૦૮૫.૧૧
શુચી તે ચક્રે યાત્યા વ્યાનો અક્ષ આહતઃ ।
અનો મનસ્મયં સૂર્યારોહત્પ્રયતી પતિમ્ ॥ ૧૦.૦૮૫.૧૨
સૂર્યાયા વહતુઃ પ્રાગાત્સવિતા યમવાસૃજત્ ।
અઘાસુ હન્યન્તે ગાવોઽર્જુન્યોઃ પર્યુહ્યતે ॥ ૧૦.૦૮૫.૧૩
યદશ્વિના પૃચ્છમાનાવયાતં ત્રિચક્રેણ વહતું સૂર્યાયાઃ ।
વિશ્વે દેવા અનુ તદ્વામજાનન્પુત્રઃ પિતરાવવૃણીત પૂષા ॥ ૧૦.૦૮૫.૧૪
યદયાતં શુભસ્પતી વરેયં સૂર્યામુપ ।
ક્વૈકં ચક્રં વામાસીત્ક્વ દેષ્ટ્રાય તસ્થથુઃ ॥ ૧૦.૦૮૫.૧૫
દ્વે તે ચક્રે સૂર્યે બ્રહ્માણ ઋતુથા વિદુઃ ।
અથૈકં ચક્રં યદ્ગુહા તદદ્ધાતય ઇદ્વિદુઃ ॥ ૧૦.૦૮૫.૧૬
સૂર્યાયૈ દેવેભ્યો મિત્રાય વરુણાય ચ ।
યે ભૂતસ્ય પ્રચેતસ ઇદં તેભ્યોઽકરં નમઃ ॥ ૧૦.૦૮૫.૧૭
પૂર્વાપરં ચરતો માયયૈતૌ શિશૂ ક્રીળન્તૌ પરિ યાતો અધ્વરમ્ ।
વિશ્વાન્યન્યો ભુવનાભિચષ્ટ ઋતૂँરન્યો વિદધજ્જાયતે પુનઃ ॥ ૧૦.૦૮૫.૧૮
નવોનવો ભવતિ જાયમાનોઽહ્નાં કેતુરુષસામેત્યગ્રમ્ ।
ભાગં દેવેભ્યો વિ દધાત્યાયન્પ્ર ચન્દ્રમાસ્તિરતે દીર્ઘમાયુઃ ॥ ૧૦.૦૮૫.૧૯
સુકિંશુકં શલ્મલિં વિશ્વરૂપં હિરણ્યવર્ણં સુવૃતં સુચક્રમ્ ।
આ રોહ સૂર્યે અમૃતસ્ય લોકં સ્યોનં પત્યે વહતું કૃણુષ્વ ॥ ૧૦.૦૮૫.૨૦
ઉદીર્ષ્વાતઃ પતિવતી હ્યેઽષા વિશ્વાવસું નમસા ગીર્ભિરીળે ।
અન્યામિચ્છ પિતૃષદં વ્યક્તાં સ તે ભાગો જનુષા તસ્ય વિદ્ધિ ॥ ૧૦.૦૮૫.૨૧

ઉદીર્ષ્વાતો વિશ્વાવસો નમસેળા મહે ત્વા ।
અન્યામિચ્છ પ્રફર્વ્યં૧ સં જાયાં પત્યા સૃજ ॥ ૧૦.૦૮૫.૨૨
અનૃક્ષરા ઋજવઃ સન્તુ પન્થા યેભિઃ સખાયો યન્તિ નો વરેયમ્ ।
સમર્યમા સં ભગો નો નિનીયાત્સં જાસ્પત્યં સુયમમસ્તુ દેવાઃ ॥ ૧૦.૦૮૫.૨૩
પ્ર ત્વા મુઞ્ચામિ વરુણસ્ય પાશાદ્યેન ત્વાબધ્નાત્સવિતા સુશેવઃ ।
ઋતસ્ય યોનૌ સુકૃતસ્ય લોકેઽરિષ્ટાં ત્વા સહ પત્યા દધામિ ॥ ૧૦.૦૮૫.૨૪
પ્રેતો મુઞ્ચામિ નામુતઃ સુબદ્ધામમુતસ્કરમ્ ।
યથેયમિન્દ્ર મીઢ્વઃ સુપુત્રા સુભગાસતિ ॥ ૧૦.૦૮૫.૨૫
પૂષા ત્વેતો નયતુ હસ્તગૃહ્યાશ્વિના ત્વા પ્ર વહતાં રથેન ।
ગૃહાન્ગચ્છ ગૃહપત્ની યથાસો વશિની ત્વં વિદથમા વદાસિ ॥ ૧૦.૦૮૫.૨૬
ઇહ પ્રિયં પ્રજયા તે સમૃધ્યતામસ્મિન્ગૃહે ગાર્હપત્યાય જાગૃહિ ।
એના પત્યા તન્વં૧ સં સૃજસ્વાધા જિવ્રી વિદથમા વદાથઃ ॥ ૧૦.૦૮૫.૨૭
નીલલોહિતં ભવતિ કૃત્યાસક્તિર્વ્યજ્યતે ।
એધન્તે અસ્યા જ્ઞાતયઃ પતિર્બન્ધેષુ બધ્યતે ॥ ૧૦.૦૮૫.૨૮
પરા દેહિ શામુલ્યં બ્રહ્મભ્યો વિ ભજા વસુ ।
કૃત્યૈષા પદ્વતી ભૂત્વ્યા જાયા વિશતે પતિમ્ ॥ ૧૦.૦૮૫.૨૯
અશ્રીરા તનૂર્ભવતિ રુશતી પાપયામુયા ।
પતિર્યદ્વધ્વો૩ વાસસા સ્વમઙ્ગમભિધિત્સતે ॥ ૧૦.૦૮૫.૩૦
યે વધ્વશ્ચન્દ્રં વહતું યક્ષ્મા યન્તિ જનાદનુ ।
પુનસ્તાન્યજ્ઞિયા દેવા નયન્તુ યત આગતાઃ ॥ ૧૦.૦૮૫.૩૧
મા વિદન્પરિપન્થિનો ય આસીદન્તિ દમ્પતી ।
સુગેભિર્દુર્ગમતીતામપ દ્રાન્ત્વરાતયઃ ॥ ૧૦.૦૮૫.૩૨
સુમઙ્ગલીરિયં વધૂરિમાં સમેત પશ્યત ।
સૌભાગ્યમસ્યૈ દત્ત્વાયાથાસ્તં વિ પરેતન ॥ ૧૦.૦૮૫.૩૩
તૃષ્ટમેતત્કટુકમેતદપાષ્ઠવદ્વિષવન્નૈતદત્તવે ।
સૂર્યાં યો બ્રહ્મા વિદ્યાત્સ ઇદ્વાધૂયમર્હતિ ॥ ૧૦.૦૮૫.૩૪
આશસનં વિશસનમથો અધિવિકર્તનમ્ ।

સૂર્યાયાઃ પશ્ય રૂપાણિ તાનિ બ્રહ્મા તુ શુન્ધતિ ॥ ૧૦.૦૮૫.૩૫

ગૃભ્ણામિ તે સૌભગત્વાય હસ્તં મયા પત્યા જરદષ્ટિર્યથાસઃ ।

ભગો અર્યમા સવિતા પુરંધિર્મહ્યં ત્વાદુર્ગાર્હપત્યાય દેવાઃ ॥ ૧૦.૦૮૫.૩૬

તાં પૂષઞ્છિવતમામેરયસ્વ યસ્યાં બીજં મનુષ્યાઉ વપન્તિ ।

યા ન ઊરૂ ઉશતી વિશ્રયાતે યસ્યામુશન્તઃ પ્રહરામ શેપમ્ ॥ ૧૦.૦૮૫.૩૭

તુભ્યમગ્રે પર્યવહન્સૂર્યાં વહતુના સહ ।

પુનઃ પતિભ્યો જાયાં દા અગ્ને પ્રજયા સહ ॥ ૧૦.૦૮૫.૩૮

પુનઃ પત્નીમગ્નિરદાદાયુષા સહ વર્ચસા ।

દીર્ઘાયુરસ્યા યઃ પતિર્જીવાતિ શરદઃ શતમ્ ॥ ૧૦.૦૮૫.૩૯

સોમઃ પ્રથમો વિવિદે ગન્ધર્વો વિવિદ ઉત્તરઃ ।

તૃતીયો અગ્નિષ્ટે પતિસ્તુરીયસ્તે મનુષ્યજાઃ ॥ ૧૦.૦૮૫.૪૦

સોમો દદદ્ગન્ધર્વાય ગન્ધર્વો દદદગ્નયે ।

રયિં ચ પુત્રાઁશ્ચાદાદગ્નિર્મહ્યમથો ઇમામ્ ॥ ૧૦.૦૮૫.૪૧

ઇહૈવ સ્તં મા વિ યૌષ્ટં વિશ્વમાયુર્વ્યશ્નુતમ્ ।

ક્રીળન્તૌ પુત્રૈર્નપ્તૃભિર્મોદમાનૌ સ્વે ગૃહે ॥ ૧૦.૦૮૫.૪૨

આ નઃ પ્રજાં જનયતુ પ્રજાપતિરાજરસાય સમનક્ત્વર્યમા ।

અદુર્મઙ્ગલીઃ પતિલોકમા વિશ શં નો ભવ દ્વિપદે શં ચતુષ્પદે ॥ ૧૦.૦૮૫.૪૩

અઘોરચક્ષુરપતિઘ્ન્યેધિ શિવા પશુભ્યઃ સુમનાઃ સુવર્ચાઃ ।

વીરસૂર્દેવકામા સ્યોના શં નો ભવ દ્વિપદે શં ચતુષ્પદે ॥ ૧૦.૦૮૫.૪૪

ઇમાં ત્વમિન્દ્ર મીઢ્વઃ સુપુત્રાં સુભગાં કૃણુ ।

દશાસ્યાં પુત્રાના ધેહિ પતિમેકાદશં કૃધિ ॥ ૧૦.૦૮૫.૪૫

સમ્રાજ્ઞી શ્વશુરે ભવ સમ્રાજ્ઞી શ્વશ્ર્વાં ભવ ।

નનાન્દરિ સમ્રાજ્ઞી ભવ સમ્રાજ્ઞી અધિ દેવૃષુ ॥ ૧૦.૦૮૫.૪૬

સમઞ્જન્તુ વિશ્વે દેવાઃ સમાપો હૃદયાનિ નૌ ।

સં માતરિશ્વા સં ધાતા સમુ દેષ્ટ્રી દધાતુ નૌ ॥ ૧૦.૦૮૫.૪૭

વિ હિ સોતોરસૃક્ષત નેન્દ્રં દેવમમંસત ।

યત્રામદદ્વૃષાકપિરર્યઃ પુષ્ટેષુ મત્સખા વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૧

પરા હીન્દ્ર ધાવસિ વૃષાકપેરતિ વ્યથિઃ ।
નો અહ પ્ર વિન્દસ્યન્યત્ર સોમપીતયે વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૨
કિમયં ત્વાં વૃષાકપિશ્ચકાર હરિતો મૃગઃ ।
યસ્મા ઇરસ્યસીદુ ન્વર્યો વા પુષ્ટિમદ્વસુ વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૩
યમિમં ત્વં વૃષાકપિં પ્રિયમિન્દ્રાભિરક્ષસિ ।
શ્વા ન્વસ્ય જમ્ભિષદપિ કર્ણે વરાહયુર્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૪
પ્રિયા તષ્ટાનિ મે કપિર્વ્યક્તા વ્યદૂદુષત્ ।
શિરો ન્વસ્ય રાવિષં ન સુગં દુષ્કૃતે ભુવં વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૫
ન મત્સ્ત્રી સુભસત્તરા ન સુયાશુતરા ભુવત્ ।
ન મત્પ્રતિચ્યવીયસી ન સક્થ્યુદ્યમીયસી વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૬
ઉવે અમ્બ સુલાભિકે યથેવાઙ્ગ ભવિષ્યતિ ।
ભસન્મે અમ્બ સક્થિ મે શિરો મે વીવ હૃષ્યતિ વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૭
કિં સુબાહો સ્વઙ્ગુરે પૃથુષ્ટો પૃથુજાઘને ।
કિં શૂરપત્નિ નસ્ત્વમભ્યમીષિ વૃષાકપિં વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૮
અવીરામિવ મામયં શરારુરભિ મન્યતે ।
ઉતાહમસ્મિ વીરિણીન્દ્રપત્ની મરુત્સખા વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૦૯
સંહોત્રં સ્મ પુરા નારી સમનં વાવ ગચ્છતિ ।
વેધા ઋતસ્ય વીરિણીન્દ્રપત્ની મહીયતે વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૦
ઇન્દ્રાણીમાસુ નારિષુ સુભગામહમશ્રવમ્ ।
નહ્યસ્યા અપરં ચન જરસા મરતે પતિર્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૧
નાહમિન્દ્રાણિ રારણ સખ્યુર્વૃષાકપેરૃતે ।
યસ્યેદમપ્યં હવિઃ પ્રિયં દેવેષુ ગચ્છતિ વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૨
વૃષાકપાયિ રેવતિ સુપુત્ર આદુ સુસ્નુષે ।
ઘસત્ત ઇન્દ્ર ઉક્ષણઃ પ્રિયં કાચિત્કરં હવિર્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૩
ઉક્ષ્ણો હિ મે પઞ્ચદશ સાકં પચન્તિ વિંશતિમ્ ।
ઉતાહમદ્મિ પીવ ઇદુભા કુક્ષી પૃણન્તિ મે વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૪
વૃષભો ન તિગ્મશૃઙ્ગોઽન્તર્યૂથેષુ રોરુવત્ ।

મન્થસ્ત ઇન્દ્ર શં હૃદે યં તે સુનોતિ ભાવયુર્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૫
ન સેશે યસ્ય રમ્બતેઽન્તરા સક્થ્યા૩ કપૃત્ ।
સેદીશે યસ્ય રોમશં નિષેદુષો વિજૃમ્ભતે વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૬
ન સેશે યસ્ય રોમશં નિષેદુષો વિજૃમ્ભતે ।
સેદીશે યસ્ય રમ્બતેઽન્તરા સક્થ્યા૩ કપૃદ્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૭
અયમિન્દ્ર વૃષાકપિઃ પરસ્વન્તં હતં વિદત્ ।
અસિં સૂનાં નવં ચરુમાદેધસ્યાન આચિતં વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૮
અયમેમિ વિચાકશદ્વિચિન્વન્દાસમાર્યમ્ ।
પિબામિ પાકસુત્વનોઽભિ ધીરમચાકશં વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૧૯
ધન્વ ચ યત્કૃન્તત્રં ચ કતિ સ્વિત્તા વિ યોજના ।
નેદીયસો વૃષાકપેઽસ્તમેહિ ગૃહાઁ ઉપ વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૨૦
પુનરેહિ વૃષાકપે સુવિતા કલ્પયાવહૈ ।
ય એષ સ્વપ્નનંશનોઽસ્તમેષિ પથા પુનર્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૨૧
યદુદઞ્ચો વૃષાકપે ગૃહમિન્દ્રાજગન્તન ।
ક્વ૧ સ્ય પુલ્વઘો મૃગઃ કમગઞ્જનયોપનો વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૨૨
પર્શુર્હ નામ માનવી સાકં સસૂવ વિંશતિમ્ ।
ભદ્રં ભલ ત્યસ્યા અભૂદ્યસ્યા ઉદરમામયદ્વિશ્વસ્માદિન્દ્ર ઉત્તરઃ ॥ ૧૦.૦૮૬.૨૩
રક્ષોહણં વાજિનમા જિઘર્મિ મિત્રં પ્રથિષ્ઠમુપ યામિ શર્મ ।
શિશાનો અગ્નિઃ ક્રતુભિઃ સમિદ્ધઃ સ નો દિવા સ રિષઃ પાતુ નક્તમ્ ॥ ૧૦.૦૮૭.૦૧
અયોદંષ્ટ્રો અર્ચિષા યાતુધાનાનુપ સ્પૃશ જાતવેદઃ સમિદ્ધઃ ।
આ જિહ્વયા મૂરદેવાન્રભસ્વ ક્રવ્યાદો વૃક્ત્વ્યપિ ધત્સ્વાસન્ ॥ ૧૦.૦૮૭.૦૨
ઉભોભયાવિન્નુપ ધેહિ દંષ્ટ્રા હિંસ્રઃ શિશાનોઽવરં પરં ચ ।
ઉતાન્તરિક્ષે પરિ યાહિ રાજઞ્જમ્ભૈઃ સં ધેહ્યભિ યાતુધાનાન્ ॥ ૧૦.૦૮૭.૦૩
યજ્ઞૈરિષૂઃ સંનમમાનો અગ્ને વાચા શલ્યાઁ અશનિભિર્દિહાનઃ ।
તાભિર્વિધ્ય હૃદયે યાતુધાનાન્પ્રતીચો બાહૂન્પ્રતિ ભઙ્ધ્યેષામ્ ॥ ૧૦.૦૮૭.૦૪
અગ્ને ત્વચં યાતુધાનસ્ય ભિન્ધિ હિંસ્રાશનિર્હરસા હન્ત્વેનમ્ ।
પ્ર પર્વાણિ જાતવેદઃ શ઼ૃણીહિ ક્રવ્યાત્ક્રવિષ્ણુર્વિ ચિનોતુ વૃક્ણમ્ ॥ ૧૦.૦૮૭.૦૫

યત્રેદાનીં પશ્યસિ જાતવેદસ્તિષ્ઠન્તમગ્ન ઉત વા ચરન્તમ્ ।
યદ્વાન્તરિક્ષે પથિભિઃ પતન્તં તમસ્તા વિધ્ય શર્વા શિશાનઃ ॥ ૧૦.૦૮૭.૦૬
ઉતાલબ્ધં સ્પૃણુહિ જાતવેદ આલેભાનાદૃષ્ટિભિર્યાતુધાનાત્ ।
અગ્ને પૂર્વો નિ જહિ શોશુચાન આમાદઃ ક્ષ્વિઙ્કાસ્તમદન્ત્વેનીઃ ॥ ૧૦.૦૮૭.૦૭
ઇહ પ્ર બ્રૂહિ યતમઃ સો અગ્ને યો યાતુધાનો ય ઇદં કૃણોતિ ।
તમા રભસ્વ સમિધા યવિષ્ઠ નૃચક્ષસશ્ચક્ષુષે રન્ધયૈનમ્ ॥ ૧૦.૦૮૭.૦૮
તીક્ષ્ણેનાગ્ને ચક્ષુષા રક્ષ યજ્ઞં પ્રાઞ્ચં વસુભ્યઃ પ્ર ણય પ્રચેતઃ ।
હિંસ્રં રક્ષાંસ્યભિ શોશુચાનં મા ત્વા દભન્યાતુધાના નૃચક્ષઃ ॥ ૧૦.૦૮૭.૦૯
નૃચક્ષા રક્ષઃ પરિ પશ્ય વિક્ષુ તસ્ય ત્રીણિ પ્રતિ શ઼ૃણીહ્યગ્રા ।
તસ્યાગ્ને પૃષ્ટીર્હરસા શ઼ૃણીહિ ત્રેધા મૂલં યાતુધાનસ્ય વૃશ્ચ ॥ ૧૦.૦૮૭.૧૦
ત્રિર્યાતુધાનઃ પ્રસિતિં ત એત્વૃતં યો અગ્ને અનૃતેન હન્તિ ।
તમર્ચિષા સ્ફૂર્જયઞ્જાતવેદઃ સમક્ષમેનં ગૃણતે નિ વૃઙ્ધિ ॥ ૧૦.૦૮૭.૧૧
તદગ્ને ચક્ષુઃ પ્રતિ ધેહિ રેભે શફારુજં યેન પશ્યસિ યાતુધાનમ્ ।
અથર્વવજ્જ્યોતિષા દૈવ્યેન સત્યં ધૂર્વન્તમચિતં ન્યોષ ॥ ૧૦.૦૮૭.૧૨
યદગ્ને અદ્ય મિથુના શપાતો યદ્વાચસ્તૃષ્ટં જનયન્ત રેભાઃ ।
મન્યોર્મનસઃ શરવ્યાउ જાયતે યા તયા વિધ્ય હૃદયે યાતુધાનાન્ ॥ ૧૦.૦૮૭.૧૩
પરા શ઼ૃણીહિ તપસા યાતુધાનાન્પરાગ્ને રક્ષો હરસા શ઼ૃણીહિ ।
પરાર્ચિષા મૂરદેવાઞ્છૃણીહિ પરાસુતૃપો અભિ શોશુચાનઃ ॥ ૧૦.૦૮૭.૧૪
પરાદ્ય દેવા વૃજિનં શ઼ૃણન્તુ પ્રત્યગેનં શપથા યન્તુ તૃષ્ટાઃ ।
વાચાસ્તેનં શરવ ઋચ્છન્તુ મર્મન્વિશ્વસ્યૈતુ પ્રસિતિં યાતુધાનઃ ॥ ૧૦.૦૮૭.૧૫
યઃ પૌરુષેયેણ ક્રવિષા સમઙ્ક્તે યો અશ્વ્યેન પશુના યાતુધાનઃ ।
યો અઘ્ન્યાયા ભરતિ ક્ષીરમગ્ને તેષાં શીર્ષાણિ હરસાપિ વૃશ્ચ ॥ ૧૦.૦૮૭.૧૬
સંવત્સરીણં પય ઉસ્રિયાયાસ્તસ્ય માશીદ્યાતુધાનો નૃચક્ષઃ ।
પીયૂષમગ્ને યતમસ્તિતૃપ્સાત્તં પ્રત્યઞ્ચમર્ચિષા વિધ્ય મર્મન્ ॥ ૧૦.૦૮૭.૧૭
વિષં ગવાં યાતુધાનાઃ પિબન્ત્વા વૃશ્ચ્યન્તામદિતયે દુરેવાઃ ।
પરૈનાન્દેવઃ સવિતા દદાતુ પરા ભાગમોષધીનાં જયન્તામ્ ॥ ૧૦.૦૮૭.૧૮
સનાદગ્ને મૃણસિ યાતુધાનાન્ન ત્વા રક્ષાંસિ પૃતનાસુ જિગ્યુઃ ।

અનુ દહ સહમૂરાન્ક્રવ્યાદો મા તે હેત્યા મુક્ષત દૈવ્યાયાઃ ॥ ૧૦.૦૮૭.૧૯
ત્વં નો અગ્ને અધરાદુદક્તાત્ત્વં પશ્ચાદુત રક્ષા પુરસ્તાત્ ।
પ્રતિ તે તે અજરાસસ્તપિષ્ઠા અઘશંસં શોશુચતો દહન્તુ ॥ ૧૦.૦૮૭.૨૦
પશ્ચાત્પુરસ્તાદધરાદુદક્તાત્કવિઃ કાવ્યેન પરિ પાહિ રાજન્ ।
સખે સખાયમજરો જરિમ્ણેઽગ્ને મર્તાઁ અમર્ત્યસ્ત્વં નઃ ॥ ૧૦.૦૮૭.૨૧
પરિ ત્વાગ્ને પુરં વયં વિપ્રં સહસ્ય ધીમહિ ।
ધૃષદ્વર્ણં દિવેદિવે હન્તારં ભઙ્ગુરાવતામ્ ॥ ૧૦.૦૮૭.૨૨
વિષેણ ભઙ્ગુરાવતઃ પ્રતિ ષ્મ રક્ષસો દહ ।
અગ્ને તિગ્મેન શોચિષા તપુરગ્રાભિરૃષ્ટિભિઃ ॥ ૧૦.૦૮૭.૨૩
પ્રત્યગ્ને મિથુના દહ યાતુધાના કિમીદિના ।
સં ત્વા શિશામિ જાગૃહ્યદબ્ધં વિપ્ર મન્મભિઃ ॥ ૧૦.૦૮૭.૨૪
પ્રત્યગ્ને હરસા હરઃ શૃણીહિ વિશ્વતઃ પ્રતિ ।
યાતુધાનસ્ય રક્ષસો બલં વિ રુજ વીર્યમ્ ॥ ૧૦.૦૮૭.૨૫
હવિષ્પાન્તમજરં સ્વર્વિદિ દિવિસ્પૃશ્યાહુતં જુષ્ટમગ્નૌ ।
તસ્ય ભર્મણે ભુવનાય દેવા ધર્મણે કં સ્વધયા પપ્રથન્ત ॥ ૧૦.૦૮૮.૦૧
ગીર્ણં ભુવનં તમસાપગૂળ્હમાવિઃ સ્વરભવજ્જાતે અગ્નૌ ।
તસ્ય દેવાઃ પૃથિવી દ્યૌરુતાપોઽરણયન્નોષધીઃ સખ્યે અસ્ય ॥ ૧૦.૦૮૮.૦૨
દેવેભિર્ન્વિષિતો યજ્ઞિયેભિરગ્નિં સ્તોષાણ્યજરં બૃહન્તમ્ ।
યો ભાનુના પૃથિવીં દ્યામુતેમામાતતાન રોદસી અન્તરિક્ષમ્ ॥ ૧૦.૦૮૮.૦૩
યો હોતાસીત્પ્રથમો દેવજુષ્ટો યં સમાઞ્જન્નાજ્યેના વૃણાનાઃ ।
સ પતત્રીત્વરં સ્થા જગદ્યચ્છ્વાત્રમગ્નિરકૃણોજ્જાતવેદાઃ ॥ ૧૦.૦૮૮.૦૪
યજ્જાતવેદો ભુવનસ્ય મૂર્ધન્નતિષ્ઠો અગ્ને સહ રોચનેન ।
તં ત્વાહેમ મતિભિર્ગીર્ભિરુક્થૈઃ સ યજ્ઞિયો અભવો રોદસિપ્રાઃ ॥ ૧૦.૦૮૮.૦૫
મૂર્ધા ભુવો ભવતિ નક્તમગ્નિસ્તતઃ સૂર્યો જાયતે પ્રાતરુદ્યન્ ।
માયામૂ તુ યજ્ઞિયાનામેતામપો યત્તૂર્ણિશ્ચરતિ પ્રજાનન્ ॥ ૧૦.૦૮૮.૦૬
દૃશેન્યો યો મહિના સમિદ્ધોઽરોચત દિવિયોનિર્વિભાવા ।
તસ્મિન્નગ્નૌ સૂક્તવાકેન દેવા હવિર્વિશ્વ આજુહવુસ્તનૂપાઃ ॥ ૧૦.૦૮૮.૦૭

સૂક્તવાકં પ્રથમમાદિદગ્નિમાદિદ્ધવિરજનયન્ત દેવાઃ ।
સ એષાં યજ્ઞો અભવત્તનૂપાસ્તં દ્યૌર્વેદ તં પૃથિવી તમાપઃ ॥ ૧૦.૦૮૮.૦૮
યં દેવાસોઽજનયન્તાગ્નિં યસ્મિન્નાજુહવુર્ભુવનાનિ વિશ્વા ।
સો અર્ચિષા પૃથિવીં દ્યામુતેમામૃજૂયમાનો અતપન્મહિત્વા ॥ ૧૦.૦૮૮.૦૯
સ્તોમેન હિ દિવિ દેવાસો અગ્નિમજીજનઞ્છક્તિભી રોદસિપ્રામ્ ।
તમૂ અકૃણ્વન્ત્રેધા ભુવે કં સ ઓષધીઃ પચતિ વિશ્વરૂપાઃ ॥ ૧૦.૦૮૮.૧૦
યદેદેનમદધુર્યજ્ઞિયાસો દિવિ દેવાઃ સૂર્યમાદિતેયમ્ ।
યદા ચરિષ્ણૂ મિથુનાવભૂતામાદિત્પ્રાપશ્યન્ભુવનાનિ વિશ્વા ॥ ૧૦.૦૮૮.૧૧
વિશ્વસ્મા અગ્નિં ભુવનાય દેવા વૈશ્વાનરં કેતુમહ્નામકૃણ્વન્ ।
આ યસ્તતાનોષસો વિભાતીરપો ઊર્ણોતિ તમો અર્ચિષા યન્ ॥ ૧૦.૦૮૮.૧૨
વૈશ્વાનરં કવયો યજ્ઞિયાસોઽગ્નિં દેવા અજનયન્નજુર્યમ્ ।
નક્ષત્રં પ્રત્નમમિનચ્ચરિષ્ણુ યક્ષસ્યાધ્યક્ષં તવિષં બૃહન્તમ્ ॥ ૧૦.૦૮૮.૧૩
વૈશ્વાનરં વિશ્વહા દીદિવાંસં મન્ત્રૈરગ્નિં કવિમચ્છા વદામઃ ।
યો મહિમ્ના પરિબભૂવોર્વી ઉતાવસ્તાદુત દેવઃ પરસ્તાત્ ॥ ૧૦.૦૮૮.૧૪
દ્વે સ્રુતી અશૃણવં પિતૄણામહં દેવાનામુત મર્ત્યાનામ્ ।
તાભ્યામિદં વિશ્વમેજત્સમેતિ યદન્તરા પિતરં માતરં ચ ॥ ૧૦.૦૮૮.૧૫
દ્વે સમીચી બિભૃતશ્ચરન્તં શીર્ષતો જાતં મનસા વિમૃષ્ટમ્ ।
સ પ્રત્યઙ્વિશ્વા ભુવનાનિ તસ્થાવપ્રયુચ્છન્તરણિર્ભ્રાજમાનઃ ॥ ૧૦.૦૮૮.૧૬
યત્રા વદેતે અવરઃ પરશ્ચ યજ્ઞન્યોઃ કતરો નૌ વિ વેદ ।
આ શેકુરિત્સધમાદં સખાયો નક્ષન્ત યજ્ઞં ક ઇદં વિ વોચત્ ॥ ૧૦.૦૮૮.૧૭
કત્યગ્નયઃ કતિ સૂર્યાસઃ કત્યુષાસઃ કત્યુ સ્વિદાપઃ ।
નોપસ્પિજં વઃ પિતરો વદામિ પૃચ્છામિ વઃ કવયો વિદ્મને કમ્ ॥ ૧૦.૦૮૮.૧૮
યાવન્માત્રમુષસો ન પ્રતીકં સુપર્ણ્યો૩ વસતે માતરિશ્વઃ ।
તાવદ્દધાત્યુપ યજ્ઞમાયન્બ્રાહ્મણો હોતુરવરો નિષીદન્ ॥ ૧૦.૦૮૮.૧૯
ઇન્દ્રં સ્તવા નૃતમં યસ્ય મહ્ના વિબબાધે રોચના વિ જ્મો અન્તાન્ ।
આ યઃ પપ્રૌ ચર્ષણીધૃદ્વરોભિઃ પ્ર સિન્ધુભ્યો રિરિચાનો મહિત્વા ॥ ૧૦.૦૮૯.૦૧
સ સૂર્યઃ પર્યુરૂ વરાંસ્યેન્દ્રો વવૃત્યાદ્રથ્યેવ ચક્રા ।

અતિષ્ઠન્તમપસ્યં૧ ન સર્ગં કૃષ્ણા તમાંસિ ત્વિષ્યા જઘાન ॥ ૧૦.૦૮૯.૦૨
સમાનમસ્મા અનપાવૃદર્ચ ક્ષ્મયા દિવો અસમં બ્રહ્મ નવ્યમ્ ।
વિ યઃ પૃષ્ઠેવ જનિમાન્યર્ય ઇન્દ્રશ્ચિકાય ન સખાયમીષે ॥ ૧૦.૦૮૯.૦૩
ઇન્દ્રાય ગિરો અનિશિતસર્ગા અપઃ પ્રેરયં સગરસ્ય બુધ્નાત્ ।
યો અક્ષેણેવ ચક્રિયા શચીભિર્વિષ્વક્તસ્તમ્ભ પૃથિવીમુત દ્યામ્ ॥ ૧૦.૦૮૯.૦૪
આપાન્તમન્યુસ્તૃપલપ્રભર્મા ધુનિઃ શિમીવાઞ્છરુમાઁ ઋજીષી ।
સોમો વિશ્વાન્યતસા વનાનિ નાર્વાગિન્દ્રં પ્રતિમાનાનિ દેભુઃ ॥ ૧૦.૦૮૯.૦૫
ન યસ્ય દ્યાવાપૃથિવી ન ધન્વ નાન્તરિક્ષં નાદ્રયઃ સોમો અક્ષાઃ ।
યદસ્ય મન્યુરધિનીયમાનઃ શ◌ૃણાતિ વીળુ રુજતિ સ્થિરાણિ ॥ ૧૦.૦૮૯.૦૬
જઘાન વૃત્રં સ્વધિતિર્વનેવ રુરોજ પુરો અરદન્ન સિન્ધૂન્ ।
બિભેદ ગિરિં નવમિન્ન કુમ્ભમા ગા ઇન્દ્રો અકૃણુત સ્વયુગ્ભિઃ ॥ ૧૦.૦૮૯.૦૭
ત્વં હ ત્યદૃણયા ઇન્દ્ર ધીરોઽસિર્ન પર્વ વૃજિના શ◌ૃણાસિ ।
પ્ર યે મિત્રસ્ય વરુણસ્ય ધામ યુજં ન જના મિનન્તિ મિત્રમ્ ॥ ૧૦.૦૮૯.૦૮
પ્ર યે મિત્રં પ્રાર્યમણં દુરેવાઃ પ્ર સંગિરઃ પ્ર વરુણં મિનન્તિ ।
ન્ય૧મિત્રેષુ વધમિન્દ્ર તુમ્રં વૃષન્વૃષાણમરુષં શિશીહિ ॥ ૧૦.૦૮૯.૦૯
ઇન્દ્રો દિવ ઇન્દ્ર ઈશે પૃથિવ્યા ઇન્દ્રો અપામિન્દ્ર ઇત્પર્વતાનામ્ ।
ઇન્દ્રો વૃધામિન્દ્ર ઇન્મેધિરાણામિન્દ્રઃ ક્ષેમે યોગે હવ્ય ઇન્દ્રઃ ॥ ૧૦.૦૮૯.૧૦
પ્રાક્તુભ્ય ઇન્દ્રઃ પ્ર વૃધો અહભ્યઃ પ્રાન્તરિક્ષાત્પ્ર સમુદ્રસ્ય ધાસેઃ ।
પ્ર વાતસ્ય પ્રથસઃ પ્ર જ્મો અન્તાત્પ્ર સિન્ધુભ્યો રિરિચે પ્ર ક્ષિતિભ્યઃ ॥ ૧૦.૦૮૯.૧૧
પ્ર શોશુચત્યા ઉષસો ન કેતુરસિન્વા તે વર્તતામિન્દ્ર હેતિઃ ।
અશ્મેવ વિધ્ય દિવ આ સૃજાનસ્તપિષ્ઠેન હેષસા દ્રોઘમિત્રાન્ ॥ ૧૦.૦૮૯.૧૨
અન્વહ માસા અન્વિદ્વનાન્યન્વોષધીરનુ પર્વતાસઃ ।
અન્વિન્દ્રં રોદસી વાવશાને અન્વાપો અજિહત જાયમાનમ્ ॥ ૧૦.૦૮૯.૧૩
કર્હિ સ્વિત્સા ત ઇન્દ્ર ચેત્યાસદઘસ્ય યદ્ભિનદો રક્ષ એષત્ ।
મિત્રક્રુવો યચ્છસને ન ગાવઃ પૃથિવ્યા આપૃગમુયા શયન્તે ॥ ૧૦.૦૮૯.૧૪
શત્રૂયન્તો અભિ યે નસ્તતસ્રે મહિ વ્રાધન્ત ઓગણાસ ઇન્દ્ર ।
અન્ધેનામિત્રાસ્તમસા સચન્તાં સુજ્યોતિષો અક્તવસ્તાઁ અભિ ષ્યુઃ ॥ ૧૦.૦૮૯.૧૫

પુરૂણિ હિ ત્વા સવના જનાનાં બ્રહ્માણિ મન્દન્ગૃણતામૃષીણામ્ ।
ઇમામાઘોષન્નવસા સહૂતિં તિરો વિશ્વાઁ અર્ચતો યાહ્યર્વાઙ્ ॥ ૧૦.૦૮૯.૧૬
એવા તે વયમિન્દ્ર ભુઞ્જતીનાં વિદ્યામ સુમતીનાં નવાનામ્ ।
વિદ્યામ વસ્તોરવસા ગૃણન્તો વિશ્વામિત્રા ઉત ત ઇન્દ્ર નૂનમ્ ॥ ૧૦.૦૮૯.૧૭
શુનં હુવેમ મઘવાનમિન્દ્રમસ્મિન્ભરે નૃતમં વાજસાતૌ ।
શૃણ્વન્તમુગ્રમૂતયે સમત્સુ ઘ્નન્તં વૃત્રાણિ સંજિતં ધનાનામ્ ॥ ૧૦.૦૮૯.૧૮

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વાત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૧૦.૦૯૦.૦૧
પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ ૧૦.૦૯૦.૦૨
એતાવાનસ્ય મહિમાતો જ્યાયાઁશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥ ૧૦.૦૯૦.૦૩
ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પાદોઽસ્યેહાભવત્પુનઃ ।
તતો વિષ્વઙ્વ્યક્રામત્સાશનાનશને અભિ ॥ ૧૦.૦૯૦.૦૪
તસ્માદ્વિરાળજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિમથો પુરઃ ॥ ૧૦.૦૯૦.૦૫
યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યં ગ્રીષ્મ ઇધ્મઃ શરદ્ધવિઃ ॥ ૧૦.૦૯૦.૦૬
તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્ત સાધ્યા ઋષયશ્ચ યે ॥ ૧૦.૦૯૦.૦૭
તસ્માદ્યજ્ઞાત્સર્વહુતઃ સમ્ભૃતં પૃષદાજ્યમ્ ।
પશૂન્તાઁશ્ચક્રે વાયવ્યાનારણ્યાન્ગ્રામ્યાશ્ચ યે ॥ ૧૦.૦૯૦.૦૮
તસ્માદ્યજ્ઞાત્સર્વહુત ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાંસિ જજ્ઞિરે તસ્માદ્યજુસ્તસ્માદજાયત ॥ ૧૦.૦૯૦.૦૯
તસ્માદશ્વા અજાયન્ત યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્તસ્માજ્જાતા અજાવયઃ ॥ ૧૦.૦૯૦.૧૦
યત્પુરુષં વ્યદધુઃ કતિધા વ્યકલ્પયન્ ।

મુખં કિમસ્ય કૌ બાહૂ કા ઊરૂ પાદા ઉચ્યેતે ॥ ૧૦.૦૯૦.૧૧
બ્રાહ્મણોઽસ્ય મુખમાસીદ્બાહૂ રાજન્યઃ કૃતઃ ।
ઊરૂ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥ ૧૦.૦૯૦.૧૨
ચન્દ્રમા મનસો જાતશ્ચક્ષોઃ સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ પ્રાણાદ્વાયુરજાયત ॥ ૧૦.૦૯૦.૧૩
નાભ્યા આસીદન્તરિક્ષં શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્તથા લોકાઁ અકલ્પયન્ ॥ ૧૦.૦૯૦.૧૪
સપ્તાસ્યાસન્પરિધયસ્ત્રિઃ સપ્ત સમિધઃ કૃતાઃ ।
દેવા યદ્યજ્ઞં તન્વાના અબધ્નન્પુરુષં પશુમ્ ॥ ૧૦.૦૯૦.૧૫
યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્ત યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૧૦.૦૯૦.૧૬

સં જાગૃવદ્ભિર્જરમાણ ઇધ્યતે દમે દમૂના ઇષયન્નિળસ્પદે ।
વિશ્વસ્ય હોતા હવિષો વરેણ્યો વિભુર્વિભાવા સુષખા સખીયતે ॥ ૧૦.૦૯૧.૦૧
સ દર્શતશ્રીરતિથિર્ગૃહેગૃહે વનેવને શિશ્રિયે તક્વવીરિવ ।
જનંજનં જન્યો નાતિ મન્યતે વિશ આ ક્ષેતિ વિશ્યો૩ વિશંવિશમ્ ॥ ૧૦.૦૯૧.૦૨
સુદક્ષો દક્ષૈઃ ક્રતુનાસિ સુક્રતુરગ્ને કવિઃ કાવ્યેનાસિ વિશ્વવિત્ ।
વસુર્વસૂનાં ક્ષયસિ ત્વમેક ઇદ્દ્યાવા ચ યાનિ પૃથિવી ચ પુષ્યતઃ ॥ ૧૦.૦૯૧.૦૩
પ્રજાનન્નગ્ને તવ યોનિમૃત્વિયમિળાયાસ્પદે ઘૃતવન્તમાસદઃ ।
આ તે ચિકિત્ર ઉષસામિવેતયોઽરેપસઃ સૂર્યસ્યેવ રશ્મયઃ ॥ ૧૦.૦૯૧.૦૪
તવ શ્રિયો વર્ષ્યસ્યેવ વિદ્યુતશ્ચિત્રાશ્ચિકિત્ર ઉષસાં ન કેતવઃ ।
યદોષધીરભિસૃષ્ટો વનાનિ ચ પરિ સ્વયં ચિનુષે અન્નમાસ્યે ॥ ૧૦.૦૯૧.૦૫
તમોષધીર્દધિરે ગર્ભમૃત્વિયં તમાપો અગ્નિં જનયન્ત માતરઃ ।
તમિત્સમાનં વનિનશ્ચ વીરુધોઽન્તર્વતીશ્ચ સુવતે ચ વિશ્વહા ॥ ૧૦.૦૯૧.૦૬
વાતોપધૂત ઇષિતો વશાઁ અનુ તૃષુ યદન્ના વેવિષદ્વિતિષ્ઠસે ।
આ તે યતન્તે રથ્યો૩ યથા પૃથક્છર્ધાંસ્યગ્ને અજરાણિ ધક્ષતઃ ॥ ૧૦.૦૯૧.૦૭
મેધાકારં વિદથસ્ય પ્રસાધનમગ્નિં હોતારં પરિભૂતમં મતિમ્ ।
તમિદર્ભે હવિષ્યા સમાનમિત્તમિન્મહે વૃણતે નાન્યં ત્વત્ ॥ ૧૦.૦૯૧.૦૮

ત્વામિદત્ર વૃણતે ત્વાયવો હોતારમગ્ને વિદથેષુ વેધસઃ ।
યદ્દેવયન્તો દધતિ પ્રયાંસિ તે હવિષ્મન્તો મનવો વૃક્તબર્હિષઃ ॥ ૧૦.૦૯૧.૦૯
તવાગ્ને હોત્રં તવ પોત્રમૃત્વિયં તવ નેષ્ટ્રં ત્વમગ્નિદૃતાયતઃ ।
તવ પ્રશાસ્ત્રં ત્વમધ્વરીયસિ બ્રહ્મા ચાસિ ગૃહપતિશ્ચ નો દમે ॥ ૧૦.૦૯૧.૧૦
યસ્તુભ્યમગ્ને અમૃતાય મર્ત્યઃ સમિધા દાશદુત વા હવિષ્કૃતિ ।
તસ્ય હોતા ભવસિ યાસિ દૂત્ય૧મુપ બ્રૂષે યજસ્યધ્વરીયસિ ॥ ૧૦.૦૯૧.૧૧
ઇમા અસ્મૈ મતયો વાચો અસ્મદાઁ ઋચો ગિરઃ સુષ્ટુતયઃ સમગ્મત ।
વસૂયવો વસવે જાતવેદસે વૃદ્ધાસુ ચિદ્વર્ધનો યાસુ ચાકનત્ ॥ ૧૦.૦૯૧.૧૨
ઇમાં પ્રત્નાય સુષ્ટુતિં નવીયસીં વોચેયમસ્મા ઉશતે શ◌ૃણોતુ નઃ ।
ભૂયા અન્તરા હૃધ્યસ્ય નિસ્પૃશે જાયેવ પત્ય ઉશતી સુવાસાઃ ॥ ૧૦.૦૯૧.૧૩
યસ્મિન્નશ્વાસ ઋષભાસ ઉક્ષણો વશા મેષા અવસૃષ્ટાસ આહુતાઃ ।
કીલાલપે સોમપૃષ્ઠાય વેધસે હૃદા મતિં જનયે ચારુમગ્નયે ॥ ૧૦.૦૯૧.૧૪
અહાવ્યગ્ને હવિરાસ્યે તે સ્રુચીવ ઘૃતં ચમ્વીવ સોમઃ ।
વાજસનિં રયિમસ્મે સુવીરં પ્રશસ્તં ધેહિ યશસં બૃહન્તમ્ ॥ ૧૦.૦૯૧.૧૫
યજ્ઞસ્ય વો રથ્યં વિશ્પતિં વિશાં હોતારમક્તોરતિથિં વિભાવસુમ્ ।
શોચઞ્છુષ્કાસુ હરિણીષુ જર્ભુરદ્વૃષા કેતુર્યજતો દ્યામશાયત ॥ ૧૦.૦૯૨.૦૧
ઇમમઞ્જસ્પામુભયે અકૃણ્વત ધર્માણમગ્નિં વિદથસ્ય સાધનમ્ ।
અક્તું ન યહ્વમુષસઃ પુરોહિતં તનૂનપાતમરુષસ્ય નિંસતે ॥ ૧૦.૦૯૨.૦૨
બળસ્ય નીથા વિ પણેશ્ચ મન્મહે વયા અસ્ય પ્રહુતા આસુરત્તવે ।
યદા ઘોરાસો અમૃતત્વમાશતાદિજ્જનસ્ય દૈવ્યસ્ય ચર્કિરન્ ॥ ૧૦.૦૯૨.૦૩
ઋતસ્ય હિ પ્રસિતિર્દ્યૌરુરુ વ્યચો નમો મહ્ય૧રમતિઃ પનીયસી ।
ઇન્દ્રો મિત્રો વરુણઃ સં ચિકિત્રિરેઽથો ભગઃ સવિતા પૂતદક્ષસઃ ॥ ૧૦.૦૯૨.૦૪
પ્ર રુદ્રેણ યયિના યન્તિ સિન્ધવસ્તિરો મહીમરમતિં દધન્વિરે ।
યેભિઃ પરિજ્મા પરિયન્નુરુ જ્રયો વિ રોરુવજ્જઠરે વિશ્વમુક્ષતે ॥ ૧૦.૦૯૨.૦૫
ક્રાણા રુદ્રા મરુતો વિશ્વકૃષ્ટયો દિવઃ શ્યેનાસો અસુરસ્ય નીળયઃ ।
તેભિશ્ચષ્ટે વરુણો મિત્રો અર્યમેન્દ્રો દેવેભિર્વશેભિર્વશઃ ॥ ૧૦.૦૯૨.૦૬
ઇન્દ્રે ભુજં શશમાનાસ આશત સૂરો દૃશીકે વૃષણશ્ચ પૌંસ્યે ।

પ્ર યે ન્વસ્યાર્હણા તતક્ષિરે યુજં વજ્રં નૃષદનેષુ કારવઃ ॥ ૧૦.૦૯૨.૦૭
સૂરશ્ચિદા હરિતો અસ્ય રીરમદિન્દ્રાદા કશ્ચિદ્ભયતે તવીયસઃ ।
ભીમસ્ય વૃષ્ણો જઠરાદભિશ્વસો દિવેદિવે સહુરિઃ સ્તન્નબાધિતઃ ॥ ૧૦.૦૯૨.૦૮
સ્તોમં વો અદ્ય રુદ્રાય શિક્વસે ક્ષયદ્વીરાય નમસા દિદિષ્ટન ।
યેભિઃ શિવઃ સ્વવાઁ એવયાવભિર્દિવઃ સિષક્તિ સ્વયશા નિકામભિઃ ॥ ૧૦.૦૯૨.૦૯
તે હિ પ્રજાયા અભરન્ત વિ શ્રવો બૃહસ્પતિર્વૃષભઃ સોમજામયઃ ।
યજ્ઞૈરથર્વા પ્રથમો વિ ધારયદ્દેવા દક્ષૈર્ભૃગવઃ સં ચિકિત્રિરે ॥ ૧૦.૦૯૨.૧૦
તે હિ દ્યાવાપૃથિવી ભૂરિરેતસા નરાશંસશ્ચતુરઙ્ગો યમોऽદિતિઃ ।
દેવસ્ત્વષ્ટા દ્રવિણોદા ઋભુક્ષણઃ પ્ર રોદસી મરુતો વિષ્ણુરર્હિરે ॥ ૧૦.૦૯૨.૧૧
ઉત સ્ય ન ઉશિજામુર્વિયા કવિરહિઃ શૃણોતુ બુધ્ન્યો૩ હવીમનિ ।
સૂર્યામાસા વિચરન્તા દિવિક્ષિતા ધિયા શમીનહુષી અસ્ય બોધતમ્ ॥ ૧૦.૦૯૨.૧૨
પ્ર નઃ પૂષા ચરથં વિશ્વદેવ્યોऽપાં નપાદવતુ વાયુરિષ્ટયે ।
આત્માનં વસ્યો અભિ વાતમર્ચત તદશ્વિના સુહવા યામનિ શ્રુતમ્ ॥ ૧૦.૦૯૨.૧૩
વિશામાસામભયાનામધિક્ષિતં ગીર્ભિરુ સ્વયશસં ગૃણીમસિ ।
ગ્નાભિર્વિશ્વાભિરદિતિમનર્વણમક્તોર્યુવાનં નૃમણા અધા પતિમ્ ॥ ૧૦.૦૯૨.૧૪
રેભદત્ર જનુષા પૂર્વો અઙ્ગિરા ગ્રાવાણ ઊર્ધ્વા અભિ ચક્ષુરધ્વરમ્ ।
યેભિર્વિહાયા અભવદ્વિચક્ષણઃ પાથઃ સુમેકં સ્વધિતિર્વનન્વતિ ॥ ૧૦.૦૯૨.૧૫
મહિ દ્યાવાપૃથિવી ભૂતમુર્વી નારી યહ્વી ન રોદસી સદં નઃ ।
તેભિર્નઃ પાતં સહ્યસ એભિર્નઃ પાતં શૂષણિ ॥ ૧૦.૦૯૩.૦૧
યજ્ઞેયજ્ઞે સ મર્ત્યો દેવાન્સપર્યતિ ।
યઃ સુમ્નૈર્દીર્ઘશ્રુત્તમ આવિવાસત્યેનાન્ ॥ ૧૦.૦૯૩.૦૨
વિશ્વેષામિરજ્યવો દેવાનાં વાર્મહઃ ।
વિશ્વે હિ વિશ્વમહસો વિશ્વે યજ્ઞેષુ યજ્ઞિયાઃ ॥ ૧૦.૦૯૩.૦૩
તે ઘા રાજાનો અમૃતસ્ય મન્દ્રા અર્યમા મિત્રો વરુણઃ પરિજ્મા ।
કદ્રુદ્રો નૃણાં સ્તુતો મરુતઃ પૂષણો ભગઃ ॥ ૧૦.૦૯૩.૦૪
ઉત નો નક્તમપાં વૃષણ્વસૂ સૂર્યામાસા સદનાય સધન્યા ।
સચા યત્સાદ્યેષામહિર્બુધ્નેષુ બુધ્ન્યઃ ॥ ૧૦.૦૯૩.૦૫

ઉત નો દેવાવશ્વિના શુભસ્પતી ધામભિર્મિત્રાવરુણા ઉરુષ્યતામ્ ।
મહઃ સ રાય એષતેઽતિ ધન્વેવ દુરિતા ॥ ૧૦.૦૯૩.૦૬
ઉત નો રુદ્રા ચિન્મૃળતામશ્વિના વિશ્વે દેવાસો રથસ્પતિર્ભગઃ ।
ઋભુર્વાજ ઋભુક્ષણઃ પરિજ્મા વિશ્વવેદસઃ ॥ ૧૦.૦૯૩.૦૭
ઋભુરૃભુક્ષા ઋભુર્વિધતો મદ આ તે હરી જૂજુવાનસ્ય વાજિના ।
દુષ્ટરં યસ્ય સામ ચિદૃધગ્યજ્ઞો ન માનુષઃ ॥ ૧૦.૦૯૩.૦૮
કૃધી નો અહ્રયો દેવ સવિતઃ સ ચ સ્તુષે મઘોનામ્ ।
સહો ન ઇન્દ્રો વહ્નિભિર્ન્યેષાં ચર્ષણીનાં ચક્રં રશ્મિં ન યોયુવે ॥ ૧૦.૦૯૩.૦૯
ઐષુ દ્યાવાપૃથિવી ધાતં મહદસ્મે વીરેષુ વિશ્વચર્ષણિ શ્રવઃ ।
પૃક્ષં વાજસ્ય સાતયે પૃક્ષં રાયોત તુર્વણે ॥ ૧૦.૦૯૩.૧૦
એતં શંસમિન્દ્રાસ્મયુષ્ટ્વં કૂચિત્સન્તં સહસાવન્નભિષ્ટયે ।
સદા પાહ્યભિષ્ટયે મેદતાં વેદતા વસો ॥ ૧૦.૦૯૩.૧૧
એતં મે સ્તોમં તના ન સૂર્યે દ્યુતદ્યામાનં વાવૃધન્ત નૃણામ્ ।
સંવનનં નાશ્વ્યં તષ્ટેવાનપચ્યુતમ્ ॥ ૧૦.૦૯૩.૧૨
વાવર્ત યેષાં રાયા યુક્તૈષાં હિરણ્યયી ।
નેમધિતા ન પૌંસ્યા વૃથેવ વિષ્ટાન્તા ॥ ૧૦.૦૯૩.૧૩
પ્ર તદ્દુઃશીમે પૃથવાને વેને પ્ર રામે વોચમસુરે મઘવત્સુ ।
યે યુક્ત્વાય પઞ્ચ શતાસ્મયુ પથા વિશ્રાવ્યેષામ્ ॥ ૧૦.૦૯૩.૧૪
અધીન્વત્ર સપ્તતિં ચ સપ્ત ચ ।
સદ્યો દિદિષ્ટ તાન્વઃ સદ્યો દિદિષ્ટ પાર્થ્યઃ સદ્યો દિદિષ્ટ માયવઃ ॥ ૧૦.૦૯૩.૧૫
પ્રૈતે વદન્તુ પ્ર વયં વદામ ગ્રાવભ્યો વાચં વદતા વદદ્ભ્યઃ ।
યદદ્રયઃ પર્વતાઃ સાકમાશવઃ શ્લોકં ઘોષં ભરથેન્દ્રાય સોમિનઃ ॥ ૧૦.૦૯૪.૦૧
એતે વદન્તિ શતવત્સહસ્રવદભિ ક્રન્દન્તિ હરિતેભિરાસભિઃ ।
વિષ્ટ્વી ગ્રાવાણઃ સુકૃતઃ સુકૃત્યયા હોતુશ્ચિત્પૂર્વે હવિરદ્યમાશત ॥ ૧૦.૦૯૪.૦૨
એતે વદન્ત્યવિદન્નના મધુ ન્યૂઙ્ખયન્તે અધિ પક્વ આમિષિ ।
વૃક્ષસ્ય શાખામરુણસ્ય બપ્સતસ્તે સૂભર્વા વૃષભાઃ પ્રેમરાવિષુઃ ॥ ૧૦.૦૯૪.૦૩
બૃહદ્વદન્તિ મદિરેણ મન્દિનેન્દ્રં ક્રોશન્તોઽવિદન્નના મધુ ।

સંરભ્યા ધીરાઃ સ્વસૃભિરનર્તિષુરાઘોષયન્તઃ પૃથિવીમુપબ્દિભિઃ ॥ ૧૦.૦૯૪.૦૪
સુપર્ણા વાચમક્રતોપ દ્યવ્યાખરે કૃષ્ણા ઇષિરા અનર્તિષુઃ ।
ન્યઙ્નિ યન્ત્યુપરસ્ય નિષ્કૃતં પુરૂ રેતો દધિરે સૂર્યશ્વિતઃ ॥ ૧૦.૦૯૪.૦૫
ઉગ્રા ઇવ પ્રવહન્તઃ સમાયમુઃ સાકં યુક્તા વૃષણો બિભ્રતો ધુરઃ ।
યચ્છ્વસન્તો જગ્રસાના અરાવિષુઃ શૃણ્વ એષાં પ્રોથથો અર્વતામિવ ॥ ૧૦.૦૯૪.૦૬
દશાવનિભ્યો દશકક્ષ્યેભ્યો દશયોક્ત્રેભ્યો દશયોજનેભ્યઃ ।
દશાભીશુભ્યો અર્ચતાજરેભ્યો દશ ધુરો દશ યુક્તા વહદ્ભ્યઃ ॥ ૧૦.૦૯૪.૦૭
તે અદ્રયો દશયન્ત્રાસ આશવસ્તેષામાધાનં પર્યેતિ હર્યતમ્ ।
ત ઊ સુતસ્ય સોમ્યસ્યાન્ધસોંઽશોઃ પીયૂષં પ્રથમસ્ય ભેજિરે ॥ ૧૦.૦૯૪.૦૮
તે સોમાદો હરી ઇન્દ્રસ્ય નિંસતેંઽશું દુહન્તો અધ્યાસતે ગવિ ।
તેભિર્દુગ્ધં પપિવાન્સોમ્યં મધ્વિન્દ્રો વર્ધતે પ્રથતે વૃષાયતે ॥ ૧૦.૦૯૪.૦૯
વૃષા વો અંશુર્ન કિલા રિષાથનેળાવન્તઃ સદમિત્સ્થનાશિતાઃ ।
રૈવત્યેવ મહસા ચારવઃ સ્થન યસ્ય ગ્રાવાણો અજુષધ્વમધ્વરમ્ ॥ ૧૦.૦૯૪.૧૦
તૃદિલા અતૃદિલાસો અદ્રયોઽશ્રમણા અશૃથિતા અમૃત્યવઃ ।
અનાતુરા અજરાઃ સ્થામવિષ્ણવઃ સુપીવસો અતૃષિતા અતૃષ્ણજઃ ॥ ૧૦.૦૯૪.૧૧
ધ્રુવા એવ વઃ પિતરો યુગેયુગે ક્ષેમકામાસઃ સદસો ન યુઞ્જતે ।
અજુર્યાસો હરિષાચો હરિદ્રવ આ દ્યાં રવેણ પૃથિવીમશુશ્રવુઃ ॥ ૧૦.૦૯૪.૧૨
તદિદ્વદન્ત્યદ્રયો વિમોચને યામન્નઞ્જસ્પા ઇવ ઘેદુપબ્દિભિઃ ।
વપન્તો બીજમિવ ધાન્યાકૃતઃ પૃઞ્ચન્તિ સોમં ન મિનન્તિ બપ્સતઃ ॥ ૧૦.૦૯૪.૧૩
સુતે અધ્વરે અધિ વાચમક્રતા ક્રીળયો ન માતરં તુદન્તઃ ।
વિ ષૂ મુઞ્ચા સુષુવુષો મનીષાં વિ વર્તન્તામદ્રયશ્ચાયમાનાઃ ॥ ૧૦.૦૯૪.૧૪
હયે જાયે મનસા તિષ્ઠ ઘોરે વચાંસિ મિશ્રા કૃણવાવહૈ નુ ।
ન નૌ મન્ત્રા અનુદિતાસ એતે મયસ્કરન્પરતરે ચનાહન્ ॥ ૧૦.૦૯૫.૦૧
કિમેતા વાચા કૃણવા તવાહં પ્રાક્રમિષમુષસામગ્રિયેવ ।
પુરૂરવઃ પુનરસ્તં પરેહિ દુરાપના વાત ઇવાહમસ્મિ ॥ ૧૦.૦૯૫.૦૨
ઇષુર્ન શ્રિય ઇષુધેરસના ગોષાઃ શતસા ન રંહિઃ ।
અવીરે ક્રતૌ વિ દવિદ્યુતન્નોરા ન માયું ચિતયન્ત ધુનયઃ ॥ ૧૦.૦૯૫.૦૩

સા વસુ દધતી શ્વશુરાય વય ઉષો યદિ વષ્ટ્યન્તિગૃહાત્ ।
અસ્તં નનક્ષે યસ્મિઞ્ચાકન્દિવા નક્તં શ્નથિતા વૈતસેન ॥ ૧૦.૦૯૫.૦૪
ત્રિઃ સ્મ માહ્નઃ શ્નથયો વૈતસેનોત સ્મ મેઽવ્યત્યૈ પૃણાસિ ।
પુરૂરવોઽનુ તે કેતમાયં રાજા મે વીર તન્વ૧સ્તદાસીઃ ॥ ૧૦.૦૯૫.૦૫
યા સુજૂર્ણિઃ શ્રેણિઃ સુમ્નઆપિર્હ્રદેચક્ષુર્ન ગ્રન્થિની ચરણ્યુઃ ।
તા અઞ્જયોઽરુણયો ન સસ્રુઃ શ્રિયે ગાવો ન ધેનવોઽનવન્ત ॥ ૧૦.૦૯૫.૦૬
સમસ્મિઞ્જાયમાન આસત ગ્ના ઉતેમવર્ધન્નદ્ય૧ઃ સ્વગૂર્તાઃ ।
મહે યત્ત્વા પુરૂરવો રણાયાવર્ધયન્દસ્યુહત્યાય દેવાઃ ॥ ૧૦.૦૯૫.૦૭
સચા યદાસુ જહતીષ્વત્કમમાનુષીષુ માનુષો નિષેવે ।
અપ સ્મ મત્તરસન્તી ન ભુજ્યુસ્તા અત્રસન્રથસ્પૃશો નાશ્વાઃ ॥ ૧૦.૦૯૫.૦૮
યદાસુ મર્તો અમૃતાસુ નિસ્પૃક્સં ક્ષોણીભિઃ ક્રતુભિર્ન પૃઙ્ક્તે ।
તા આતયો ન તન્વઃ શુમ્ભત સ્વા અશ્વાસો ન ક્રીળયો દન્દશાનાઃ ॥ ૧૦.૦૯૫.૦૯
વિદ્યુન્ન યા પતન્તી દવિદ્યોદ્ભરન્તી મે અપ્યા કામ્યાનિ ।
જનિષ્ટો અપો નર્યઃ સુજાતઃ પ્રોર્વશી તિરત દીર્ઘમાયુઃ ॥ ૧૦.૦૯૫.૧૦
જજ્ઞિષ ઇત્થા ગોપીથ્યાય હિ દધાથ તત્પુરૂરવો મ ઓજઃ ।
અશાસં ત્વા વિદુષી સસ્મિન્નહન્ન મ આશૃણોઃ કિમભુગ્વદાસિ ॥ ૧૦.૦૯૫.૧૧
કદા સૂનુઃ પિતરં જાત ઇચ્છાચ્ચક્રન્નાશ્રુ વર્તયદ્વિજાનન્ ।
કો દમ્પતી સમનસા વિ યૂયોદધ યદગ્નિઃ શ્વશુરેષુ દીદયત્ ॥ ૧૦.૦૯૫.૧૨
પ્રતિ બ્રવાણિ વર્તયતે અશ્રુ ચક્રન્ન ક્રન્દદાધ્યે શિવાયૈ ।
પ્ર તત્તે હિનવા યત્તે અસ્મે પરેહ્યસ્તં નહિ મૂર માપઃ ॥ ૧૦.૦૯૫.૧૩
સુદેવો અદ્ય પ્રપતેદનાવૃત્પરાવતં પરમાં ગન્તવા ઉ ।
અધા શયીત નિરૃતેરુપસ્થેઽધૈનં વૃકા રભસાસો અદ્યુઃ ॥ ૧૦.૦૯૫.૧૪
પુરૂરવો મા મૃથા મા પ્ર પપ્તો મા ત્વા વૃકાસો અશિવાસ ઉ ક્ષન્ ।
ન વૈ સ્ત્રૈણાનિ સખ્યાનિ સન્તિ સાલાવૃકાણાં હૃદયાન્યેતા ॥ ૧૦.૦૯૫.૧૫
યદ્વિરૂપાચરં મર્ત્યેષ્વવસં રાત્રીઃ શરદશ્ચતસ્રઃ ।
ઘૃતસ્ય સ્તોકં સકૃદહ્ન આશ્નાં તાદેવેદં તાતૃપાણા ચરામિ ॥ ૧૦.૦૯૫.૧૬
અન્તરિક્ષપ્રાં રજસો વિમાનીમુપ શિક્ષામ્યુર્વશીં વસિષ્ઠઃ ।

ઉપ ત્વા રાતિઃ સુકૃતસ્ય તિષ્ઠાન્નિ વર્તસ્વ હૃદયં તપ્યતે મે ॥ ૧૦.૦૯૫.૧૭
ઇતિ ત્વા દેવા ઇમ આહુરૈળ યથેમેતદ્ભવસિ મૃત્યુબન્ધુઃ ।
પ્રજા તે દેવાન્હવિષા યજાતિ સ્વર્ગ ઉ ત્વમપિ માદયાસે ॥ ૧૦.૦૯૫.૧૮

પ્ર તે મહે વિદથે શંસિષં હરી પ્ર તે વન્વે વનુષો હર્યતં મદમ્ ।
ઘૃતં ન યો હરિભિશ્ચારુ સેચત આ ત્વા વિશન્તુ હરિવર્પસં ગિરઃ ॥ ૧૦.૦૯૬.૦૧
હરિં હિ યોનિમભિ યે સમસ્વરન્હિન્વન્તો હરી દિવ્યં યથા સદઃ ।
આ યં પૃણન્તિ હરિભિર્ન ધેનવ ઇન્દ્રાય શૂષં હરિવન્તમર્ચત ॥ ૧૦.૦૯૬.૦૨
સો અસ્ય વજ્રો હરિતો ય આયસો હરિર્નિકામો હરિરા ગભસ્ત્યોઃ ।
દ્યુમ્ની સુશિપ્રો હરિમન્યુસાયક ઇન્દ્રે નિ રૂપા હરિતા મિમિક્ષિરે ॥ ૧૦.૦૯૬.૦૩
દિવિ ન કેતુરધિ ધાયિ હર્યતો વિવ્યચદ્વજ્રો હરિતો ન રંહ્યા ।
તુદદહિં હરિશિપ્રો ય આયસઃ સહસ્રશોકા અભવદ્ધરિમ્ભરઃ ॥ ૧૦.૦૯૬.૦૪
ત્વંત્વમહર્યથા ઉપસ્તુતઃ પૂર્વેભિરિન્દ્ર હરિકેશ યજ્વભિઃ ।
ત્વં હર્યસિ તવ વિશ્વમુક્થ્ય૧મસામિ રાધો હરિજાત હર્યતમ્ ॥ ૧૦.૦૯૬.૦૫
તા વજ્રિણં મન્દિનં સ્તોમ્યં મદ ઇન્દ્રં રથે વહતો હર્યતા હરી ।
પુરૂણ્યસ્મૈ સવનાનિ હર્યત ઇન્દ્રાય સોમા હરયો દધન્વિરે ॥ ૧૦.૦૯૬.૦૬
અરં કામાય હરયો દધન્વિરે સ્થિરાય હિન્વન્હરયો હરી તુરા ।
અર્વદ્ભિર્યો હરિભિર્જોષમીયતે સો અસ્ય કામં હરિવન્તમાનશે ॥ ૧૦.૦૯૬.૦૭
હરિશ્મશારુર્હરિકેશ આયસસ્તુરસ્પેયે યો હરિપા અવર્ધત ।
અર્વદ્ભિર્યો હરિભિર્વાજિનીવસુરતિ વિશ્વા દુરિતા પારિષદ્ધરી ॥ ૧૦.૦૯૬.૦૮
સ્રુવેવ યસ્ય હરિણી વિપેતતુઃ શિપ્રે વાજાય હરિણી દવિધ્વતઃ ।
પ્ર યત્કૃતે ચમસે મર્મૃજદ્ધરી પીત્વા મદસ્ય હર્યતસ્યાન્ધસઃ ॥ ૧૦.૦૯૬.૦૯
ઉત સ્મ સદ્મ હર્યતસ્ય પસ્ત્યો૩રત્યો ન વાજં હરિવાઁ અચિક્રદત્ ।
મહી ચિદ્ધિ ધિષણાહર્યદોજસા બૃહદ્વયો દધિષે હર્યતશ્ચિદા ॥ ૧૦.૦૯૬.૧૦
આ રોદસી હર્યમાણો મહિત્વા નવ્યંનવ્યં હર્યસિ મન્મ નુ પ્રિયમ્ ।
પ્ર પસ્ત્યમસુર હર્યતં ગોરાવિષ્કૃધિ હરયે સૂર્યાય ॥ ૧૦.૦૯૬.૧૧
આ ત્વા હર્યન્તં પ્રયુજો જનાનાં રથે વહન્તુ હરિશિપ્રમિન્દ્ર ।
પિબા યથા પ્રતિભૃતસ્ય મધ્વો હર્યન્યજ્ઞં સધમાદે દશોણિમ્ ॥ ૧૦.૦૯૬.૧૨

અપાઃ પૂર્વેષાં હરિવઃ સુતાનામથો ઇદં સવનં કેવલં તે ।
મમદ્ધિ સોમં મધુમન્તમિન્દ્ર સત્રા વૃષઞ્જઠર આ વૃષસ્વ ॥ ૧૦.૦૯૬.૧૩

યા ઓષધીઃ પૂર્વા જાતા દેવેભ્યસ્ત્રિયુગં પુરા ।
મનૈ નુ બભ્રૂણામહં શતં ધામાનિ સપ્ત ચ ॥ ૧૦.૦૯૭.૦૧

શતં વો અમ્બ ધામાનિ સહસ્રમુત વો રુહઃ ।
અધા શતક્રત્વો યૂયમિમં મે અગદં કૃત ॥ ૧૦.૦૯૭.૦૨

ઓષધીઃ પ્રતિ મોદધ્વં પુષ્પવતીઃ પ્રસૂવરીઃ ।
અશ્વા ઇવ સજિત્વરીર્વીરુધઃ પારયિષ્ણ્વઃ ॥ ૧૦.૦૯૭.૦૩

ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપ બ્રુવે ।
સનેયમશ્વં ગાં વાસ આત્માનં તવ પૂરુષ ॥ ૧૦.૦૯૭.૦૪

અશ્વત્થે વો નિષદનં પર્ણે વો વસતિષ્કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ ૧૦.૦૯૭.૦૫

યત્રૌષધીઃ સમગ્મત રાજાનઃ સમિતાવિવ ।
વિપ્રઃ સ ઉચ્યતે ભિષગ્રક્ષોહામીવચાતનઃ ॥ ૧૦.૦૯૭.૦૬

અશ્વાવતીં સોમાવતીમૂર્જયન્તીમુદોજસમ્ ।
આવિત્સિ સર્વા ઓષધીરસ્મા અરિષ્ટતાતયે ॥ ૧૦.૦૯૭.૦૭

ઉચ્છુષ્મા ઓષધીનાં ગાવો ગોષ્ઠાદિવેરતે ।
ધનં સનિષ્યન્તીનામાત્માનં તવ પૂરુષ ॥ ૧૦.૦૯૭.૦૮

ઇષ્કૃતિર્નામ વો માતાથો યૂયં સ્થ નિષ્કૃતીઃ ।
સીરાઃ પતત્રિણીઃ સ્થન યદામયતિ નિષ્કૃથ ॥ ૧૦.૦૯૭.૦૯

અતિ વિશ્વાઃ પરિષ્ઠાઃ સ્તેન ઇવ વ્રજમક્રમુઃ ।
ઓષધીઃ પ્રાચુચ્યવુર્યત્કિં ચ તન્વોઉ રપઃ ॥ ૧૦.૦૯૭.૧૦

યદિમા વાજયન્નહમોષધીર્હસ્ત આદધે ।
આત્મા યક્ષ્મસ્ય નશ્યતિ પુરા જીવગૃભો યથા ॥ ૧૦.૦૯૭.૧૧

યસ્યૌષધીઃ પ્રસર્પથાઙ્ગમઙ્ગં પરુષ્પરુઃ ।
તતો યક્ષ્મં વિ બાધધ્વ ઉગ્રો મધ્યમશીરિવ ॥ ૧૦.૦૯૭.૧૨

સાકં યક્ષ્મ પ્ર પત ચાષેણ કિકિદીવિના ।

સાકં વાતસ્ય ધ્રાજ્યા સાકં નશ્ય નિહાકયા ॥ ૧૦.૦૯૭.૧૩
અન્યા વો અન્યામવત્વન્યાન્યસ્યા ઉપાવત ।
તાઃ સર્વાઃ સંવિદાના ઇદં મે પ્રાવતા વચઃ ॥ ૧૦.૦૯૭.૧૪
યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચન્ત્વંહસઃ ॥ ૧૦.૦૯૭.૧૫
મુઞ્ચન્તુ મા શપથ્યાઽદથો વરુણ્યાદુત ।
અથો યમસ્ય પડ્બીશાત્સર્વસ્માદ્દેવકિલ્બિષાત્ ॥ ૧૦.૦૯૭.૧૬
અવપતન્તીરવદન્દિવ ઓષધયસ્પરિ ।
યં જીવમશ્નવામહૈ ન સ રિષ્યાતિ પૂરુષઃ ॥ ૧૦.૦૯૭.૧૭
યા ઓષધીઃ સોમરાજ્ઞીર્બહ્વીઃ શતવિચક્ષણાઃ ।
તાસાં ત્વમસ્યુત્તમારં કામાય શં હૃદે ॥ ૧૦.૦૯૭.૧૮
યા ઓષધીઃ સોમરાજ્ઞીર્વિષ્ઠિતાઃ પૃથિવીમનુ ।
બૃહસ્પતિપ્રસૂતા અસ્યૈ સં દત્ત વીર્યમ્ ॥ ૧૦.૦૯૭.૧૯
મા વો રિષત્ખનિતા યસ્મૈ ચાહં ખનામિ વઃ ।
દ્વિપચ્ચતુષ્પદસ્માકં સર્વમસ્ત્વનાતુરમ્ ॥ ૧૦.૦૯૭.૨૦
યાશ્ચેદમુપશૃણ્વન્તિ યાશ્ચ દૂરં પરાગતાઃ ।
સર્વાઃ સંગત્ય વીરુધોઽસ્યૈ સં દત્ત વીર્યમ્ ॥ ૧૦.૦૯૭.૨૧
ઓષધયઃ સં વદન્તે સોમેન સહ રાજ્ઞા ।
યસ્મૈ કૃણોતિ બ્રાહ્મણસ્તં રાજન્પારયામસિ ॥ ૧૦.૦૯૭.૨૨
ત્વમુત્તમાસ્યોષધે તવ વૃક્ષા ઉપસ્તયઃ ।
ઉપસ્તિરસ્તુ સોઽસ્માકં યો અસ્માઁ અભિદાસતિ ॥ ૧૦.૦૯૭.૨૩

બૃહસ્પતે પ્રતિ મે દેવતામિહિ મિત્રો વા યદ્વરુણો વાસિ પૂષા ।
આદિત્યૈર્વા યદ્વસુભિર્મરુત્વાન્સ પર્જન્યં શંતનવે વૃષાય ॥ ૧૦.૦૯૮.૦૧
આ દેવો દૂતો અજિરશ્ચિકિત્વાન્ત્વદ્દેવાપે અભિ મામગચ્છત્ ।
પ્રતીચીનઃ પ્રતિ મામા વવૃત્સ્વ દધામિ તે દ્યુમતીં વાચમાસન્ ॥ ૧૦.૦૯૮.૦૨
અસ્મે ધેહિ દ્યુમતીં વાચમાસન્બૃહસ્પતે અનમીવામિષિરામ્ ।
યયા વૃષ્ટિં શંતનવે વનાવ દિવો દ્રપ્સો મધુમાઁ આ વિવેશ ॥ ૧૦.૦૯૮.૦૩

આ નો દ્રપ્સા મધુમન્તો વિશન્ત્વિન્દ્ર દેહ્યધિરથં સહસ્રમ્ ।
નિ ષીદ હોત્રમૃતુથા યજસ્વ દેવાન્દેવાપે હવિષા સપર્ય ॥ ૧૦.૦૯૮.૦૪
આર્ષ્ટિષેણો હોત્રમૃષિર્નિષીદન્દેવાપિર્દેવસુમતિં ચિકિત્વાન્ ।
સ ઉત્તરસ્માદધરં સમુદ્રમપો દિવ્યા અસૃજદ્વર્ષ્યા અભિ ॥ ૧૦.૦૯૮.૦૫
અસ્મિન્સમુદ્રે અધ્યુત્તરસ્મિન્નાપો દેવેભિર્નિવૃતા અતિષ્ઠન્ ।
તા અદ્રવન્નાર્ષ્ટિષેણેન સૃષ્ટા દેવાપિના પ્રેષિતા મૃક્ષિણીષુ ॥ ૧૦.૦૯૮.૦૬
યદ્દેવાપિઃ શંતનવે પુરોહિતો હોત્રાય વૃતઃ કૃપયન્નદીધેત્ ।
દેવશ્રુતં વૃષ્ટિવનિં રરાણો બૃહસ્પતિર્વાચમસ્મા અયચ્છત્ ॥ ૧૦.૦૯૮.૦૭
યં ત્વા દેવાપિઃ શુશુચાનો અગ્ન આર્ષ્ટિષેણો મનુષ્યઃ સમીધે ।
વિશ્વેભિર્દેવૈરનુમદ્યમાનઃ પ્ર પર્જન્યમીરયા વૃષ્ટિમન્તમ્ ॥ ૧૦.૦૯૮.૦૮
ત્વાં પૂર્વ ઋષયો ગીર્ભિરાયન્ત્વામધ્વરેષુ પુરુહૂત વિશ્વે ।
સહસ્રાણ્યધિરથાન્યસ્મે આ નો યજ્ઞં રોહિદશ્વોપ યાહિ ॥ ૧૦.૦૯૮.૦૯
એતાન્યગ્ને નવતિર્નવ ત્વે આહુતાન્યધિરથા સહસ્રા ।
તેભિર્વર્ધસ્વ તન્વઃ શૂર પૂર્વીર્દિવો નો વૃષ્ટિમિષિતો રિરીહિ ॥ ૧૦.૦૯૮.૧૦
એતાન્યગ્ને નવતિં સહસ્રા સં પ્ર યચ્છ વૃષ્ણ ઇન્દ્રાય ભાગમ્ ।
વિદ્વાન્પથ ઋતુશો દેવયાનાનપ્યૌલાનં દિવિ દેવેષુ ધેહિ ॥ ૧૦.૦૯૮.૧૧
અગ્ને બાધસ્વ વિ મૃધો વિ દુર્ગહાપામીવામપ રક્ષાંસિ સેધ ।
અસ્માત્સમુદ્રાદ્બૃહતો દિવો નોઽપાં ભૂમાનમુપ નઃ સૃજેહ ॥ ૧૦.૦૯૮.૧૨
કં નશ્ચિત્રમિષણ્યસિ ચિકિત્વાન્પૃથુગ્માનં વાશ્રં વાવૃધધ્યૈ ।
કત્તસ્ય દાતુ શવસો વ્યુષ્ટૌ તક્ષદ્વજ્રં વૃત્રતુરમપિન્વત્ ॥ ૧૦.૦૯૯.૦૧
સ હિ દ્યુતા વિદ્યુતા વેતિ સામ પૃથું યોનિમસુરત્વા સસાદ ।
સ સનીળેભિઃ પ્રસહાનો અસ્ય ભ્રાતુર્ન ઋતે સપ્તથસ્ય માયાઃ ॥ ૧૦.૦૯૯.૦૨
સ વાજં યાતાપદુષ્પદા યન્સ્વર્ષાતા પરિ ષદત્સનિષ્યન્ ।
અનર્વા યચ્છતદુરસ્ય વેદો ઘ્નઞ્છિશ્નદેવાઁ અભિ વર્પસા ભૂત્ ॥ ૧૦.૦૯૯.૦૩
સ યહ્વ્યોઽવનીર્ગોષ્વર્વા જુહોતિ પ્રધન્યાસુ સસ્રિઃ ।
અપાદો યત્ર યુજ્યાસોઽરથા દ્રોણ્યશ્વાસ ઈરતે ઘૃતં વાઃ ॥ ૧૦.૦૯૯.૦૪
સ રુદ્રેભિરશસ્તવાર ઋભ્વા હિત્વી ગયમારેઅવદ્ય આગાત્ ।

વમ્રસ્ય મન્યે મિથુના વિવવ્રી અન્નમભીત્યારોદયન્મુષાયન્ ॥ ૧૦.૦૯૯.૦૫
સ ઇદ્દાસં તુવીરવં પતિર્દન્ષળક્ષં ત્રિશીર્ષાણં દમન્યત્ ।
અસ્ય ત્રિતો ન્વોજસા વૃધાનો વિપા વરાહમયોઅગ્રયા હન્ ॥ ૧૦.૦૯૯.૦૬
સ દ્રુહ્વણે મનુષ ઊર્ધ્વસાન આ સાવિષદર્શસાનાય શરુમ્ ।
સ નૃતમો નહુષોઽસ્મત્સુજાતઃ પુરોઽભિનદર્હન્દસ્યુહત્યે ॥ ૧૦.૦૯૯.૦૭
સો અભ્રિયો ન યવસ ઉદન્યન્ક્ષયાય ગાતું વિદન્નો અસ્મે ।
ઉપ યત્સીદદિન્દું શરીરૈઃ શ્યેનોઽયોપાષ્ટિર્હન્તિ દસ્યૂન્ ॥ ૧૦.૦૯૯.૦૮
સ વ્રાધતઃ શવસાનેભિરસ્ય કુત્સાય શુષ્ણં કૃપણે પરાદાત્ ।
અયં કવિમનયચ્છસ્યમાનમત્કં યો અસ્ય સનિતોત નૃણામ્ ॥ ૧૦.૦૯૯.૦૯
અયં દશસ્યન્નર્યેભિરસ્ય દસ્મો દેવેભિર્વરુણો ન માયી ।
અયં કનીન ઋતુપા અવેદ્યમિમીતારરું યશ્ચતુષ્પાત્ ॥ ૧૦.૦૯૯.૧૦
અસ્ય સ્તોમેભિરૌશિજ ઋજિશ્વા વ્રજં દરયદ્વૃષભેણ પિપ્રોઃ ।
સુત્વા યદ્યજતો દીદયદ્ગીઃ પુર ઇયાનો અભિ વર્પસા ભૂત્ ॥ ૧૦.૦૯૯.૧૧
એવા મહો અસુર વક્ષથાય વમ્રકઃ પડ્ભિરુપ સર્પદિન્દ્રમ્ ।
સ ઇયાનઃ કરતિ સ્વસ્તિમસ્મા ઇષમૂર્જં સુક્ષિતિં વિશ્વમાભાઃ ॥ ૧૦.૦૯૯.૧૨

ઇન્દ્ર દૃહ્ય મઘવન્ત્વાવદિદ્ભુજ ઇહ સ્તુતઃ સુતપા બોધિ નો વૃધે ।
દેવેભિર્નઃ સવિતા પ્રાવતુ શ્રુતમા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૧
ભરાય સુ ભરત ભાગમૃત્વિયં પ્ર વાયવે શુચિપે ક્રન્દદિષ્ટયે ।
ગૌરસ્ય યઃ પયસઃ પીતિમાનશ આ સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૨
આ નો દેવઃ સવિતા સાવિષદ્વય ઋજૂયતે યજમાનાય સુન્વતે ।
યથા દેવાન્પ્રતિભૂષેમ પાકવદા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૩
ઇન્દ્રો અસ્મે સુમના અસ્તુ વિશ્વહા રાજા સોમઃ સુવિતસ્યાધ્યેતુ નઃ ।
યથાયથા મિત્રધિતાનિ સંદધુરા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૪
ઇન્દ્ર ઉક્થેન શવસા પરુર્દધે બૃહસ્પતે પ્રતરીતાસ્યાયુષઃ ।
યજ્ઞો મનુઃ પ્રમતિર્નઃ પિતા હિ કમા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૫
ઇન્દ્રસ્ય નુ સુકૃતં દૈવ્યં સહોઽગ્નિર્ગૃહે જરિતા મેધિરઃ કવિઃ ।
યજ્ઞશ્ચ ભૂદ્વિદથે ચારુરન્તમ આ સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૬

ન વો ગુહા ચકૃમ ભૂરિ દુષ્કૃતં નાવિષ્ટ્યં વસવો દેવહેળનમ્ ।
માકિર્નો દેવા અનૃતસ્ય વર્પસ આ સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૭
અપામીવાં સવિતા સાવિષન્ન્યઙ્ગ્વરીય ઇદપ સેધન્ત્વદ્રયઃ ।
ગ્રાવા યત્ર મધુષુદુચ્યતે બૃહદા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૮
ઊર્ધ્વો ગ્રાવા વસવોઽસ્તુ સોતરિ વિશ્વા દ્વેષાંસિ સનુતર્યુયોત ।
સ નો દેવઃ સવિતા પાયુરીડ્ય આ સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૦૯
ઊર્જં ગાવો યવસે પીવો અત્તન ઋતસ્ય યાઃ સદને કોશે અઙ્ગ્ધ્વે ।
તનૂરેવ તન્વો અસ્તુ ભેષજમા સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૧૦
ક્રતુપ્રાવા જરિતા શશ્વતામવ ઇન્દ્ર ઇદ્ભદ્રા પ્રમતિઃ સુતાવતામ્ ।
પૂર્ણમૂધર્દિવ્યં યસ્ય સિક્તય આ સર્વતાતિમદિતિં વૃણીમહે ॥ ૧૦.૧૦૦.૧૧
ચિત્રસ્તે ભાનુઃ ક્રતુપ્રા અભિષ્ટિઃ સન્તિ સ્પૃધો જરણિપ્રા અધૃષ્ટાઃ ।
રજિષ્ઠયા રજ્યા પશ્વ આ ગોસ્તૂતૂર્ષતિ પર્યગ્રં દુવસ્યુઃ ॥ ૧૦.૧૦૦.૧૨
ઉદ્બુધ્યધ્વં સમનસઃ સખાયઃ સમગ્નિમિન્ધ્વં બહવઃ સનીળાઃ ।
દધિક્રામગ્નિમુષસં ચ દેવીમિન્દ્રાવતોઽવસે નિ હ્વયે વઃ ॥ ૧૦.૧૦૧.૦૧
મન્દ્રા કૃણુધ્વં ધિય આ તનુધ્વં નાવમરિત્રપરણીં કૃણુધ્વમ્ ।
ઇષ્કૃણુધ્વમાયુધારં કૃણુધ્વં પ્રાઞ્ચં યજ્ઞં પ્ર ણયતા સખાયઃ ॥ ૧૦.૧૦૧.૦૨
યુનક્ત સીરા વિ યુગા તનુધ્વં કૃતે યોનૌ વપતેહ બીજમ્ ।
ગિરા ચ શ્રુષ્ટિઃ સભરા અસન્નો નેદીય ઇત્સૃણ્યઃ પક્વમેયાત્ ॥ ૧૦.૧૦૧.૦૩
સીરા યુઞ્જન્તિ કવયો યુગા વિ તન્વતે પૃથક્ ।
ધીરા દેવેષુ સુમ્નયા ॥ ૧૦.૧૦૧.૦૪
નિરાહાવાન્કૃણોતન સં વરત્રા દધાતન ।
સિઞ્ચામહા અવતમુદ્રિણં વયં સુષેકમનુપક્ષિતમ્ ॥ ૧૦.૧૦૧.૦૫
ઇષ્કૃતાહાવમવતં સુવરત્રં સુષેચનમ્ ।
ઉદ્રિણં સિઞ્ચે અક્ષિતમ્ ॥ ૧૦.૧૦૧.૦૬
પ્રીણીતાશ્વાન્હિતં જયાથ સ્વસ્તિવાહં રથમિત્કૃણુધ્વમ્ ।
દ્રોણાહાવમવતમશ્મચક્રમંસત્રકોશં સિઞ્ચતા નૃપાણમ્ ॥ ૧૦.૧૦૧.૦૭
વ્રજં કૃણુધ્વં સ હિ વો નૃપાણો વર્મ સીવ્યધ્વં બહુલા પૃથૂનિ ।

પુરઃ કૃણુધ્વમાયસીરધૃષ્ટા મા વઃ સુસ્રોચ્ચમસો દૃંહતા તમ્ ॥ ૧૦.૧૦૧.૦૮
આ વો ધિયં યજ્ઞિયાં વર્ત ઊતયે દેવા દેવીં યજતાં યજ્ઞિયામિહ ।
સા નો દુહીયદ્યવસેવ ગત્વી સહસ્રધારા પયસા મહી ગૌઃ ॥ ૧૦.૧૦૧.૦૯
આ તૂ ષિઞ્ચ હરિમીં દ્રોરુપસ્થે વાશીભિસ્તક્ષતાશ્મન્મયીભિઃ ।
પરિ ષ્વજધ્વં દશ કક્ષ્યાભિરુભે ધુરૌ પ્રતિ વહ્નિં યુનક્ત ॥ ૧૦.૧૦૧.૧૦
ઉભે ધુરૌ વહ્નિરાપિબ્દમાનોઽન્તર્યોનેવ ચરતિ દ્વિજાનિઃ ।
વનસ્પતિં વન આસ્થાપયધ્વં નિ ષૂ દધિધ્વમખનન્ત ઉત્સમ્ ॥ ૧૦.૧૦૧.૧૧
કપૃન્નરઃ કપૃથમુદ્દધાતન ચોદયત ખુદત વાજસાતયે ।
નિષ્ટિગ્ર્યઃ પુત્રમા ચ્યાવયોતય ઇન્દ્રં સબાધ ઇહ સોમપીતયે ॥ ૧૦.૧૦૧.૧૨

પ્ર તે રથં મિથૂકૃતમિન્દ્રોઽવતુ ધૃષ્ણુયા ।
અસ્મિન્નાજૌ પુરુહૂત શ્રવાય્યે ધનભક્ષેષુ નોઽવ ॥ ૧૦.૧૦૨.૦૧
ઉત્સ્મ વાતો વહતિ વાસોઽસ્યા અધિરથં યદજયત્સહસ્રમ્ ।
રથીરભૂન્મુદ્ગલાની ગવિષ્ટૌ ભરે કૃતં વ્યચેદિન્દ્રસેના ॥ ૧૦.૧૦૨.૦૨
અન્તર્યચ્છ જિઘાંસતો વજ્રમિન્દ્રાભિદાસતઃ ।
દાસસ્ય વા મઘવન્નાર્યસ્ય વા સનુતર્યવયા વધમ્ ॥ ૧૦.૧૦૨.૦૩
ઉદ્નો હ્રદમપિબજ્જર્હૃષાણઃ કૂટં સ્મ તૃંહદભિમાતિમેતિ ।
પ્ર મુષ્કભારઃ શ્રવ ઇચ્છમાનોઽજિરં બાહૂ અભરત્સિષાસન્ ॥ ૧૦.૧૦૨.૦૪
ન્યક્રન્દયન્નુપયન્ત એનમમેહયન્વૃષભં મધ્ય આજેઃ ।
તેન સૂભર્વં શતવત્સહસ્રં ગવાં મુદ્ગલઃ પ્રધને જિગાય ॥ ૧૦.૧૦૨.૦૫
કકર્દવે વૃષભો યુક્ત આસીદવાવચીત્સારથિરસ્ય કેશી ।
દુધેર્યુક્તસ્ય દ્રવતઃ સહાનસ ઋચ્છન્તિ ષ્મા નિષ્પદો મુદ્ગલાનીમ્ ॥ ૧૦.૧૦૨.૦૬
ઉત પ્રધિમુદહન્નસ્ય વિદ્વાનુપાયુનગ્વંસગમત્ર શિક્ષન્ ।
ઇન્દ્ર ઉદાવત્પતિમઘ્ન્યાનામરંહત પદ્યાભિઃ કકુદ્માન્ ॥ ૧૦.૧૦૨.૦૭
શુનમષ્ટ્રાવ્યચરત્કપર્દી વરત્રાયાં દાર્વાનહ્યમાનઃ ।
નૃમ્ણાનિ કૃણ્વન્બહવે જનાય ગાઃ પસ્પશાનસ્તવિષીરધત્ત ॥ ૧૦.૧૦૨.૦૮
ઇમં તં પશ્ય વૃષભસ્ય યુઞ્જં કાષ્ઠાયા મધ્યે દ્રુઘણં શયાનમ્ ।
યેન જિગાય શતવત્સહસ્રં ગવાં મુદ્ગલઃ પૃતનાજ્યેષુ ॥ ૧૦.૧૦૨.૦૯

આરે અઘા કો ન્વિ૧ત્થા દદર્શ યં યુઞ્જન્તિ તમ્વા સ્થાપયન્તિ ।
નાસ્મૈ તૃણં નોદકમા ભરન્ત્યુત્તરો ધુરો વહતિ પ્રદેદિશત્ ॥ ૧૦.૧૦૨.૧૦
પરિવૃક્તેવ પતિવિદ્યમાનટ્ પીપ્યાના કૂચક્રેણેવ સિઞ્ચન્ ।
એષૈષ્યા ચિદ્રથ્યા જયેમ સુમઙ્ગલં સિનવદસ્તુ સાતમ્ ॥ ૧૦.૧૦૨.૧૧
ત્વં વિશ્વસ્ય જગતશ્ચક્ષુરિન્દ્રાસિ ચક્ષુષઃ ।
વૃષા યદાજિં વૃષણા સિષાસસિ ચોદયન્વધ્રિણા યુજા ॥ ૧૦.૧૦૨.૧૨
આશુઃ શિશાનો વૃષભો ન ભીમો ઘનાઘનઃ ક્ષોભણશ્ચર્ષણીનામ્ ।
સંક્રન્દનોઽનિમિષ એકવીરઃ શતં સેના અજયત્સાકમિન્દ્રઃ ॥ ૧૦.૧૦૩.૦૧
સંક્રન્દનેનાનિમિષેણ જિષ્ણુના યુત્કારેણ દુશ્ચ્યવનેન ધૃષ્ણુના ।
તદિન્દ્રેણ જયત તત્સહધ્વં યુધો નર ઇષુહસ્તેન વૃષ્ણા ॥ ૧૦.૧૦૩.૦૨
સ ઇષુહસ્તૈઃ સ નિષઙ્ગિભિર્વશી સંસ્રષ્ટા સ યુધ ઇન્દ્રો ગણેન ।
સંસૃષ્ટજિત્સોમપા બાહુશર્ધ્યુ૧ગ્રધન્વા પ્રતિહિતાભિરસ્તા ॥ ૧૦.૧૦૩.૦૩
બૃહસ્પતે પરિ દીયા રથેન રક્ષોહામિત્રાઁ અપબાધમાનઃ ।
પ્રભઞ્જન્સેનાઃ પ્રમૃણો યુધા જયન્નસ્માકમેધ્યવિતા રથાનામ્ ॥ ૧૦.૧૦૩.૦૪
બલવિજ્ઞાયઃ સ્થવિરઃ પ્રવીરઃ સહસ્વાન્વાજી સહમાન ઉગ્રઃ ।
અભિવીરો અભિસત્વા સહોજા જૈત્રમિન્દ્ર રથમા તિષ્ઠ ગોવિત્ ॥ ૧૦.૧૦૩.૦૫
ગોત્રભિદં ગોવિદં વજ્રબાહું જયન્તમજ્મ પ્રમૃણન્તમોજસા ।
ઇમં સજાતા અનુ વીરયધ્વમિન્દ્રં સખાયો અનુ સં રભધ્વમ્ ॥ ૧૦.૧૦૩.૦૬
અભિ ગોત્રાણિ સહસા ગાહમાનોઽદયો વીરઃ શતમન્યુરિન્દ્રઃ ।
દુશ્ચ્યવનઃ પૃતનાષાળયુધ્યો૩ઽસ્માકં સેના અવતુ પ્ર યુત્સુ ॥ ૧૦.૧૦૩.૦૭
ઇન્દ્ર આસાં નેતા બૃહસ્પતિર્દક્ષિણા યજ્ઞઃ પુર એતુ સોમઃ ।
દેવસેનાનામભિભઞ્જતીનાં જયન્તીનાં મરુતો યન્ત્વગ્રમ્ ॥ ૧૦.૧૦૩.૦૮
ઇન્દ્રસ્ય વૃષ્ણો વરુણસ્ય રાજ્ઞ આદિત્યાનાં મરુતાં શર્ધ ઉગ્રમ્ ।
મહામનસાં ભુવનચ્યવાનાં ઘોષો દેવાનાં જયતામુદસ્થાત્ ॥ ૧૦.૧૦૩.૦૯
ઉદ્ધર્ષય મઘવન્નાયુધાન્યુત્સત્વનાં મામકાનાં મનાંસિ ।
ઉદ્વૃત્રહન્વાજિનાં વાજિનાન્યુદ્રથાનાં જયતાં યન્તુ ઘોષાઃ ॥ ૧૦.૧૦૩.૧૦
અસ્માકમિન્દ્રઃ સમૃતેષુ ધ્વજેષ્વસ્માકં યા ઇષવસ્તા જયન્તુ ।

અસ્માકં વીરા ઉત્તરે ભવન્ત્વસ્માઁ ઉ દેવા અવતા હવેષુ ॥ ૧૦.૧૦૩.૧૧
અમીષાં ચિત્તં પ્રતિલોભયન્તી ગૃહાણાઙ્ગાન્યપ્વે પરેહિ ।
અભિ પ્રેહિ નિર્દહ હૃત્સુ શોકૈરન્ધેનામિત્રાસ્તમસા સચન્તામ્ ॥ ૧૦.૧૦૩.૧૨
પ્રેતા જયતા નર ઇન્દ્રો વઃ શર્મ યચ્છતુ ।
ઉગ્રા વઃ સન્તુ બાહવોઽનાધૃષ્યા યથાસથ ॥ ૧૦.૧૦૩.૧૩
અસાવિ સોમઃ પુરુહૂત તુભ્યં હરિભ્યાં યજ્ઞમુપ યાહિ તૂયમ્ ।
તુભ્યં ગિરો વિપ્રવીરા ઇયાના દધન્વિર ઇન્દ્ર પિબા સુતસ્ય ॥ ૧૦.૧૦૪.૦૧
અપ્સુ ધૂતસ્ય હરિવઃ પિબેહ નૃભિઃ સુતસ્ય જઠરં પૃણસ્વ ।
મિમિક્ષુર્યમદ્રય ઇન્દ્ર તુભ્યં તેભિર્વર્ધસ્વ મદમુક્થવાહઃ ॥ ૧૦.૧૦૪.૦૨
પ્રોગ્રાં પીતિં વૃષ્ણ ઇયર્મિ સત્યાં પ્રયૈ સુતસ્ય હર્યશ્વ તુભ્યમ્ ।
ઇન્દ્ર ધેનાભિરિહ માદયસ્વ ધીભિર્વિશ્વાભિઃ શચ્યા ગૃણાનઃ ॥ ૧૦.૧૦૪.૦૩
ઊતી શચીવસ્તવ વીર્યેણ વયો દધાના ઉશિજ ઋતજ્ઞાઃ ।
પ્રજાવદિન્દ્ર મનુષો દુરોણે તસ્થુર્ગૃણન્તઃ સધમાદ્યાસઃ ॥ ૧૦.૧૦૪.૦૪
પ્રણીતિભિષ્ટે હર્યશ્વ સુષ્ટોઃ સુષુમ્નસ્ય પુરુરુચો જનાસઃ ।
મંહિષ્ઠામૂતિં વિતિરે દધાનાઃ સ્તોતાર ઇન્દ્ર તવ સૂનૃતાભિઃ ॥ ૧૦.૧૦૪.૦૫
ઉપ બ્રહ્માણિ હરિવો હરિભ્યાં સોમસ્ય યાહિ પીતયે સુતસ્ય ।
ઇન્દ્ર ત્વા યજ્ઞઃ ક્ષમમાણમાનડ્દાશ્વાઁ અસ્યધ્વરસ્ય પ્રકેતઃ ॥ ૧૦.૧૦૪.૦૬
સહસ્રવાજમભિમાતિષાહં સુતેરણં મઘવાનં સુવૃક્તિમ્ ।
ઉપ ભૂષન્તિ ગિરો અપ્રતીતમિન્દ્રં નમસ્યા જરિતુઃ પનન્ત ॥ ૧૦.૧૦૪.૦૭
સપ્તાપો દેવીઃ સુરણા અમૃક્તા યાભિઃ સિન્ધુમતર ઇન્દ્ર પૂર્ભિત્ ।
નવતિં સ્રોત્યા નવ ચ સ્રવન્તીર્દેવેભ્યો ગાતું મનુષે ચ વિન્દઃ ॥ ૧૦.૧૦૪.૦૮
અપો મહીરભિશસ્તેરમુઞ્ચોઽજાગરાસ્વધિ દેવ એકઃ ।
ઇન્દ્ર યાસ્ત્વં વૃત્રતૂર્યે ચકર્થ તાભિર્વિશ્વાયુસ્તન્વં પુપુષ્યાઃ ॥ ૧૦.૧૦૪.૦૯
વીરેણ્યઃ ક્રતુરિન્દ્રઃ સુશસ્તિરુતાપિ ધેના પુરુહૂતમીટ્ટે ।
આર્દયદ્વૃત્રમકૃણોદુ લોકં સસાહે શક્રઃ પૃતના અભિષ્ટિઃ ॥ ૧૦.૧૦૪.૧૦
શુનં હુવેમ મઘવાનમિન્દ્રમસ્મિન્ભરે નૃતમં વાજસાતૌ ।
શ‌ૃણ્વન્તમુગ્રમૂતયે સમત્સુ ઘ્નન્તં વૃત્રાણિ સંજિતં ધનાનામ્ ॥ ૧૦.૧૦૪.૧૧

કદા વસો સ્તોત્રં હર્યત આવ શ્મશા રુધદ્વાઃ ।
દીર્ઘં સુતં વાતાપ્યાય ॥ ૧૦.૧૦૫.૦૧
હરી યસ્ય સુયુજા વિવ્રતા વેર્વન્તાનુ શેપા ।
ઉભા રજી ન કેશિના પતિર્દન્ ॥ ૧૦.૧૦૫.૦૨
અપ યોરિન્દ્રઃ પાપજ આ મર્તો ન શશ્રમાણો બિભીવાન્ ।
શુભે યદ્યુયુજે તવિષીવાન્ ॥ ૧૦.૧૦૫.૦૩
સચાયોરિન્દ્રશ્ચર્કૃષ આઁ ઉપાનસઃ સપર્યન્ ।
નદયોર્વિવ્રતયોઃ શૂર ઇન્દ્રઃ ॥ ૧૦.૧૦૫.૦૪
અધિ યસ્તસ્થૌ કેશવન્તા વ્યચસ્વન્તા ન પુષ્ટ્યૈ ।
વનોતિ શિપ્રાભ્યાં શિપ્રિણીવાન્ ॥ ૧૦.૧૦૫.૦૫
પ્રાસ્તૌદૃષ્વૌજા ઋષ્વેભિસ્તતક્ષ શૂરઃ શવસા ।
ઋભુર્ન ક્રતુભિર્માતરિશ્વા ॥ ૧૦.૧૦૫.૦૬
વજ્રં યશ્ચક્રે સુહનાય દસ્યવે હિરીમશો હિરીમાન્ ।
અરુતહનુરદ્ભુતં ન રજઃ ॥ ૧૦.૧૦૫.૦૭
અવ નો વૃજિના શિશીહ્યૃચા વનેમાનૃચઃ ।
નાબ્રહ્મા યજ્ઞ ઋધગ્જોષતિ ત્વે ॥ ૧૦.૧૦૫.૦૮
ઊર્ધ્વા યત્તે ત્રેતિની ભૂદ્યજ્ઞસ્ય ધૂર્ષુ સદ્મન્ ।
સજૂર્નાવં સ્વયશસં સચાયોઃ ॥ ૧૦.૧૦૫.૦૯
શ્રિયે તે પૃશ્નિરુપસેચની ભૂચ્છ્રિયે દર્વિરરેપાઃ ।
યયા સ્વે પાત્રે સિઞ્ચસ ઉત્ ॥ ૧૦.૧૦૫.૧૦
શતં વા યદસુર્ય પ્રતિ ત્વા સુમિત્ર ઇત્થાસ્તૌદ્દુર્મિત્ર ઇત્થાસ્તૌત્ ।
આવો યદ્દસ્યુહત્યે કુત્સપુત્રં પ્રાવો યદ્દસ્યુહત્યે કુત્સવત્સમ્ ॥ ૧૦.૧૦૫.૧૧
ઉભા ઉ નૂનં તદિદર્થયેથે વિ તન્વાથે ધિયો વસ્ત્રાપસેવ ।
સધ્રીચીના યાતવે પ્રેમજીગઃ સુદિનેવ પૃક્ષ આ તંસયેથે ॥ ૧૦.૧૦૬.૦૧
ઉષ્ટારેવ ફર્વરેષુ શ્રયેથે પ્રાયોગેવ શ્વાત્ર્યા શાસુરેથઃ ।
દૂતેવ હિ ષ્ઠો યશસા જનેષુ માપ સ્થાતં મહિષેવાવપાનાત્ ॥ ૧૦.૧૦૬.૦૨
સાકંયુજા શકુનસ્યેવ પક્ષા પશ્વેવ ચિત્રા યજુરા ગમિષ્ટમ્ ।

અગ્નિરિવ દેવયોર્દીદિવાંસા  પરિજ્માનેવ યજથઃ પુરુત્રા ॥ ૧૦.૧૦૬.૦૩
આપી વો  અસ્મે પિતરેવ પુત્રોગ્રેવ  રુચા નૃપતીવ તુર્યૈ ।
ઇર્યેવ પુષ્ટ્યૈ કિરણેવ ભુજ્યૈ શ્રુષ્ટીવાનેવ  હવમા ગમિષ્ટમ્ ॥ ૧૦.૧૦૬.૦૪
વંસગેવ પૂષર્યા  શિમ્બાતા  મિત્રેવ  ઋતા શતરા  શાતપન્તા ।
વાજેવોચ્ચા વયસા ઘર્મ્યેષ્ઠા મેષેવેષા સપર્યાઉ  પુરીષા ॥ ૧૦.૧૦૬.૦૫
સૃણ્યેવ જર્ભરી  તુર્ફરીતૂ નૈતોશેવ  તુર્ફરી  પર્ફરીકા  ।
ઉદન્યજેવ  જેમના મદેરૂ તા મે  જરાય્વજરં  મરાયુ  ॥ ૧૦.૧૦૬.૦૬
પજ્રેવ  ચર્ચરં  જારં  મરાયુ  ક્ષદ્મેવાર્થેષુ તર્તરીથ ઉગ્રા ।
ઋભૂ નાપત્ખરમજ્રા ખરજ્રુર્વાયુર્ન પર્ફરત્ક્ષયદ્રયીણામ્ ॥ ૧૦.૧૦૬.૦૭
ઘર્મેવ  મધુ  જઠરે  સનેરૂ  ભગેવિતા તુર્ફરી  ફારિવારમ્ ।
પતરેવ  ચચરા ચન્દ્રનિર્ણિઙ્મનઋઙ્ગા મનન્યાઉ  ન જગ્મી  ॥ ૧૦.૧૦૬.૦૮
બૃહન્તેવ ગમ્ભરેષુ પ્રતિષ્ઠાં પાદેવ ગાધં તરતે વિદાથઃ ।
કર્ણેવ  શાસુરનુ  હિ સ્મરાથોંઽશેવ નો ભજતં ચિત્રમપ્નઃ  ॥ ૧૦.૧૦૬.૦૯
આરઙ્ગરેવ  મધ્વેરયેથે સારઘેવ  ગવિ  નીચીનબારે ।
કીનારેવ  સ્વેદમાસિષ્વિદાના ક્ષામેવોર્જા સૂયવસાત્સચેથે ॥ ૧૦.૧૦૬.૧૦
ઋધ્યામ  સ્તોમં  સનુયામ  વાજમા નો  મન્ત્રં  સરથેહોપ  યાતમ્ ।
યશો  ન પક્વં મધુ  ગોષ્વન્તરા ભૂતાંશો  અશ્વિનોઃ  કામમપ્રાઃ ॥ ૧૦.૧૦૬.૧૧
આવિરભૂન્મહિ  માઘોનમેષાં  વિશ્વં  જીવં તમસો  નિરમોચિ ।
મહિ  જ્યોતિઃ  પિતૃભિર્દત્તમાગાદુરુઃ પન્થા  દક્ષિણાયા અદર્શિ ॥ ૧૦.૧૦૭.૦૧
ઉચ્ચા દિવિ દક્ષિણાવન્તો અસ્થુર્યે અશ્વદાઃ સહ તે સૂર્યેણ ।
હિરણ્યદા અમૃતત્વં ભજન્તે વાસોદાઃ સોમ  પ્ર તિરન્ત  આયુઃ  ॥ ૧૦.૧૦૭.૦૨
દૈવી  પૂર્તિર્દક્ષિણા દેવયજ્યા ન કવારિભ્યો  નહિ તે પૃણન્તિ  ।
અથા  નરઃ  પ્રયતદક્ષિણાસોઽવદ્યભિયા બહવઃ  પૃણન્તિ ॥ ૧૦.૧૦૭.૦૩
શતધારં વાયુમર્કં સ્વર્વિદં  નૃચક્ષસસ્તે અભિ ચક્ષતે હવિઃ ।
યે પૃણન્તિ  પ્ર ચ  યચ્છન્તિ સંગમે તે દક્ષિણાં દુહતે સપ્તમાતરમ્ ॥ ૧૦.૧૦૭.૦૪
દક્ષિણાવાન્પ્રથમો હૂત એતિ  દક્ષિણાવાન્ગ્રામણીરગ્રમેતિ ।
તમેવ મન્યે નૃપતિં  જનાનાં  યઃ પ્રથમો દક્ષિણામાવિવાય  ॥ ૧૦.૧૦૭.૦૫

તમેવ ઋષિં તમુ બ્રહ્માણમાહુર્યજ્ઞન્યં સામગામુક્થશાસમ્ ।
સ શુક્રસ્ય તન્વો વેદ તિસ્રો યઃ પ્રથમો દક્ષિણયા રરાધ ॥ ૧૦.૧૦૭.૦૬
દક્ષિણાશ્વં દક્ષિણા ગાં દદાતિ દક્ષિણા ચન્દ્રમુત યદ્ધિરણ્યમ્ ।
દક્ષિણાન્નં વનુતે યો ન આત્મા દક્ષિણાં વર્મ કૃણુતે વિજાનન્ ॥ ૧૦.૧૦૭.૦૭
ન ભોજા મમ્રુર્ન ન્યર્થમીયુર્ન રિષ્યન્તિ ન વ્યથન્તે હ ભોજાઃ ।
ઇદં યદ્વિશ્વં ભુવનં સ્વશ્ચૈતત્સર્વં દક્ષિણૈભ્યો દદાતિ ॥ ૧૦.૧૦૭.૦૮
ભોજા જિગ્યુઃ સુરભિં યોનિમગ્રે ભોજા જિગ્યુર્વધ્વં૧ યા સુવાસાઃ ।
ભોજા જિગ્યુરન્તઃપેયં સુરાયા ભોજા જિગ્યુર્યે અહૂતાઃ પ્રયન્તિ ॥ ૧૦.૧૦૭.૦૯
ભોજાયાશ્વં સં મૃજન્ત્યાશું ભોજાયાસ્તે કન્યાꣳ શુમ્ભમાના ।
ભોજસ્યેદં પુષ્કરિણીવ વેશ્મ પરિષ્કૃતં દેવમાનેવ ચિત્રમ્ ॥ ૧૦.૧૦૭.૧૦
ભોજમશ્વાઃ સુષ્ઠુવાહો વહન્તિ સુવૃદ્રથો વર્તતે દક્ષિણાયાઃ ।
ભોજં દેવાસોઽવતા ભરેષુ ભોજઃ શત્રૂન્સમનીકેષુ જેતા ॥ ૧૦.૧૦૭.૧૧

કિમિચ્છન્તી સરમા પ્રેદમાનડ્દૂરે હ્યધ્વા જગુરિઃ પરાચૈઃ ।
કાસ્મેહિતિઃ કા પરિતક્મ્યાસીત્કથં રસાયા અતરઃ પયાંસિ ॥ ૧૦.૧૦૮.૦૧
ઇન્દ્રસ્ય દૂતીરિષિતા ચરામિ મહ ઇચ્છન્તી પણયો નિધીન્વઃ ।
અતિષ્કદો ભિયસા તન્ન આવત્તથા રસાયા અતરં પયાંસિ ॥ ૧૦.૧૦૮.૦૨
કીદૃઙિન્દ્રઃ સરમે કા દૃશીકા યસ્યેદં દૂતીરસરઃ પરાકાત્ ।
આ ચ ગચ્છાન્મિત્રમેના દધામાથા ગવાં ગોપતિર્નો ભવાતિ ॥ ૧૦.૧૦૮.૦૩
નાહં તં વેદ દભ્યં દભત્સ યસ્યેદં દૂતીરસરં પરાકાત્ ।
ન તં ગૂહન્તિ સ્રવતો ગભીરા હતા ઇન્દ્રેણ પણયઃ શયધ્વે ॥ ૧૦.૧૦૮.૦૪
ઇમા ગાવઃ સરમે યા ઐચ્છઃ પરિ દિવો અન્તાન્સુભગે પતન્તી ।
કસ્ત એના અવ સૃજાદયુધ્વ્યુતાસ્માકમાયુધા સન્તિ તિગ્મા ॥ ૧૦.૧૦૮.૦૫
અસેન્યા વઃ પણયો વચાંસ્યનિષવ્યાસ્તન્વઃ સન્તુ પાપીઃ ।
અધૃષ્ટો વ એતવા અસ્તુ પન્થા બૃહસ્પતિર્વ ઉભયા ન મૃળાત્ ॥ ૧૦.૧૦૮.૦૬
અયં નિધિઃ સરમે અદ્રિબુધ્નો ગોભિરશ્વેભિર્વસુભિર્ન્યૃષ્ટઃ ।
રક્ષન્તિ તં પણયો યે સુગોપા રેકુ પદમલકમા જગન્થ ॥ ૧૦.૧૦૮.૦૭
એહ ગમન્નૃષયઃ સોમશિતા અયાસ્યો અઙ્ગિરસો નવગ્વાઃ ।

ત એતમૂર્વં વિ ભજન્ત ગોનામથૈતદ્વચઃ પણયો વમન્નિત્ ॥ ૧૦.૧૦૮.૦૮

એવા ચ ત્વં સરમ આજગન્થ પ્રબાધિતા સહસા દૈવ્યેન ।

સ્વસારં ત્વા કૃણવૈ મા પુનર્ગા અપ તે ગવાં સુભગે ભજામ ॥ ૧૦.૧૦૮.૦૯

નાહં વેદ ભ્રાતૃત્વં નો સ્વસૃત્વમિન્દ્રો વિદુરઙ્ગિરસશ્ચ ઘોરાઃ ।

ગોકામા મે અચ્છદયન્યદાયમપાત ઇત પણયો વરીયઃ ॥ ૧૦.૧૦૮.૧૦

દૂરમિત પણયો વરીય ઉદ્ગાવો યન્તુ મિનતીરૃતેન ।

બૃહસ્પતિર્યા અવિન્દન્નિગૂળ્હાઃ સોમો ગ્રાવાણ ઋષયશ્ચ વિપ્રાઃ ॥ ૧૦.૧૦૮.૧૧

તેઽવદન્પ્રથમા બ્રહ્મકિલ્બિષેઽકૂપારઃ સલિલો માતરિશ્વા ।

વીળુહરાસ્તપ ઉગ્રો મયોભૂરાપો દેવીઃ પ્રથમજા ઋતેન ॥ ૧૦.૧૦૯.૦૧

સોમો રાજા પ્રથમો બ્રહ્મજાયાં પુનઃ પ્રાયચ્છદહૃણીયમાનઃ ।

અન્વર્તિતા વરુણો મિત્ર આસીદગ્નિર્હોતા હસ્તગૃહ્યા નિનાય ॥ ૧૦.૧૦૯.૦૨

હસ્તેનૈવ ગ્રાહ્ય આધિરસ્યા બ્રહ્મજાયેયમિતિ ચેદવોચન્ ।

ન દૂતાય પ્રહ્યે તસ્થ એષા તથા રાષ્ટ્રં ગુપિતં ક્ષત્રિયસ્ય ॥ ૧૦.૧૦૯.૦૩

દેવા એતસ્યામવદન્ત પૂર્વે સપ્તઋષયસ્તપસે યે નિષેદુઃ ।

ભીમા જાયા બ્રાહ્મણસ્યોપનીતા દુર્ધાં દધાતિ પરમે વ્યોમન્ ॥ ૧૦.૧૦૯.૦૪

બ્રહ્મચારી ચરતિ વેવિષદ્વિષઃ સ દેવાનાં ભવત્યેકમઙ્ગમ્ ।

તેન જાયામન્વવિન્દદ્બૃહસ્પતિઃ સોમેન નીતાં જુહ્વં ન દેવાઃ ॥ ૧૦.૧૦૯.૦૫

પુનર્વૈ દેવા અદદુઃ પુનર્મનુષ્યા ઉત ।

રાજાનઃ સત્યં કૃણ્વાના બ્રહ્મજાયાં પુનર્દદુઃ ॥ ૧૦.૧૦૯.૦૬

પુનર્દાય બ્રહ્મજાયાં કૃત્વી દેવૈર્નિકિલ્બિષમ્ ।

ઊર્જં પૃથિવ્યા ભક્ત્વાયોરુગાયમુપાસતે ॥ ૧૦.૧૦૯.૦૭

સમિદ્ધો અદ્ય મનુષો દુરોણે દેવો દેવાન્યજસિ જાતવેદઃ ।

આ ચ વહ મિત્રમહશ્ચિકિત્વાન્ત્વં દૂતઃ કવિરસિ પ્રચેતાઃ ॥ ૧૦.૧૧૦.૦૧

તનૂનપાત્પથ ઋતસ્ય યાનાન્મધ્વા સમઞ્જન્સ્વદયા સુજિહ્વ ।

મન્માનિ ધીભિરુત યજ્ઞમૃન્ધન્દેવત્રા ચ કૃણુહ્યધ્વરં નઃ ॥ ૧૦.૧૧૦.૦૨

આજુહ્વાન ઈડ્યો વન્દ્યશ્ચા યાહ્યગ્ને વસુભિઃ સજોષાઃ ।

ત્વં દેવાનામસિ યહ્વ હોતા સ એનાન્યક્ષીષિતો યજીયાન્ ॥ ૧૦.૧૧૦.૦૩

પ્રાચીનં બર્હિઃ પ્રદિશા પૃથિવ્યા વસ્તોરસ્યા વૃજ્યતે અગ્રે અહ્નામ્ ।
વ્યુ પ્રથતે વિતરં વરીયો દેવેભ્યો અદિતયે સ્યોનમ્ ॥ ૧૦.૧૧૦.૦૪
વ્યચસ્વતીરુર્વિયા વિ શ્રયન્તાં પતિભ્યો ન જનયઃ શુમ્ભમાનાઃ ।
દેવીર્દ્વારો બૃહતીર્વિશ્વમિન્વા દેવેભ્યો ભવત સુપ્રાયણાઃ ॥ ૧૦.૧૧૦.૦૫
આ સુષ્વયન્તી યજતે ઉપાકે ઉષાસાનક્તા સદતાં નિ યોનૌ ।
દિવ્યે યોષણે બૃહતી સુરુક્મે અધિ શ્રિયં શુક્રપિશં દધાને ॥ ૧૦.૧૧૦.૦૬
દૈવ્યા હોતારા પ્રથમા સુવાચા મિમાના યજ્ઞં મનુષો યજધ્યૈ ।
પ્રચોદયન્તા વિદથેષુ કારૂ પ્રાચીનં જ્યોતિઃ પ્રદિશા દિશન્તા ॥ ૧૦.૧૧૦.૦૭
આ નો યજ્ઞં ભારતી તૂયમેત્વિળા મનુષ્વદિહ ચેતયન્તી ।
તિસ્રો દેવીર્બર્હિરેદં સ્યોનં સરસ્વતી સ્વપસઃ સદન્તુ ॥ ૧૦.૧૧૦.૦૮
ય ઇમે દ્યાવાપૃથિવી જનિત્રી રૂપૈરપિંશદ્ભુવનાનિ વિશ્વા ।
તમદ્ય હોતરિષિતો યજીયાન્દેવં ત્વષ્ટારમિહ યક્ષિ વિદ્વાન્ ॥ ૧૦.૧૧૦.૦૯
ઉપાવસૃજ ત્મન્યા સમઞ્જન્દેવાનાં પાથ ઋતુથા હવીંષિ ।
વનસ્પતિઃ શમિતા દેવો અગ્નિઃ સ્વદન્તુ હવ્યં મધુના ઘૃતેન ॥ ૧૦.૧૧૦.૧૦
સદ્યો જાતો વ્યમિમીત યજ્ઞમગ્નિર્દેવાનામભવત્પુરોગાઃ ।
અસ્ય હોતુઃ પ્રદિશ્યૃતસ્ય વાચિ સ્વાહાકૃતં હવિરદન્તુ દેવાઃ ॥ ૧૦.૧૧૦.૧૧

મનીષિણઃ પ્ર ભરધ્વં મનીષાં યથાયથા મતયઃ સન્તિ નૃણામ્ ।
ઇન્દ્રં સત્યૈરેરયામા કૃતેભિઃ સ હિ વીરો ગિર્વણસ્યુર્વિદાનઃ ॥ ૧૦.૧૧૧.૦૧
ઋતસ્ય હિ સદસો ધીતિરદ્યૌત્સં ગાર્ષ્ટેયો વૃષભો ગોભિરાનટ્ ।
ઉદતિષ્ઠત્તવિષેણા રવેણ મહાન્તિ ચિત્સં વિવ્યાચા રજાંસિ ॥ ૧૦.૧૧૧.૦૨
ઇન્દ્રઃ કિલ શ્રુત્યા અસ્ય વેદ સ હિ જિષ્ણુઃ પથિકૃત્સૂર્યાય ।
આન્મેનાં કૃણ્વન્નચ્યુતો ભુવદ્ગોઃ પતિર્દિવઃ સનજા અપ્રતીતઃ ॥ ૧૦.૧૧૧.૦૩
ઇન્દ્રો મહ્ના મહતો અર્ણવસ્ય વ્રતામિનાદઙ્ગિરોભિર્ગૃણાનઃ ।
પુરૂણિ ચિન્નિ તતાના રજાંસિ દાધાર યો ધરુણં સત્યતાતા ॥ ૧૦.૧૧૧.૦૪
ઇન્દ્રો દિવઃ પ્રતિમાનં પૃથિવ્યા વિશ્વા વેદ સવના હન્તિ શુષ્ણમ્ ।
મહીં ચિદ્દ્યામાતનોત્સૂર્યેણ ચાસ્કમ્ભ ચિત્કમ્ભનેન સ્કભીયાન્ ॥ ૧૦.૧૧૧.૦૫
વજ્રેણ હિ વૃત્રહા વૃત્રમસ્તરદેવસ્ય શૂશુવાનસ્ય માયાઃ ।

વિ ધૃષ્ણો અત્ર ધૃષતા જઘન્થાથાભવો મઘવન્બાહ્વોજાઃ ॥ ૧૦.૧૧૧.૦૬
સચન્ત યદુષસઃ સૂર્યેણ ચિત્રામસ્ય કેતવો રામવિન્દન્ ।
આ યન્નક્ષત્રં દદૃશે દિવો ન પુનર્યતો નકિરદ્ધા નુ વેદ ॥ ૧૦.૧૧૧.૦૭
દૂરં કિલ પ્રથમા જગ્મુરાસામિન્દ્રસ્ય યાઃ પ્રસવે સસ્રુરાપઃ ।
ક્વ સ્વિદગ્રં ક્વ બુધ્ન આસામાપો મધ્યં ક્વ વો નૂનમન્તઃ ॥ ૧૦.૧૧૧.૦૮
સૃજઃ સિન્ધૂઁ૱રહિના જગ્રસાનાઁ આદિદેતાઃ પ્ર વિવિજ્રે જવેન ।
મુમુક્ષમાણા ઉત યા મુમુચ્રેઽધેદેતા ન રમન્તે નિતિક્તાઃ ॥ ૧૦.૧૧૧.૦૯
સધ્રીચીઃ સિન્ધુમુશતીરિવાયન્સનાજ્જાર આરિતઃ પૂર્ભિદાસામ્ ।
અસ્તમા તે પાર્થિવા વસૂન્યસ્મે જગ્મુઃ સૂનૃતા ઇન્દ્ર પૂર્વીઃ ॥ ૧૦.૧૧૧.૧૦

ઇન્દ્ર પિબ પ્રતિકામં સુતસ્ય પ્રાતઃસાવસ્તવ હિ પૂર્વપીતિઃ ।
હર્ષસ્વ હન્તવે શૂર શત્રૂનુક્થેભિષ્ટે વીર્યા૩ પ્ર બ્રવામ ॥ ૧૦.૧૧૨.૦૧
યસ્તે રથો મનસો જવીયાનેન્દ્ર તેન સોમપેયાય યાહિ ।
તૂયમા તે હરયઃ પ્ર દ્રવન્તુ યેભિર્યાસિ વૃષભિર્મન્દમાનઃ ॥ ૧૦.૧૧૨.૦૨
હરિત્વતા વર્ચસા સૂર્યસ્ય શ્રેષ્ઠૈ રૂપૈસ્તન્વં સ્પર્શયસ્વ ।
અસ્માભિરિન્દ્ર સખિભિર્હુવાનઃ સધ્રીચીનો માદયસ્વા નિષદ્ય ॥ ૧૦.૧૧૨.૦૩
યસ્ય ત્યત્તે મહિમાનં મદેષ્વિમે મહી રોદસી નાવિવિક્તામ્ ।
તદોક આ હરિભિરિન્દ્ર યુક્તૈઃ પ્રિયેભિર્યાહિ પ્રિયમન્નમચ્છ ॥ ૧૦.૧૧૨.૦૪
યસ્ય શશ્વત્પપિવાઁ ઇન્દ્ર શત્રૂનનાનુકૃત્યા રણ્યા ચકર્થ ।
સ તે પુરંધિં તવિષીમિયર્તિ સ તે મદાય સુત ઇન્દ્ર સોમઃ ॥ ૧૦.૧૧૨.૦૫
ઇદં તે પાત્રં સનવિત્તમિન્દ્ર પિબા સોમમેના શતક્રતો ।
પૂર્ણ આહાવો મદિરસ્ય મધ્વો યં વિશ્વ ઇદભિહર્યન્તિ દેવાઃ ॥ ૧૦.૧૧૨.૦૬
વિ હિ ત્વામિન્દ્ર પુરુધા જનાસો હિતપ્રયસો વૃષભ હ્વયન્તે ।
અસ્માકં તે મધુમત્તમાનીમા ભુવન્સવના તેષુ હર્ય ॥ ૧૦.૧૧૨.૦૭
પ્ર ત ઇન્દ્ર પૂર્વ્યાણિ પ્ર નૂનં વીર્યા વોચં પ્રથમા કૃતાનિ ।
સતીનમન્યુરશ્રથાયો અદ્રિં સુવેદનામકૃણોર્બ્રહ્મણે ગામ્ ॥ ૧૦.૧૧૨.૦૮
નિ ષુ સીદ ગણપતે ગણેષુ ત્વામાહુર્વિપ્રતમં કવીનામ્ ।
ન ઋતે ત્વત્ક્રિયતે કિં ચનારે મહામર્કં મઘવઞ્ચિત્રમર્ચ ॥ ૧૦.૧૧૨.૦૯

અભિખ્યા નો મઘવન્નાધમાનાન્સખે બોધિ વસુપતે સખીનામ્ ।
રણં કૃધિ રણકૃત્સત્યશુષ્માભક્તે ચિદા ભજા રાયે અસ્માન્ ॥ ૧૦.૧૧૨.૧૦

તમસ્ય દ્યાવાપૃથિવી સચેતસા વિશ્વેભિર્દેવૈરનુ શુષ્મમાવતામ્ ।
યદૈત્કૃણ્વાનો મહિમાનમિન્દ્રિયં પીત્વી સોમસ્ય ક્રતુમાઁ અવર્ધત ॥ ૧૦.૧૧૩.૦૧
તમસ્ય વિષ્ણુર્મહિમાનમોજસાંશું દધન્વાન્મધુનો વિ રપ્શતે ।
દેવેભિરિન્દ્રો મઘવા સયાવભિર્વૃત્રં જઘન્વાઁ અભવદ્વરેણ્યઃ ॥ ૧૦.૧૧૩.૦૨
વૃત્રેણ યદહિના બિભ્રદાયુધા સમસ્થિથા યુધયે શંસમાવિદે ।
વિશ્વે તે અત્ર મરુતઃ સહ ત્મનાવર્ધન્નુગ્ર મહિમાનમિન્દ્રિયમ્ ॥ ૧૦.૧૧૩.૦૩
જજ્ઞાન એવ વ્યબાધત સ્પૃધઃ પ્રાપશ્યદ્વીરો અભિ પૌંસ્યં રણમ્ ।
અવૃશ્ચદદ્રિમવ સસ્યદઃ સૃજદસ્તભ્નાન્નાકં સ્વપસ્યયા પૃથુમ્ ॥ ૧૦.૧૧૩.૦૪
આદિન્દ્રઃ સત્રા તવિષીરપત્યત વરીયો દ્યાવાપૃથિવી અબાધત ।
અવાભરદ્ધૃષિતો વજ્રમાયસં શેવં મિત્રાય વરુણાય દાશુષે ॥ ૧૦.૧૧૩.૦૫
ઇન્દ્રસ્યાત્ર તવિષીભ્યો વિરપ્શિન ઋઘાયતો અરંહયન્ત મન્યવે ।
વૃત્રં યદુગ્રો વ્યવૃશ્ચદોજસાપો બિભ્રતં તમસા પરીવૃતમ્ ॥ ૧૦.૧૧૩.૦૬
યા વીર્યાણિ પ્રથમાનિ કર્ત્વા મહિત્વેભિર્યતમાનૌ સમીયતુઃ ।
ધ્વાન્તં તમોઽવ દધ્વસે હત ઇન્દ્રો મહ્ના પૂર્વહૂતાવપત્યત ॥ ૧૦.૧૧૩.૦૭
વિશ્વે દેવાસો અધ વૃષ્ણ્યાનિ તેઽવર્ધયન્સોમવત્યા વચસ્યયા ।
રદ્ધં વૃત્રમહિમિન્દ્રસ્ય હન્મનાગ્નિર્ન જમ્ભૈસ્તૃષ્વન્નમાવયત્ ॥ ૧૦.૧૧૩.૦૮
ભૂરિ દક્ષેભિર્વચનેભિરૃક્વભિઃ સખ્યેભિઃ સખ્યાનિ પ્ર વોચત ।
ઇન્દ્રો ધુનિં ચ ચુમુરિં ચ દમ્ભયઞ્છ્રદ્ધામનસ્યા શ઼ૃણુતે દભીતયે ॥ ૧૦.૧૧૩.૦૯
ત્વં પુરૂણ્યા ભરા સ્વશ્વ્યા યેભિર્મંસૈ નિવચનાનિ શંસન્ ।
સુગેભિર્વિશ્વા દુરિતા તરેમ વિદો ષુ ણ ઉર્વિયા ગાધમદ્ય ॥ ૧૦.૧૧૩.૧૦

ઘર્મા સમન્તા ત્રિવૃતં વ્યાપતુસ્તયોર્જુષ્ટિં માતરિશ્વા જગામ ।
દિવસ્પયો દિધિષાણા અવેષન્વિદુર્દેવાઃ સહસામાનમર્કમ્ ॥ ૧૦.૧૧૪.૦૧
તિસ્રો દેષ્ટ્રાય નિરૃતીરુપાસતે દીર્ઘશ્રુતો વિ હિ જાનન્તિ વહ્નયઃ ।
તાસાં નિ ચિક્યુઃ કવયો નિદાનં પરેષુ યા ગુહ્યેષુ વ્રતેષુ ॥ ૧૦.૧૧૪.૦૨
ચતુષ્કપર્દા યુવતિઃ સુપેશા ઘૃતપ્રતીકા વયુનાનિ વસ્તે ।

તસ્યાં સુપર્ણા વૃષણા નિ ષેદતુર્યત્ર દેવા દધિરે ભાગધેયમ્ ॥ ૧૦.૧૧૪.૦૩
એકઃ સુપર્ણઃ સ સમુદ્રમા વિવેશ સ ઇદં વિશ્વં ભુવનં વિ ચષ્ટે ।
તં પાકેન મનસાપશ્યમન્તિતસ્તં માતા રેળ્હિ સ ઉ રેળ્હિ માતરમ્ ॥ ૧૦.૧૧૪.૦૪
સુપર્ણં વિપ્રાઃ કવયો વચોભિરેકં સન્તં બહુધા કલ્પયન્તિ ।
છન્દાંસિ ચ દધતો અધ્વરેષુ ગ્રહાન્સોમસ્ય મિમતે દ્વાદશ ॥ ૧૦.૧૧૪.૦૫
ષટ્ત્રિંશાઁશ્ચ ચતુરઃ કલ્પયન્તશ્છન્દાંસિ ચ દધત આદ્વાદશમ્ ।
યજ્ઞં વિમાય કવયો મનીષ ઋક્સામાભ્યાં પ્ર રથં વર્તયન્તિ ॥ ૧૦.૧૧૪.૦૬
ચતુર્દશાન્યે મહિમાનો અસ્ય તં ધીરા વાચા પ્ર ણયન્તિ સપ્ત ।
આપ્નાનં તીર્થં ક ઇહ પ્ર વોચદ્યેન પથા પ્રપિબન્તે સુતસ્ય ॥ ૧૦.૧૧૪.૦૭
સહસ્રધા પઞ્ચદશાન્યુક્થા યાવદ્દ્યાવાપૃથિવી તાવદિત્તત્ ।
સહસ્રધા મહિમાનઃ સહસ્રં યાવદ્બ્રહ્મ વિષ્ઠિતં તાવતી વાક્ ॥ ૧૦.૧૧૪.૦૮
કશ્છન્દસાં યોગમા વેદ ધીરઃ કો ધિષ્ણ્યાં પ્રતિ વાચં પપાદ ।
કમૃત્વિજામષ્ટમં શૂરમાહુર્હરી ઇન્દ્રસ્ય નિ ચિકાય કઃ સ્વિત્ ॥ ૧૦.૧૧૪.૦૯
ભૂમ્યા અન્તં પર્યેકે ચરન્તિ રથસ્ય ધૂર્ષુ યુક્તાસો અસ્થુઃ ।
શ્રમસ્ય દાયં વિ ભજન્ત્યેભ્યો યદા યમો ભવતિ હર્મ્યે હિતઃ ॥ ૧૦.૧૧૪.૧૦

ચિત્ર ઇચ્છિશોસ્તરુણસ્ય વક્ષથો ન યો માતરાવપ્યેતિ ધાતવે ।
અનૂધા યદિ જીજનદધા ચ નુ વવક્ષ સદ્યો મહિ દૂત્યં૧ ચરન્ ॥ ૧૦.૧૧૫.૦૧
અગ્નિર્હ નામ ધાયિ દન્નપસ્તમઃ સં યો વના યુવતે ભસ્મના દતા ।
અભિપ્રમુરા જુહ્વા સ્વધ્વર ઇનો ન પ્રોથમાનો યવસે વૃષા ॥ ૧૦.૧૧૫.૦૨
તં વો વિં ન દ્રુષદં દેવમન્ધસ ઇન્દું પ્રોથન્તં પ્રવપન્તમર્ણવમ્ ।
આસા વહ્નિં ન શોચિષા વિરપ્શિનં મહિવ્રતં ન સરજન્તમધ્વનઃ ॥ ૧૦.૧૧૫.૦૩
વિ યસ્ય તે જયસાનસ્યાજર ધક્ષોર્ન વાતાઃ પરિ સન્ત્યચ્યુતાઃ ।
આ રણ્વાસો યુયુધયો ન સત્વનં ત્રિતં નશન્ત પ્ર શિષન્ત ઇષ્ટયે ॥ ૧૦.૧૧૫.૦૪
સ ઇદગ્નિઃ કણ્વતમઃ કણ્વસખાર્યઃ પરસ્યાન્તરસ્ય તરુષઃ ।
અગ્નિઃ પાતુ ગૃણતો અગ્નિઃ સૂરીનગ્નિર્દદાતુ તેષામવો નઃ ॥ ૧૦.૧૧૫.૦૫
વાજિન્તમાય સહ્યસે સુપિત્ર્ય તૃષુ ચ્યવાનો અનુ જાતવેદસે ।
અનુદ્રે ચિદ્યો ધૃષતા વરં સતે મહિન્તમાય ધન્વનેદવિષ્યતે ॥ ૧૦.૧૧૫.૦૬

એવાગ્નિર્મર્તૈઃ સહ સૂરિભિર્વસુઃ ષ્ટવે સહસઃ સૂનરો નૃભિઃ ।
મિત્રાસો ન યે સુધિતા ઋતાયવો દ્યાવો ન દ્યુમ્નૈરભિ સન્તિ માનુષાન્ ॥ ૧૦.૧૧૫.૦૭
ઊર્જો નપાત્સહસાવન્નિતિ ત્વોપસ્તુતસ્ય વન્દતે વૃષા વાક્ ।
ત્વાં સ્તોષામ ત્વયા સુવીરા દ્રાઘીય આયુઃ પ્રતરં દધાનાઃ ॥ ૧૦.૧૧૫.૦૮
ઇતિ ત્વાગ્ને વૃષ્ટિહવ્યસ્ય પુત્રા ઉપસ્તુતાસ ઋષયોઽવોચન્ ।
તાઁશ્ચ પાહિ ગૃણતશ્ચ સૂરીન્વષડ્વષળિત્યૂર્ધ્વાસો અનક્ષન્નમો નમ ઇત્યૂર્ધ્વાસો અનક્ષન્ ॥ ૧૦.૧૧૫.૦૯

પિબા સોમં મહત ઇન્દ્રિયાય પિબા વૃત્રાય હન્તવે શવિષ્ઠ ।
પિબ રાયે શવસે હૂયમાનઃ પિબ મધ્વસ્તૃપદિન્દ્રા વૃષસ્વ ॥ ૧૦.૧૧૬.૦૧
અસ્ય પિબ ક્ષુમતઃ પ્રસ્થિતસ્યેન્દ્ર સોમસ્ય વરમા સુતસ્ય ।
સ્વસ્તિદા મનસા માદયસ્વાર્વાચીનો રેવતે સૌભગાય ॥ ૧૦.૧૧૬.૦૨
મમત્તુ ત્વા દિવ્યઃ સોમ ઇન્દ્ર મમત્તુ યઃ સૂયતે પાર્થિવેષુ ।
મમત્તુ યેન વરિવશ્ચકર્થ મમત્તુ યેન નિરિણાસિ શત્રૂન્ ॥ ૧૦.૧૧૬.૦૩
આ દ્વિબર્હા અમિનો યાત્વિન્દ્રો વૃષા હરિભ્યાં પરિષિક્તમન્ધઃ ।
ગવ્યા સુતસ્ય પ્રભૃતસ્ય મધ્વઃ સત્રા ખેદામરુશહા વૃષસ્વ ॥ ૧૦.૧૧૬.૦૪
નિ તિગ્માનિ ભ્રાશયન્ભ્રાશ્યાન્યવ સ્થિરા તનુહિ યાતુજૂનામ્ ।
ઉગ્રાય તે સહો બલં દદામિ પ્રતીત્યા શત્રૂન્વિગદેષુ વૃશ્ચ ॥ ૧૦.૧૧૬.૦૫
વ્યર્ય ઇન્દ્ર તનુહિ શ્રવાંસ્યોજઃ સ્થિરેવ ધન્વનોઽભિમાતીઃ ।
અસ્મદ્ર્યગ્વાવૃધાનઃ સહોભિરનિભૃષ્ટસ્તન્વં વાવૃધસ્વ ॥ ૧૦.૧૧૬.૦૬
ઇદં હવિર્મઘવન્તુભ્યં રાતં પ્રતિ સમ્રાળહ્રૃણાનો ગૃભાય ।
તુભ્યં સુતો મઘવન્તુભ્યં પક્વોઽદ્ધીન્દ્ર પિબ ચ પ્રસ્થિતસ્ય ॥ ૧૦.૧૧૬.૦૭
અદ્ધીદિન્દ્ર પ્રસ્થિતેમા હવીંષિ ચનો દધિષ્વ પચતોત સોમમ્ ।
પ્રયસ્વન્તઃ પ્રતિ હર્યામસિ ત્વા સત્યાઃ સન્તુ યજમાનસ્ય કામાઃ ॥ ૧૦.૧૧૬.૦૮
પ્રેન્દ્રાગ્નિભ્યાં સુવચસ્યામિયર્મિ સિન્ધાવિવ પ્રેરયં નાવમર્કૈઃ ।
અયા ઇવ પરિ ચરન્તિ દેવા યે અસ્મભ્યં ધનદા ઉદ્ભિદશ્ચ ॥ ૧૦.૧૧૬.૦૯

ન વા ઉ દેવાઃ ક્ષુધમિદ્વધં દદુરુતાશિતમુપ ગચ્છન્તિ મૃત્યવઃ ।
ઉતો રયિઃ પૃણતો નોપ દસ્યત્યુતાપૃણન્મર્ડિતારં ન વિન્દતે ॥ ૧૦.૧૧૭.૦૧
ય આધ્રાય ચકમાનાય પિત્વોઽન્નવાન્સન્રફિતાયોપજગ્મુષે ।

સ્થિરં મનઃ કૃણુતે સેવતે પુરોતો ચિત્સ મર્ડિતારં ન વિન્દતે ॥ ૧૦.૧૧૭.૦૨

સ ઇદ્ભોજો યો ગૃહવે દદાત્યન્નકામાય ચરતે કૃશાય ।

અરમસ્મૈ ભવતિ યામહૂતા ઉતાપરીષુ કૃણુતે સખાયમ્ ॥ ૧૦.૧૧૭.૦૩

ન સ સખા યો ન દદાતિ સખ્યે સચાભુવે સચમાનાય પિત્વઃ ।

અપાસ્માત્પ્રેયાન્ન તદોકો અસ્તિ પૃણન્તમન્યમરણં ચિદિચ્છેત્ ॥ ૧૦.૧૧૭.૦૪

પૃણીયાદિન્નાધમાનાય તવ્યાન્દ્રાઘીયાંસમનુ પશ્યેત પન્થામ્ ।

ઓ હિ વર્તન્તે રથ્યેવ ચક્રાન્યમન્યમુપ તિષ્ઠન્ત રાયઃ ॥ ૧૦.૧૧૭.૦૫

મોઘમન્નં વિન્દતે અપ્રચેતાઃ સત્યં બ્રવીમિ વધ ઇત્સ તસ્ય ।

નાર્યમણં પુષ્યતિ નો સખાયં કેવલાઘો ભવતિ કેવલાદી ॥ ૧૦.૧૧૭.૦૬

કૃષન્નિત્ફાલ આશિતં કૃણોતિ યન્નધ્વાનમપ વૃઙ્ક્તે ચરિત્રૈઃ ।

વદન્બ્રહ્માવદતો વનીયાન્પૃણન્નાપિરપૃણન્તમભિ ષ્યાત્ ॥ ૧૦.૧૧૭.૦૭

એકપાદ્ભૂયો દ્વિપદો વિ ચક્રમે દ્વિપાત્ત્રિપાદમભ્યેતિ પશ્ચાત્ ।

ચતુષ્પાદેતિ દ્વિપદામભિસ્વરે સમ્પશ્યન્પઙ્ક્તીરુપતિષ્ઠમાનઃ ॥ ૧૦.૧૧૭.૦૮

સમૌ ચિદ્ધસ્તૌ ન સમં વિવિષ્ટઃ સમ્માતરા ચિન્ન સમં દુહાતે ।

યમયોશ્ચિન્ન સમા વીર્યાણિ જ્ઞાતી ચિત્સન્તૌ ન સમં પૃણીતઃ ॥ ૧૦.૧૧૭.૦૯

અગ્ને હંસિ ન્ય૧ત્રિણં દીદ્યન્મર્ત્યેષ્વા ।

સ્વે ક્ષયે શુચિવ્રત ॥ ૧૦.૧૧૮.૦૧

ઉત્તિષ્ઠસિ સ્વાહુતો ઘૃતાનિ પ્રતિ મોદસે ।

યત્ત્વા સ્રુચઃ સમસ્થિરન્ ॥ ૧૦.૧૧૮.૦૨

સ આહુતો વિ રોચતેઽગ્નિરીળેન્યો ગિરા ।

સ્રુચા પ્રતીકમજ્યતે ॥ ૧૦.૧૧૮.૦૩

ઘૃતેનાગ્નિઃ સમજ્યતે મધુપ્રતીક આહુતઃ ।

રોચમાનો વિભાવસુઃ ॥ ૧૦.૧૧૮.૦૪

જરમાણઃ સમિધ્યસે દેવેભ્યો હવ્યવાહન ।

તં ત્વા હવન્ત મર્ત્યાઃ ॥ ૧૦.૧૧૮.૦૫

તં મર્તા અમર્ત્યં ઘૃતેનાગ્નિં સપર્યત ।

અદાભ્યં ગૃહપતિમ્ ॥ ૧૦.૧૧૮.૦૬

અદાભ્યેન શોચિષાગ્ને રક્ષસ્ત્વં દહ ।
ગોપા ઋતસ્ય દીદિહિ ॥ ૧૦.૧૧૮.૦૭
સ ત્વમગ્ને પ્રતીકેન પ્રત્યોષ યાતુધાન્યઃ ।
ઉરુક્ષયેષુ દીદ્યત્ ॥ ૧૦.૧૧૮.૦૮
તં ત્વા ગીર્ભિરુરુક્ષયા હવ્યવાહં સમીધિરે ।
યજિષ્ઠં માનુષે જને ॥ ૧૦.૧૧૮.૦૯
ઇતિ વા ઇતિ મે મનો ગામશ્વં સનુયામિતિ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૧
પ્ર વાતા ઇવ દોધત ઉન્મા પીતા અયંસત ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૨
ઉન્મા પીતા અયંસત રથમશ્વા ઇવાશવઃ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૩
ઉપ મા મતિરસ્થિત વાશ્રા પુત્રમિવ પ્રિયમ્ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૪
અહં તષ્ટેવ વન્ધુરં પર્યચામિ હૃદા મતિમ્ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૫
નહિ મે અક્ષિપચ્ચનાચ્છાન્ત્સુઃ પઞ્ચ કૃષ્ટયઃ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૬
નહિ મે રોદસી ઉભે અન્યં પક્ષં ચન પ્રતિ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૭
અભિ દ્યાં મહિના ભુવમભીઉમાં પૃથિવીં મહીમ્ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૮
હન્તાહં પૃથિવીમિમાં નિ દધાનીહ વેહ વા ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૦૯
ઓષમિત્પૃથિવીમહં જઙ્ઘનાનીહ વેહ વા ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૧૦
દિવિ મે અન્યઃ પક્ષોઽધો અન્યમચીકૃષમ્ ।

કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૧૧
અહમસ્મિ મહામહોઽભિનભ્યમુદીષિતઃ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૧૨
ગૃહો યામ્યરંકૃતો દેવેભ્યો હવ્યવાહનઃ ।
કુવિત્સોમસ્યાપામિતિ ॥ ૧૦.૧૧૯.૧૩

તદિદાસ ભુવનેષુ જ્યેષ્ઠં યતો જજ્ઞ ઉગ્રસ્ત્વેષનૃમ્ણઃ ।
સદ્યો જજ્ઞાનો નિ રિણાતિ શત્રૂનનુ યં વિશ્વે મદન્ત્યૂમાઃ ॥ ૧૦.૧૨૦.૦૧
વાવૃધાનઃ શવસા ભૂર્યોજાઃ શત્રુર્દાસાય ભિયસં દધાતિ ।
અવ્યનચ્ચ વ્યનચ્ચ સસ્નિ સં તે નવન્ત પ્રભૃતા મદેષુ ॥ ૧૦.૧૨૦.૦૨
ત્વે ક્રતુમપિ વૃઞ્જન્તિ વિશ્વે દ્વિર્યદેતે ત્રિર્ભવન્ત્યૂમાઃ ।
સ્વાદોઃ સ્વાદીયઃ સ્વાદુના સૃજા સમદઃ સુ મધુ મધુનાભિ યોધીઃ ॥ ૧૦.૧૨૦.૦૩
ઇતિ ચિદ્ધિ ત્વા ધના જયન્તં મદેમદે અનુમદન્તિ વિપ્રાઃ ।
ઓજીયો ધૃષ્ણો સ્થિરમા તનુષ્વ મા ત્વા દભન્યાતુધાના દુરેવાઃ ॥ ૧૦.૧૨૦.૦૪
ત્વયા વયં શાશદ્મહે રણેષુ પ્રપશ્યન્તો યુધેન્યાનિ ભૂરિ ।
ચોદયામિ ત આયુધા વચોભિઃ સં તે શિશામિ બ્રહ્મણા વયાંસિ ॥ ૧૦.૧૨૦.૦૫
સ્તુષેય્યં પુરુવર્પસમૃભ્વમિનતમમાપ્ત્યમાપ્ત્યાનામ્ ।
આ દર્ષતે શવસા સપ્ત દાનૂન્પ્ર સાક્ષતે પ્રતિમાનાનિ ભૂરિ ॥ ૧૦.૧૨૦.૦૬
નિ તદ્દધિષેઽવરં પરં ચ યસ્મિન્નાવિથાવસા દુરોણે ।
આ માતરા સ્થાપયસે જિગત્નૂ અત ઇનોષિ કર્વરા પુરૂણિ ॥ ૧૦.૧૨૦.૦૭
ઇમા બ્રહ્મ બૃહદ્દિવો વિવક્તીન્દ્રાય શૂષમગ્રિયઃ સ્વર્ષાઃ ।
મહો ગોત્રસ્ય ક્ષયતિ સ્વરાજો દુરશ્ચ વિશ્વા અવૃણોદપ સ્વાઃ ॥ ૧૦.૧૨૦.૦૮
એવા મહાન્બૃહદ્દિવો અથર્વાવોચત્સ્વાં તન્વ૧મિન્દ્રમેવ ।
સ્વસારો માતરિભ્વરીરરિપ્રા હિન્વન્તિ ચ શવસા વર્ધયન્તિ ચ ॥ ૧૦.૧૨૦.૦૯

હિરણ્યગર્ભઃ સમવર્તતાગ્રે ભૂતસ્ય જાતઃ પતિરેક આસીત્ ।
સ દાધાર પૃથિવીં દ્યામુતેમાં કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૧
ય આત્મદા બલદા યસ્ય વિશ્વ ઉપાસતે પ્રશિષં યસ્ય દેવાઃ ।
યસ્ય છાયામૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૨

યઃ પ્રાણતો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ ।
ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૩
યસ્યેમે હિમવન્તો મહિત્વા યસ્ય સમુદ્રં રસયા સહાહુઃ ।
યસ્યેમાઃ પ્રદિશો યસ્ય બાહૂ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૪
યેન દ્યૌરુગ્રા પૃથિવી ચ દૃળ્હા યેન સ્વઃ સ્તભિતં યેન નાકઃ ।
યો અન્તરિક્ષે રજસો વિમાનઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૫
યં ક્રન્દસી અવસા તસ્તભાને અભ્યૈક્ષેતાં મનસા રેજમાને ।
યત્રાધિ સૂર ઉદિતો વિભાતિ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૬
આપો હ યદ્બૃહતીર્વિશ્વમાયન્ગર્ભં દધાના જનયન્તીરગ્નિમ્ ।
તતો દેવાનાં સમવર્તતાસુરેકઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૭
યશ્ચિદાપો મહિના પર્યપશ્યદ્દક્ષં દધાના જનયન્તીર્યજ્ઞમ્ ।
યો દેવેષ્વધિ દેવ એક આસીત્કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૮
મા નો હિંસીજ્જનિતા યઃ પૃથિવ્યા યો વા દિવં સત્યધર્મા જજાન ।
યશ્ચાપશ્ચન્દ્રા બૃહતીર્જજાન કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૦.૧૨૧.૦૯
પ્રજાપતે ન ત્વદેતાન્યન્યો વિશ્વા જાતાનિ પરિ તા બભૂવ ।
યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ વયં સ્યામ પતયો રયીણામ્ ॥ ૧૦.૧૨૧.૧૦

વસું ન ચિત્રમહસં ગૃણીષે વામં શેવમતિથિમદ્વિષેણ્યમ્ ।
સ રાસતે શુરુધો વિશ્વધાયસોઽગ્નિર્હોતા ગૃહપતિઃ સુવીર્યમ્ ॥ ૧૦.૧૨૨.૦૧
જુષાણો અગ્ને પ્રતિ હર્ય મે વચો વિશ્વાનિ વિદ્વાન્વયુનાનિ સુક્રતો ।
ઘૃતનિર્ણિગ્બ્રહ્મણે ગાતુમેરય તવ દેવા અજનયન્નનુ વ્રતમ્ ॥ ૧૦.૧૨૨.૦૨
સપ્ત ધામાનિ પરિયન્નમર્ત્યો દાશદ્દાશુષે સુકૃતે મામહસ્વ ।
સુવીરેણ રયિણાગ્ને સ્વાભુવા યસ્ત આનટ્ સમિધા તં જુષસ્વ ॥ ૧૦.૧૨૨.૦૩
યજ્ઞસ્ય કેતું પ્રથમં પુરોહિતં હવિષ્મન્ત ઈળતે સપ્ત વાજિનમ્ ।
શ઼ૃણ્વન્તમગ્નિં ઘૃતપૃષ્ઠમુક્ષણં પૃણન્તં દેવં પૃણતે સુવીર્યમ્ ॥ ૧૦.૧૨૨.૦૪
ત્વં દૂતઃ પ્રથમો વરેણ્યઃ સ હૂયમાનો અમૃતાય મત્સ્વ ।
ત્વાં મર્જયન્મરુતો દાશુષો ગૃહે ત્વાં સ્તોમેભિર્ભૃગવો વિ રુરુચુઃ ॥ ૧૦.૧૨૨.૦૫
ઇષં દુહન્સુદુઘાં વિશ્વધાયસં યજ્ઞપ્રિયે યજમાનાય સુક્રતો ।

અગ્ને ઘૃતસ્નુસ્ત્રિરૃતાનિ દીદ્યદ્વર્તિર્યજ્ઞં પરિયન્સુક્રતૂયસે ॥ ૧૦.૧૨૨.૦૬
ત્વામિદસ્યા ઉષસો વ્યુષ્ટિષુ દૂતં કૃણ્વાના અયજન્ત માનુષાઃ ।
ત્વાં દેવા મહયાય્યાય વાવૃધુરાજ્યમગ્ને નિમૃજન્તો અધ્વરે ॥ ૧૦.૧૨૨.૦૭
નિ ત્વા વસિષ્ઠા અહ્વન્ત વાજિનં ગૃણન્તો અગ્ને વિદથેષુ વેધસઃ ।
રાયસ્પોષં યજમાનેષુ ધારય યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૧૦.૧૨૨.૦૮
અયં વેનશ્ચોદયત્પૃશ્નિગર્ભા જ્યોતિર્જરાયૂ રજસો વિમાને ।
ઇમમપાં સંગમે સૂર્યસ્ય શિશું ન વિપ્રા મતિભી રિહન્તિ ॥ ૧૦.૧૨૩.૦૧
સમુદ્રાદૂર્મિમુદિયર્તિ વેનો નભોજાઃ પૃષ્ઠં હર્યતસ્ય દર્શિ ।
ઋતસ્ય સાનાવધિ વિષ્ટપિ ભ્રાટ્ સમાનં યોનિમભ્યનૂષત વ્રાઃ ॥ ૧૦.૧૨૩.૦૨
સમાનં પૂર્વીરભિ વાવશાનાસ્તિષ્ઠન્વત્સસ્ય માતરઃ સનીળાઃ ।
ઋતસ્ય સાનાવધિ ચક્રમાણા રિહન્તિ મધ્વો અમૃતસ્ય વાણીઃ ॥ ૧૦.૧૨૩.૦૩
જાનન્તો રૂપમકૃપન્ત વિપ્રા મૃગસ્ય ઘોષં મહિષસ્ય હિ ગ્મન્ ।
ઋતેન યન્તો અધિ સિન્ધુમસ્થુર્વિદદ્ગન્ધર્વો અમૃતાનિ નામ ॥ ૧૦.૧૨૩.૦૪
અપ્સરા જારમુપસિષ્મિયાણા યોષા બિભર્તિ પરમે વ્યોમન્ ।
ચરત્પ્રિયસ્ય યોનિષુ પ્રિયઃ સન્સીદત્પક્ષે હિરણ્યયે સ વેનઃ ॥ ૧૦.૧૨૩.૦૫
નાકે સુપર્ણમુપ યત્પતન્તં હૃદા વેનન્તો અભ્યચક્ષત ત્વા ।
હિરણ્યપક્ષં વરુણસ્ય દૂતં યમસ્ય યોનૌ શકુનં ભુરણ્યુમ્ ॥ ૧૦.૧૨૩.૦૬
ઊર્ધ્વો ગન્ધર્વો અધિ નાકે અસ્થાત્પ્રત્યઙ્ચિત્રા બિભ્રદસ્યાયુધાનિ ।
વસાનો અત્કં સુરભિં દૃશે કં સ્વર્ણ નામ જનત પ્રિયાણિ ॥ ૧૦.૧૨૩.૦૭
દ્રપ્સઃ સમુદ્રમભિ યજ્જિગાતિ પશ્યન્ગૃધ્રસ્ય ચક્ષસા વિધર્મન્ ।
ભાનુઃ શુક્રેણ શોચિષા ચકાનસ્તૃતીયે ચક્રે રજસિ પ્રિયાણિ ॥ ૧૦.૧૨૩.૦૮
ઇમં નો અગ્ન ઉપ યજ્ઞમેહિ પઞ્ચયામં ત્રિવૃતં સપ્તતન્તુમ્ ।
અસો હવ્યવાળુત નઃ પુરોગા જ્યોગેવ દીર્ઘં તમ આશયિષ્ઠાઃ ॥ ૧૦.૧૨૪.૦૧
અદેવાદ્દેવઃ પ્રચતા ગુહા યન્પ્રપશ્યમાનો અમૃતત્વમેમિ ।
શિવં યત્સન્તમશિવો જહામિ સ્વાત્સખ્યાદરણીં નાભિમેમિ ॥ ૧૦.૧૨૪.૦૨
પશ્યન્નન્યસ્યા અતિથિં વયાયા ઋતસ્ય ધામ વિ મિમે પુરૂણિ ।
શંસામિ પિત્રે અસુરાય શેવમયજ્ઞિયાદ્યજ્ઞિયં ભાગમેમિ ॥ ૧૦.૧૨૪.૦૩

બહ્વીઃ સમા અકરમન્તરસ્મિન્નિન્દ્રં વૃણાનઃ પિતરં જહામિ ।
અગ્નિઃ સોમો વરુણસ્તે ચ્યવન્તે પર્યાવર્દ્રાષ્ટ્રં તદવામ્યાયન્ ॥ ૧૦.૧૨૪.૦૪
નિર્માયા ઉ ત્યે અસુરા અભૂવન્ત્વં ચ મા વરુણ કામયાસે ।
ઋતેન રાજન્નનૃતં વિવિઞ્ચન્મમ રાષ્ટ્રસ્યાધિપત્યમેહિ ॥ ૧૦.૧૨૪.૦૫
ઇદં સ્વરિદમિદાસ વામમયં પ્રકાશ ઉર્વ1ન્તરિક્ષમ્ ।
હનાવ વૃત્રં નિરેહિ સોમ હવિષ્ટ્વા સન્તં હવિષા યજામ ॥ ૧૦.૧૨૪.૦૬
કવિઃ કવિત્વા દિવિ રૂપમાસજદપ્રભૂતી વરુણો નિરપઃ સૃજત્ ।
ક્ષેમં કૃણ્વાના જનયો ન સિન્ધવસ્તા અસ્ય વર્ણં શુચયો ભરિભ્રતિ ॥ ૧૦.૧૨૪.૦૭
તા અસ્ય જ્યેષ્ઠમિન્દ્રિયં સચન્તે તા ઈમા ક્ષેતિ સ્વધયા મદન્તીઃ ।
તા ઈં વિશો ન રાજાનં વૃણાના બીભત્સુવો અપ વૃત્રાદતિષ્ઠન્ ॥ ૧૦.૧૨૪.૦૮
બીભત્સૂનાં સયુજં હંસમાહુરપાં દિવ્યાનાં સખ્યે ચરન્તમ્ ।
અનુષ્ટુભમનુ ચર્ચૂર્યમાણમિન્દ્રં નિ ચિક્યુઃ કવયો મનીષા ॥ ૧૦.૧૨૪.૦૯
અહં રુદ્રેભિર્વસુભિશ્ચરામ્યહમાદિત્યૈરુત વિશ્વદેવૈઃ ।
અહં મિત્રાવરુણોભા બિભર્મ્યહમિન્દ્રાગ્ની અહમશ્વિનોભા ॥ ૧૦.૧૨૫.૦૧
અહં સોમમાહનસં બિભર્મ્યહં ત્વષ્ટારમુત પૂષણં ભગમ્ ।
અહં દધામિ દ્રવિણં હવિષ્મતે સુપ્રાવ્યે3 યજમાનાય સુન્વતે ॥ ૧૦.૧૨૫.૦૨
અહં રાષ્ટ્રી સંગમની વસૂનાં ચિકિતુષી પ્રથમા યજ્ઞિયાનામ્ ।
તાં મા દેવા વ્યદધુઃ પુરુત્રા ભૂરિસ્થાત્રાં ભૂર્યાવેશયન્તીમ્ ॥ ૧૦.૧૨૫.૦૩
મયા સો અન્નમત્તિ યો વિપશ્યતિ યઃ પ્રાણિતિ ય ઈં શ ૃણોત્યુક્તમ્ ।
અમન્તવો માં ત ઉપ ક્ષિયન્તિ શ્રુધિ શ્રુત શ્રદ્ધિવં તે વદામિ ॥ ૧૦.૧૨૫.૦૪
અહમેવ સ્વયમિદં વદામિ જુષ્ટં દેવેભિરુત માનુષેભિઃ ।
યં કામયે તંતમુગ્રં કૃણોમિ તં બ્રહ્માણં તમૃષિં તં સુમેધામ્ ॥ ૧૦.૧૨૫.૦૫
અહં રુદ્રાય ધનુરા તનોમિ બ્રહ્મદ્વિષે શરવે હન્તવા ઉ ।
અહં જનાય સમદં કૃણોમ્યહં દ્યાવાપૃથિવી આ વિવેશ ॥ ૧૦.૧૨૫.૦૬
અહં સુવે પિતરમસ્ય મૂર્ધન્મમ યોનિરપ્સ્વ1ન્તઃ સમુદ્રે ।
તતો વિ તિષ્ઠે ભુવનાનુ વિશ્વોતામૂં દ્યાં વર્ષ્મણોપ સ્પૃશામિ ॥ ૧૦.૧૨૫.૦૭
અહમેવ વાત ઇવ પ્ર વામ્યારભમાણા ભુવનાનિ વિશ્વા ।

પરો દિવા પર એના પૃથિવ્યૈતાવતી મહિના સં બભૂવ ॥ ૧૦.૧૨૫.૦૮

ન તમંહો ન દુરિતં દેવાસો અષ્ટ મર્ત્યમ્ ।
સજોષસો યમર્યમા મિત્રો નયન્તિ વરુણો અતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૧
તદ્ધિ વયં વૃણીમહે વરુણ મિત્રાર્યમન્ ।
યેના નિરંહસો યૂયં પાથ નેથા ચ મર્ત્યમતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૨
તે નૂનં નોઽયમૂતયે વરુણો મિત્રો અર્યમા ।
નયિષ્ઠા ઉ નો નેષણિ પર્ષિષ્ઠા ઉ નઃ પર્ષણ્યતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૩
યૂયં વિશ્વં પરિ પાથ વરુણો મિત્રો અર્યમા ।
યુષ્માકં શર્મણિ પ્રિયે સ્યામ સુપ્રણીતયોઽતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૪
આદિત્યાસો અતિ સ્રિધો વરુણો મિત્રો અર્યમા ।
ઉગ્રં મરુદ્ભી રુદ્રં હુવેમેન્દ્રમગ્નિં સ્વસ્તયેઽતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૫
નેતાર ઊ ષુ ણસ્તિરો વરુણો મિત્રો અર્યમા ।
અતિ વિશ્વાનિ દુરિતા રાજાનશ્ચર્ષણીનામતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૬
શુનમસ્મભ્યમૂતયે વરુણો મિત્રો અર્યમા ।
શર્મ યચ્છન્તુ સપ્રથ આદિત્યાસો યદીમહે અતિ દ્વિષઃ ॥ ૧૦.૧૨૬.૦૭
યથા હ ત્યદ્વસવો ગૌર્યં ચિત્પદિ ષિતામમુઞ્ચતા યજત્રાઃ ।
એવો ષ્વ૧સ્મન્મુઞ્ચતા વ્યંહઃ પ્ર તાર્યગ્ને પ્રતરં ન આયુઃ ॥ ૧૦.૧૨૬.૦૮

રાત્રી વ્યખ્યદાયતી પુરુત્રા દેવ્ય૧ક્ષભિઃ ।
વિશ્વા અધિ શ્રિયોઽધિત ॥ ૧૦.૧૨૭.૦૧
ઓર્વપ્રા અમર્ત્યા નિવતો દેવ્યુ૧દ્વતઃ ।
જ્યોતિષા બાધતે તમઃ ॥ ૧૦.૧૨૭.૦૨
નિરુ સ્વસારમસ્કૃતોષસં દેવ્યાયતી ।
અપેદુ હાસતે તમઃ ॥ ૧૦.૧૨૭.૦૩
સા નો અદ્ય યસ્યા વયં નિ તે યામન્નવિક્ષ્મહિ ।
વૃક્ષે ન વસતિં વયઃ ॥ ૧૦.૧૨૭.૦૪
નિ ગ્રામાસો અવિક્ષત નિ પદ્વન્તો નિ પક્ષિણઃ ।
નિ શ્યેનાસશ્ચિદર્થિનઃ ॥ ૧૦.૧૨૭.૦૫

યાવયા વૃક્યં૧ વૃકં યવય સ્તેનમૂર્મ્યે ।
અથા નઃ સુતરા ભવ ॥ ૧૦.૧૨૭.૦૬
ઉપ મા પેપિશત્તમઃ કૃષ્ણં વ્યક્તમસ્થિત ।
ઉષ ઋણેવ યાતય ॥ ૧૦.૧૨૭.૦૭
ઉપ તે ગા ઇવાકરં વૃણીષ્વ દુહિતર્દિવઃ ।
રાત્રિ સ્તોમં ન જિગ્યુષે ॥ ૧૦.૧૨૭.૦૮
મમાગ્ને વર્ચો વિહવેષ્વસ્તુ વયં ત્વેન્ધાનાસ્તન્વં પુષેમ ।
મહ્યં નમન્તાં પ્રદિશશ્ચતસ્રસ્ત્વયાધ્યક્ષેણ પૃતના જયેમ ॥ ૧૦.૧૨૮.૦૧
મમ દેવા વિહવે સન્તુ સર્વ ઇન્દ્રવન્તો મરુતો વિષ્ણુરગ્નિઃ ।
મમાન્તરિક્ષમુરુલોકમસ્તુ મહ્યં વાતઃ પવતાં કામે અસ્મિન્ ॥ ૧૦.૧૨૮.૦૨
મયિ દેવા દ્રવિણમા યજન્તાં મય્યાશીરસ્તુ મયિ દેવહૂતિઃ ।
દૈવ્યા હોતારો વનુષન્ત પૂર્વેઽરિષ્ટાઃ સ્યામ તન્વા સુવીરાઃ ॥ ૧૦.૧૨૮.૦૩
મહ્યં યજન્તુ મમ યાનિ હવ્યાકૂતિઃ સત્યા મનસો મે અસ્તુ ।
એનો મા નિ ગાં કતમચ્ચનાહં વિશ્વે દેવાસો અધિ વોચતા નઃ ॥ ૧૦.૧૨૮.૦૪
દેવીઃ ષળુર્વીરુરુ નઃ કૃણોત વિશ્વે દેવાસ ઇહ વીરયધ્વમ્ ।
મા હાસ્મહિ પ્રજયા મા તનૂભિર્મા રધામ દ્વિષતે સોમ રાજન્ ॥ ૧૦.૧૨૮.૦૫
અગ્ને મન્યું પ્રતિનુદન્પરેષામદબ્ધો ગોપાઃ પરિ પાહિ નસ્ત્વમ્ ।
પ્રત્યઞ્ચો યન્તુ નિગુતઃ પુનસ્તેઽમૈષાં ચિત્તં પ્રબુધાં વિ નેશત્ ॥ ૧૦.૧૨૮.૦૬
ધાતા ધાતૄણાં ભુવનસ્ય યસ્પતિર્દેવં ત્રાતારમભિમાતિષાહમ્ ।
ઇમં યજ્ઞમશ્વિનોભા બૃહસ્પતિર્દેવાઃ પાન્તુ યજમાનં ન્યર્થાત્ ॥ ૧૦.૧૨૮.૦૭
ઉરુવ્યચા નો મહિષઃ શર્મ યંસદસ્મિન્હવે પુરુહૂતઃ પુરુક્ષુઃ ।
સ નઃ પ્રજાયૈ હર્યશ્વ મૃળયેન્દ્ર મા નો રીરિષો મા પરા દાઃ ॥ ૧૦.૧૨૮.૦૮
યે નઃ સપત્ના અપ તે ભવન્ત્વિન્દ્રાગ્નિભ્યામવ બાધામહે તાન્ ।
વસવો રુદ્રા આદિત્યા ઉપરિસ્પૃશં મોગ્રં ચેત્તારમધિરાજમક્રન્ ॥ ૧૦.૧૨૮.૦૯
નાસદાસીન્નો સદાસીત્તદાનીં નાસીદ્રજો નો વ્યોમા પરો યત્ ।
કિમાવરીવઃ કુહ કસ્ય શર્મન્નમ્ભઃ કિમાસીદ્ગહનં ગભીરમ્ ॥ ૧૦.૧૨૯.૦૧
ન મૃત્યુરાસીદમૃતં ન તર્હિ ન રાત્ર્યા અહ્ન આસીત્પ્રકેતઃ ।

આનીદવાતં સ્વધયા તદેકં તસ્માદ્ધાન્યન્ન પરઃ કિં ચનાસ ॥ ૧૦.૧૨૯.૦૨
તમ આસીત્તમસા ગૂળ્હમગ્રેઽપ્રકેતં સલિલં સર્વમા ઇદમ્ ।
તુચ્છ્યેનાભ્વપિહિતં યદાસીત્તપસસ્તન્મહિનાજાયતૈકમ્ ॥ ૧૦.૧૨૯.૦૩
કામસ્તદગ્રે સમવર્તતાધિ મનસો રેતઃ પ્રથમં યદાસીત્ ।
સતો બન્ધુમસતિ નિરવિન્દન્હૃદિ પ્રતીષ્યા કવયો મનીષા ॥ ૧૦.૧૨૯.૦૪
તિરશ્ચીનો વિતતો રશ્મિરેષામધઃ સ્વિદાસીઉદુપરિ સ્વિદાસીઉત્ ।
રેતોધા આસન્મહિમાન આસન્સ્વધા અવસ્તાત્પ્રયતિઃ પરસ્તાત્ ॥ ૧૦.૧૨૯.૦૫
કો અદ્ધા વેદ ક ઇહ પ્ર વોચત્કુત આજાતા કુત ઇયં વિસૃષ્ટિઃ ।
અર્વાગ્દેવા અસ્ય વિસર્જનેનાથા કો વેદ યત આબભૂવ ॥ ૧૦.૧૨૯.૦૬
ઇયં વિસૃષ્ટિર્યત આબભૂવ યદિ વા દધે યદિ વા ન ।
યો અસ્યાધ્યક્ષઃ પરમે વ્યોમન્સો અઙ્ગ વેદ યદિ વા ન વેદ ॥ ૧૦.૧૨૯.૦૭

યો યજ્ઞો વિશ્વતસ્તન્તુભિસ્તત એકશતં દેવકર્મેભિરાયતઃ ।
ઇમે વયન્તિ પિતરો ય આયયુઃ પ્ર વયાપ વયેત્યાસતે તતે ॥ ૧૦.૧૩૦.૦૧
પુમાઁ એનં તનુત ઉત્કૃણત્તિ પુમાન્વિ તત્ને અધિ નાકે અસ્મિન્ ।
ઇમે મયૂખા ઉપ સેદુરૂ સદઃ સામાનિ ચક્રુસ્તસરાણ્યોતવે ॥ ૧૦.૧૩૦.૦૨
કાસીત્પ્રમા પ્રતિમા કિં નિદાનમાજ્યં કિમાસીત્પરિધિઃ ક આસીત્ ।
છન્દઃ કિમાસીત્પ્રઉગં કિમુક્થં યદ્દેવા દેવમયજન્ત વિશ્વે ॥ ૧૦.૧૩૦.૦૩
અગ્નેર્ગાયત્ર્યભવત્સયુગ્વોષ્ણિહયા સવિતા સં બભૂવ ।
અનુષ્ટુભા સોમ ઉક્થૈર્મહસ્વાન્બૃહસ્પતેર્બૃહતી વાચમાવત્ ॥ ૧૦.૧૩૦.૦૪
વિરાણ્મિત્રાવરુણયોરભિશ્રીરિન્દ્રસ્ય ત્રિષ્ટુબિહ ભાગો અહ્નઃ ।
વિશ્વાન્દેવાઞ્જગત્યા વિવેશ તેન ચાક્લૃપ્ર ઋષયો મનુષ્યાઃ ॥ ૧૦.૧૩૦.૦૫
ચાક્લૃપ્રે તેન ઋષયો મનુષ્યા યજ્ઞે જાતે પિતરો નઃ પુરાણે ।
પશ્યન્મન્યે મનસા ચક્ષસા તાન્ય ઇમં યજ્ઞમયજન્ત પૂર્વે ॥ ૧૦.૧૩૦.૦૬
સહસ્તોમાઃ સહછન્દસ આવૃતઃ સહપ્રમા ઋષયઃ સપ્ત દૈવ્યાઃ ।
પૂર્વેષાં પન્થામનુદૃશ્ય ધીરા અન્વાલેભિરે રથ્યોઉ ન રશ્મીન્ ॥ ૧૦.૧૩૦.૦૭

અપ પ્રાચ ઇન્દ્ર વિશ્વાઁ અમિત્રાનપાપાચો અભિભૂતે નુદસ્વ ।
અપોદીચો અપ શૂરાધરાચ ઉરૌ યથા તવ શર્મન્મદેમ ॥ ૧૦.૧૩૧.૦૧

કુવિદઙ્ગ યવમન્તો યવં ચિદ્યથા દાન્ત્યનુપૂર્વં વિયૂય ।
ઇહેહૈષાં કૃણુહિ ભોજનાનિ યે બર્હિષો નમોવૃક્તિં ન જગ્મુઃ ॥ ૧૦.૧૩૧.૦૨
નહિ સ્થૂર્યૃતુથા યાતમસ્તિ નોત શ્રવો વિવિદે સંગમેષુ ।
ગવ્યન્ત ઇન્દ્રં સખ્યાય વિપ્રા અશ્વાયન્તો વૃષણં વાજયન્તઃ ॥ ૧૦.૧૩૧.૦૩
યુવં સુરામમશ્વિના નમુચાવાસુરે સચા ।
વિપિપાના શુભસ્પતી ઇન્દ્રં કર્મસ્વાવતમ્ ॥ ૧૦.૧૩૧.૦૪
પુત્રમિવ પિતરાવશ્વિનોભેન્દ્રાવથુઃ કાવ્યૈર્દંસનાભિઃ ।
યત્સુરામં વ્યપિબઃ શચીભિઃ સરસ્વતી ત્વા મઘવન્નભિષ્ણક્ ॥ ૧૦.૧૩૧.૦૫
ઇન્દ્રઃ સુત્રામા સ્વવાઁ અવોભિઃ સુમૃળીકો ભવતુ વિશ્વવેદાઃ ।
બાધતાં દ્વેષો અભયં કૃણોતુ સુવીર્યસ્ય પતયઃ સ્યામ ॥ ૧૦.૧૩૧.૦૬
તસ્ય વયં સુમતૌ યજ્ઞિયસ્યાપિ ભદ્રે સૌમનસે સ્યામ ।
સ સુત્રામા સ્વવાઁ ઇન્દ્રો અસ્મે આરાચ્ચિદ્દ્વેષઃ સનુતર્યુયોતુ ॥ ૧૦.૧૩૧.૦૭
ઈજાનમિદ્દ્યૌર્ગૂર્તાવસુરીજાનં ભૂમિરભિ પ્રભૂષણિ ।
ઈજાનં દેવાવશ્વિનાવભિ સુમ્નૈરવર્ધતામ્ ॥ ૧૦.૧૩૨.૦૧
તા વાં મિત્રાવરુણા ધારયત્ક્ષિતી સુષુમ્નેષિતત્વતા યજામસિ ।
યુવોઃ ક્રાણાય સખ્યૈરભિ ષ્યામ રક્ષસઃ ॥ ૧૦.૧૩૨.૦૨
અધા ચિન્નુ યદ્દિધિષામહે વામભિ પ્રિયં રેક્ણઃ પત્યમાનાઃ ।
દદ્વાઁ વા યત્પુષ્યતિ રેક્ણઃ સમ્વારન્નકિરસ્ય મઘાનિ ॥ ૧૦.૧૩૨.૦૩
અસાવન્યો અસુર સૂયત દ્યૌસ્ત્વં વિશ્વેષાં વરુણાસિ રાજા ।
મૂર્ધા રથસ્ય ચાકન્નૈતાવતૈનસાન્તકધ્રુક્ ॥ ૧૦.૧૩૨.૦૪
અસ્મિન્સ્વે૩તચ્છકપૂત એનો હિતે મિત્રે નિગતાન્હન્તિ વીરાન્ ।
અવોર્વા યદ્ધાત્તનૂષ્વવઃ પ્રિયાસુ યજ્ઞિયાસ્વર્વા ॥ ૧૦.૧૩૨.૦૫
યુવોર્હિ માતાદિતિર્વિચેતસા દ્યૌર્ન ભૂમિઃ પયસા પુપૂતનિ ।
અવ પ્રિયા દિદિષ્ટન સૂરો નિનિક્ત રશ્મિભિઃ ॥ ૧૦.૧૩૨.૦૬
યુવં હ્યપ્નરાજાવસીદતં તિષ્ઠદ્રથં ન ધૂર્ષદં વનર્ષદમ્ ।
તા નઃ કણૂકયન્તીર્નૃમેધસ્તત્રે અંહસઃ સુમેધસ્તત્રે અંહસઃ ॥ ૧૦.૧૩૨.૦૭
પ્રો ષ્વસ્મૈ પુરોરથમિન્દ્રાય શૂષમર્ચત ।

અભીકે ચિદુ લોકકૃત્સંગે સમત્સુ વૃત્રહાસ્માકં બોધિ ચોદિતા નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥
૧૦.૧૩૩.૦૧
ત્વં સિન્ધૂઁરવાસૃજોઽધરાચો અહન્નહિમ્ ।
અશત્રુરિન્દ્ર જજ્ઞિષે વિશ્વં પુષ્યસિ વાર્યં તં ત્વા પરિ ષ્વજામહે નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥
૧૦.૧૩૩.૦૨
વિ ષુ વિશ્વા અરાતયોઽર્યો નશન્ત નો ધિયઃ ।
અસ્તાસિ શત્રવે વધં યો ન ઇન્દ્ર જિઘાંસતિ યા તે રાતિર્દદિર્વસુ નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥
૧૦.૧૩૩.૦૩
યો ન ઇન્દ્રાભિતો જનો વૃકાયુરાદિદેશતિ ।
અધસ્પદં તમીં કૃધિ વિબાધો અસિ સાસહિર્નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૦.૧૩૩.૦૪
યો ન ઇન્દ્રાભિદાસતિ સનાભિર્યશ્ચ નિષ્ટ્યઃ ।
અવ તસ્ય બલં તિર મહીવ દ્યૌરધ ત્મના નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૦.૧૩૩.૦૫
વયમિન્દ્ર ત્વાયવઃ સખિત્વમા રભામહે ।
ઋતસ્ય નઃ પથા નયાતિ વિશ્વાનિ દુરિતા નભન્તામન્યકેષાં જ્યાકા અધિ ધન્વસુ ॥ ૧૦.૧૩૩.૦૬
અસ્મભ્યં સુ ત્વમિન્દ્ર તાં શિક્ષ યા દોહતે પ્રતિ વરં જરિત્રે ।
અચ્છિદ્રોધ્ની પીપયદ્યથા નઃ સહસ્રધારા પયસા મહી ગૌઃ ॥ ૧૦.૧૩૩.૦૭

ઉભે યદિન્દ્ર રોદસી આપપ્રાથોષા ઇવ ।
મહાન્તં ત્વા મહીનાં સમ્રાજં ચર્ષણીનાં દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૧
અવ સ્મ દુર્હણાયતો મર્તસ્ય તનુહિ સ્થિરમ્ ।
અધસ્પદં તમીં કૃધિ યો અસ્માઁ આદિદેશતિ દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૨
અવ ત્યા બૃહતીરિષો વિશ્વશ્ચન્દ્રા અમિત્રહન્ ।
શચીભિઃ શક્ર ધૂનુહીન્દ્ર વિશ્વાભિરૂતિભિર્દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૩
અવ યત્ત્વં શતક્રતવિન્દ્ર વિશ્વાનિ ધૂનુષે ।
રયિં ન સુન્વતે સચા સહસ્રિણીભિરૂતિભિર્દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૪
અવ સ્વેદા ઇવાભિતો વિષ્વક્પતન્તુ દિદ્યવઃ ।
દૂર્વાયા ઇવ તન્તવો વ્યસ્મદેતુ દુર્મતિર્દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૫
દીર્ઘં હ્યઙ્કુશં યથા શક્તિં બિભર્ષિ મન્તુમઃ ।
પૂર્વેણ મઘવન્પદાજો વયાં યથા યમો દેવી જનિત્ર્યજીજનદ્ભદ્રા જનિત્ર્યજીજનત્ ॥ ૧૦.૧૩૪.૦૬

નકિર્દેવા મિનીમસિ નકિરા યોપયામસિ મન્ત્રશ્રુત્યં ચરામસિ ।
પક્ષેભિરપિકક્ષેભિરત્રાભિ સં રભામહે ॥ ૧૦.૧૩૪.૦૭

યસ્મિન્વૃક્ષે સુપલાશે દેવૈઃ સમ્પિબતે યમઃ ।
અત્રા નો વિશ્પતિઃ પિતા પુરાણાઁ અનુ વેનતિ ॥ ૧૦.૧૩૫.૦૧
પુરાણાઁ અનુવેનન્તં ચરન્તં પાપયામુયા ।
અસૂયન્નભ્યચાકશં તસ્મા અસ્પૃહયં પુનઃ ॥ ૧૦.૧૩૫.૦૨
યં કુમાર નવં રથમચક્રં મનસાકૃણોઃ ।
એકેષં વિશ્વતઃ પ્રાઞ્ચમપશ્યન્નધિ તિષ્ઠસિ ॥ ૧૦.૧૩૫.૦૩
યં કુમાર પ્રાવર્તયો રથં વિપ્રેભ્યસ્પરિ ।
તં સામાનુ પ્રાવર્તત સમિતો નાવ્યાહિતમ્ ॥ ૧૦.૧૩૫.૦૪
કઃ કુમારમજનયદ્રથં કો નિરવર્તયત્ ।
કઃ સ્વિત્તદદ્ય નો બ્રૂયાદનુદેયી યથાભવત્ ॥ ૧૦.૧૩૫.૦૫
યથાભવદનુદેયી તતો અગ્રમજાયત ।
પુરસ્તાદ્બુધ્ન આતતઃ પશ્ચાન્નિરયણં કૃતમ્ ॥ ૧૦.૧૩૫.૦૬
ઇદં યમસ્ય સાદનં દેવમાનં યદુચ્યતે ।
ઇયમસ્ય ધમ્યતે નાળીરયં ગીર્ભિઃ પરિષ્કૃતઃ ॥ ૧૦.૧૩૫.૦૭

કેશ્ય૧ગ્નિં કેશી વિષં કેશી બિભર્તિ રોદસી ।
કેશી વિશ્વં સ્વર્દૃશે કેશીદં જ્યોતિરુચ્યતે ॥ ૧૦.૧૩૬.૦૧
મુનયો વાતરશનાઃ પિશઙ્ગા વસતે મલા ।
વાતસ્યાનુ ધ્રાજિં યન્તિ યદ્દેવાસો અવિક્ષત ॥ ૧૦.૧૩૬.૦૨
ઉન્મદિતા મૌનેયેન વાતાઁ આ તસ્થિમા વયમ્ ।
શરીરેદસ્માકં યૂયં મર્તાસો અભિ પશ્યથ ॥ ૧૦.૧૩૬.૦૩
અન્તરિક્ષેણ પતતિ વિશ્વા રૂપાવચાકશત્ ।
મુનિર્દેવસ્યદેવસ્ય સૌકૃત્યાય સખા હિતઃ ॥ ૧૦.૧૩૬.૦૪
વાતસ્યાશ્વો વાયોઃ સખાથો દેવેષિતો મુનિઃ ।
ઉભૌ સમુદ્રાવા ક્ષેતિ યશ્ચ પૂર્વ ઉતાપરઃ ॥ ૧૦.૧૩૬.૦૫
અપ્સરસાં ગન્ધર્વાણાં મૃગાણાં ચરણે ચરન્ ।

કેશી કેતસ્ય વિદ્વાન્સખા સ્વાદુર્મદિન્તમઃ ॥ ૧૦.૧૩૬.૦૬
વાયુરસ્મા ઉપામન્થત્પિનષ્ટિ સ્મા કુનન્નમા ।
કેશી વિષસ્ય પાત્રેણ યદ્રુદ્રેણાપિબત્સહ ॥ ૧૦.૧૩૬.૦૭
ઉત દેવા અવહિતં દેવા ઉન્નયથા પુનઃ ।
ઉતાગશ્ચક્રુષં દેવા દેવા જીવયથા પુનઃ ॥ ૧૦.૧૩૭.૦૧
દ્વાવિમૌ વાતૌ વાત આ સિન્ધોરા પરાવતઃ ।
દક્ષં તે અન્ય આ વાતુ પરાન્યો વાતુ યદ્રપઃ ॥ ૧૦.૧૩૭.૦૨
આ વાત વાહિ ભેષજં વિ વાત વાહિ યદ્રપઃ ।
ત્વં હિ વિશ્વભેષજો દેવાનાં દૂત ઈયસે ॥ ૧૦.૧૩૭.૦૩
આ ત્વાગમં શંતાતિભિરથો અરિષ્ટતાતિભિઃ ।
દક્ષં તે ભદ્રમાભાર્ષં પરા યક્ષ્મં સુવામિ તે ॥ ૧૦.૧૩૭.૦૪
ત્રાયન્તામિહ દેવાસ્ત્રાયતાં મરુતાં ગણઃ ।
ત્રાયન્તાં વિશ્વા ભૂતાનિ યથાયમરપા અસત્ ॥ ૧૦.૧૩૭.૦૫
આપ ઇદ્વા ઉ ભેષજીરાપો અમીવચાતનીઃ ।
આપઃ સર્વસ્ય ભેષજીસ્તાસ્તે કૃણ્વન્તુ ભેષજમ્ ॥ ૧૦.૧૩૭.૦૬
હસ્તાભ્યાં દશશાખાભ્યાં જિહ્વા વાચઃ પુરોગવી ।
અનામયિત્નુભ્યાં ત્વા તાભ્યાં ત્વોપ સ્પૃશામસિ ॥ ૧૦.૧૩૭.૦૭
તવ ત્ય ઇન્દ્ર સખ્યેષુ વહ્નય ઋતં મન્વાના વ્યદર્દિરુર્વલમ્ ।
યત્રા દશસ્યન્નુષસો રિણન્નપઃ કુત્સાય મન્મન્નહ્યશ્ચ દંસયઃ ॥ ૧૦.૧૩૮.૦૧
અવાસૃજઃ પ્રસ્વઃ શ્વઞ્ચયો ગિરીનુદાજ ઉસ્રા અપિબો મધુ પ્રિયમ્ ।
અવર્ધયો વનિનો અસ્ય દંસસા શુશોચ સૂર્ય ઋતજાતયા ગિરા ॥ ૧૦.૧૩૮.૦૨
વિ સૂર્યો મધ્યે અમુચદ્રથં દિવો વિદદ્દાસાય પ્રતિમાનમાર્યઃ ।
દૃળ્હાનિ પિપ્રોરસુરસ્ય માયિન ઇન્દ્રો વ્યાસ્યચ્ચકૃવાઁ ઋજિશ્વના ॥ ૧૦.૧૩૮.૦૩
અનાધૃષ્ટાનિ ધૃષિતો વ્યાસ્યન્નિધીઁરદેવાઁ અમૃણદયાસ્યઃ ।
માસેવ સૂર્યો વસુ પુર્યમા દદે ગૃણાનઃ શત્રૂઁરશૃણાદ્વિરુક્મતા ॥ ૧૦.૧૩૮.૦૪
અયુદ્ધસેનો વિભ્વા વિભિન્દતા દાશદ્વૃત્રહા તુજ્યાનિ તેજતે ।
ઇન્દ્રસ્ય વજ્રાદબિભેદભિશ્નથઃ પ્રાક્રામચ્છુન્ધ્યૂરજહાદુષા અનઃ ॥ ૧૦.૧૩૮.૦૫

એતા ત્યા તે શ્રુત્યાનિ કેવલા યદેક એકમકૃણોરયજ્ઞમ્ ।
માસાં વિધાનમદધા અધિ દ્યવિ ત્વયા વિભિન્નં ભરતિ પ્રધિં પિતા ॥ ૧૦.૧૩૮.૦૬

સૂર્યરશ્મિર્હરિકેશઃ પુરસ્તાત્સવિતા જ્યોતિરુદયાँ અજસ્રમ્ ।
તસ્ય પૂષા પ્રસવે યાતિ વિદ્વાન્સમ્પશ્યન્વિશ્વા ભુવનાનિ ગોપાઃ ॥ ૧૦.૧૩૯.૦૧
નૃચક્ષા એષ દિવો મધ્ય આસ્ત આપપ્રિવાન્રોદસી અન્તરિક્ષમ્ ।
સ વિશ્વાચીરભિ ચષ્ટે ઘૃતાચીરન્તરા પૂર્વમપરં ચ કેતુમ્ ॥ ૧૦.૧૩૯.૦૨
રાયો બુધ્નઃ સંગમનો વસૂનાં વિશ્વા રૂપાભિ ચષ્ટે શચીભિઃ ।
દેવ ઇવ સવિતા સત્યધર્મેન્દ્રો ન તસ્થૌ સમરે ધનાનામ્ ॥ ૧૦.૧૩૯.૦૩
વિશ્વાવસું સોમ ગન્ધર્વમાપો દદૃશુષીસ્તદૃતેના વ્યાયન્ ।
તદન્વવૈદિન્દ્રો રારહાણ આસાં પરિ સૂર્યસ્ય પરિધીँરપશ્યત્ ॥ ૧૦.૧૩૯.૦૪
વિશ્વાવસુરભિ તન્નો ગૃણાતુ દિવ્યો ગન્ધર્વો રજસો વિમાનઃ ।
યદ્વા ઘા સત્યમુત યન્ન વિદ્મ ધિયો હિન્વાનો ધિય ઇન્નો અવ્યાઃ ॥ ૧૦.૧૩૯.૦૫
સસ્નિમવિન્દચ્ચરણે નદીનામપાવૃણોદ્દુરો અશ્મવ્રજાનામ્ ।
પ્રાસાં ગન્ધર્વો અમૃતાનિ વોચદિન્દ્રો દક્ષં પરિ જાનાદહીનામ્ ॥ ૧૦.૧૩૯.૦૬

અગ્ને તવ શ્રવો વયો મહિ ભ્રાજન્તે અર્ચયો વિભાવસો ।
બૃહદ્ભાનો શવસા વાજમુક્થ્યં૧ દધાસિ દાશુષે કવે ॥ ૧૦.૧૪૦.૦૧
પાવકવર્ચાઃ શુક્રવર્ચા અનૂનવર્ચા ઉદિયર્ષિ ભાનુના ।
પુત્રો માતરા વિચરન્નુપાવસિ પૃણક્ષિ રોદસી ઉભે ॥ ૧૦.૧૪૦.૦૨
ઊર્જો નપાજ્જાતવેદઃ સુશસ્તિભિર્મન્દસ્વ ધીતિભિર્હિતઃ ।
ત્વે ઇષઃ સં દધુર્ભૂરિવર્પસશ્ચિત્રોતયો વામજાતાઃ ॥ ૧૦.૧૪૦.૦૩
ઇરજ્યન્નગ્ને પ્રથયસ્વ જન્તુભિરસ્મે રાયો અમર્ત્ય ।
સ દર્શતસ્ય વપુષો વિ રાજસિ પૃણક્ષિ સાનસિં ક્રતુમ્ ॥ ૧૦.૧૪૦.૦૪
ઇષ્કર્તારમધ્વરસ્ય પ્રચેતસં ક્ષયન્તં રાધસો મહઃ ।
રાતિં વામસ્ય સુભગાં મહીમિષં દધાસિ સાનસિં રયિમ્ ॥ ૧૦.૧૪૦.૦૫
ઋતાવાનં મહિષં વિશ્વદર્શતમગ્નિં સુમ્નાય દધિરે પુરો જનાઃ ।
શ્રુત્કર્ણં સપ્રથસ્તમં ત્વા ગિરા દૈવ્યં માનુષા યુગા ॥ ૧૦.૧૪૦.૦૬

અગ્ને અચ્છા વદેહ નઃ પ્રત્યઙ્નઃ સુમના ભવ ।

પ્ર નો યચ્છ વિશસ્પતે ધનદા અસિ નસ્ત્વમ્ ॥ ૧૦.૧૪૧.૦૧
પ્ર નો યચ્છત્વર્યમા પ્ર ભગઃ પ્ર બૃહસ્પતિઃ ।
પ્ર દેવાઃ પ્રોત સૂનૃતા રાયો દેવી દદાતુ નઃ ॥ ૧૦.૧૪૧.૦૨
સોમં રાજાનમવસેઽગ્નિં ગીર્ભિર્હવામહે ।
આદિત્યાન્વિષ્ણું સૂર્યં બ્રહ્માણં ચ બૃહસ્પતિમ્ ॥ ૧૦.૧૪૧.૦૩
ઇન્દ્રવાયૂ બૃહસ્પતિં સુહવેહ હવામહે ।
યથા નઃ સર્વ ઇજ્જનઃ સંગત્યાં સુમના અસત્ ॥ ૧૦.૧૪૧.૦૪
અર્યમણં બૃહસ્પતિમિન્દ્રં દાનાય ચોદય ।
વાતં વિષ્ણું સરસ્વતીં સવિતારં ચ વાજિનમ્ ॥ ૧૦.૧૪૧.૦૫
ત્વં નો અગ્ને અગ્નિભિર્બ્રહ્મ યજ્ઞં ચ વર્ધય ।
ત્વં નો દેવતાતયે રાયો દાનાય ચોદય ॥ ૧૦.૧૪૧.૦૬

અયમગ્ને જરિતા ત્વે અભૂદપિ સહસઃ સૂનો નહ્યન્યદસ્ત્યાપ્યમ્ ।
ભદ્રં હિ શર્મ ત્રિવરૂથમસ્તિ ત આરે હિંસાનામપ દિદ્યુમા કૃધિ ॥ ૧૦.૧૪૨.૦૧
પ્રવત્તે અગ્ને જનિમા પિતૂયતઃ સાચીવ વિશ્વા ભુવના ન્યૃઞ્જસે ।
પ્ર સપ્તયઃ પ્ર સનિષન્ત નો ધિયઃ પુરશ્ચરન્તિ પશુપા ઇવ ત્મના ॥ ૧૦.૧૪૨.૦૨
ઉત વા ઉ પરિ વૃણક્ષિ બપ્સદ્બહોરગ્ન ઉલપસ્ય સ્વધાવઃ ।
ઉત ખિલ્યા ઉર્વરાણાં ભવન્તિ મા તે હેતિં તવિષીં ચુક્રુધામ ॥ ૧૦.૧૪૨.૦૩
યદુદ્વતો નિવતો યાસિ બપ્સત્પૃથગેષિ પ્રગર્ધિનીવ સેના ।
યદા તે વાતો અનુવાતિ શોચિર્વપ્તેવ શ્મશ્રુ વપસિ પ્ર ભૂમ ॥ ૧૦.૧૪૨.૦૪
પ્રત્યસ્ય શ્રેણયો દદૃશ્ર એકં નિયાનં બહવો રથાસઃ ।
બાહૂ યદગ્ને અનુમર્મૃજાનો ન્યઙ્ઙુત્તાનામન્વેષિ ભૂમિમ્ ॥ ૧૦.૧૪૨.૦૫
ઉત્તે શુષ્મા જિહતામુત્તે અર્ચિરુત્તે અગ્ને શશમાનસ્ય વાજાઃ ।
ઉચ્છ્વઞ્ચસ્વ નિ નમ વર્ધમાન આ ત્વાદ્ય વિશ્વે વસવઃ સદન્તુ ॥ ૧૦.૧૪૨.૦૬
અપામિદં ન્યયનં સમુદ્રસ્ય નિવેશનમ્ ।
અન્યં કૃણુષ્વેતઃ પન્થાં તેન યાહિ વશાઁ અનુ ॥ ૧૦.૧૪૨.૦૭
આયને તે પરાયણે દૂર્વા રોહન્તુ પુષ્પિણીઃ ।
હ્રદાશ્ચ પુણ્ડરીકાણિ સમુદ્રસ્ય ગૃહા ઇમે ॥ ૧૦.૧૪૨.૦૮

ત્યં ચિદત્રિમૃતજુરમર્થમશ્વં ન યાતવે ।
કક્ષીવન્તં યદી પુના રથં ન કૃણુથો નવમ્ ॥ ૧૦.૧૪૩.૦૧
ત્યં ચિદશ્વં ન વાજિનમરેણવો યમત્નત ।
દૃળ્હં ગ્રન્થિં ન વિ ષ્યતમત્રિં યવિષ્ઠમા રજઃ ॥ ૧૦.૧૪૩.૦૨
નરા દંસિષ્ઠાવત્રયે શુભ્રા સિષાસતં ધિયઃ ।
અથા હિ વાં દિવો નરા પુનઃ સ્તોમો ન વિશસે ॥ ૧૦.૧૪૩.૦૩
ચિતે તદ્વાં સુરાધસા રાતિઃ સુમતિરશ્વિના ।
આ યન્નઃ સદને પૃથૌ સમને પર્ષથો નરા ॥ ૧૦.૧૪૩.૦૪
યુવં ભુજ્યું સમુદ્ર આ રજસઃ પાર ઈઙ્ખિતમ્ ।
યાતમચ્છા પતત્રિભિર્નાસત્યા સાતયે કૃતમ્ ॥ ૧૦.૧૪૩.૦૫
આ વાં સુમ્નૈઃ શંયૂ ઇવ મંહિષ્ઠા વિશ્વવેદસા ।
સમસ્મે ભૂષતં નરોત્સં ન પિપ્યુષીરિષઃ ॥ ૧૦.૧૪૩.૦૬
અયં હિ તે અમર્ત્ય ઇન્દુરત્યો ન પત્યતે ।
દક્ષો વિશ્વાયુર્વેધસે ॥ ૧૦.૧૪૪.૦૧
અયમસ્માસુ કાવ્ય ઋભુર્વજ્રો દાસ્વતે ।
અયં બિભર્ત્યૂર્ધ્વકૃશનં મદમૃભુર્ન કૃત્વ્યં મદમ્ ॥ ૧૦.૧૪૪.૦૨
ઘૃષુઃ શ્યેનાય કૃત્વન આસુ સ્વાસુ વંસગઃ ।
અવ દીધેદહીશુવઃ ॥ ૧૦.૧૪૪.૦૩
યં સુપર્ણઃ પરાવતઃ શ્યેનસ્ય પુત્ર આભરત્ ।
શતચક્રં યોઽહ્યો વર્તનિઃ ॥ ૧૦.૧૪૪.૦૪
યં તે શ્યેનશ્ચારુમવૃકં પદાભરદરુણં માનમન્ધસઃ ।
એના વયો વિ તાર્યાયુર્જીવસ એના જાગાર બન્ધુતા ॥ ૧૦.૧૪૪.૦૫
એવા તદિન્દ્ર ઇન્દુના દેવેષુ ચિદ્ધારયાતે મહિ ત્યજઃ ।
ક્રત્વા વયો વિ તાર્યાયુઃ સુક્રતો ક્રત્વાયમસ્મદા સુતઃ ॥ ૧૦.૧૪૪.૦૬
ઇમાં ખનામ્યોષધિં વીરુધં બલવત્તમામ્ ।
યયા સપત્નીં બાધતે યયા સંવિન્દતે પતિમ્ ॥ ૧૦.૧૪૫.૦૧
ઉત્તાનપર્ણે સુભગે દેવજૂતે સહસ્વતિ ।

સપત્નીં મે પરા ધમ પતિં મે કેવલં કુરુ ॥ ૧૦.૧૪૫.૦૨
ઉત્તરાહમુત્તર ઉત્તરેદુત્તરાભ્યઃ ।
અથા સપત્ની યા મમાધરા સાધરાભ્યઃ ॥ ૧૦.૧૪૫.૦૩
નહ્યસ્યા નામ ગૃભ્ણામિ નો અસ્મિન્રમતે જને ।
પરામેવ પરાવતં સપત્નીં ગમયામસિ ॥ ૧૦.૧૪૫.૦૪
અહમસ્મિ સહમાનાથ ત્વમસિ સાસહિઃ ।
ઉભે સહસ્વતી ભૂત્વી સપત્નીં મે સહાવહૈ ॥ ૧૦.૧૪૫.૦૫
ઉપ તેઽધાં સહમાનામભિ ત્વાધાં સહીયસા ।
મામનુ પ્ર તે મનો વત્સં ગૌરિવ ધાવતુ પથા વારિવ ધાવતુ ॥ ૧૦.૧૪૫.૦૬
અરણ્યાન્યરણ્યાન્યસૌ યા પ્રેવ નશ્યસિ ।
કથા ગ્રામં ન પૃચ્છસિ ન ત્વા ભીરિવ વિન્દતીઁ ॥ ૧૦.૧૪૬.૦૧
વૃષારવાય વદતે યદુપાવતિ ચિચ્ચિકઃ ।
આઘાટિભિરિવ ધાવયન્નરણ્યાનિર્મહીયતે ॥ ૧૦.૧૪૬.૦૨
ઉત ગાવ ઇવાદન્ત્યુત વેશ્મેવ દૃશ્યતે ।
ઉતો અરણ્યાનિઃ સાયં શકટીરિવ સર્જતિ ॥ ૧૦.૧૪૬.૦૩
ગામઙ્ગૈષ આ હ્વયતિ દાર્વઙ્ગૈષો અપાવધીત્ ।
વસન્નરણ્યાન્યાં સાયમક્રુક્ષદિતિ મન્યતે ॥ ૧૦.૧૪૬.૦૪
ન વા અરણ્યાનિર્હન્ત્યન્યશ્ચેન્નાભિગચ્છતિ ।
સ્વાદોઃ ફલસ્ય જગ્ધ્વાય યથાકામં નિ પદ્યતે ॥ ૧૦.૧૪૬.૦૫
આઞ્જનગન્ધિં સુરભિં બહ્વન્નામકૃષીવલામ્ ।
પ્રાહં મૃગાણાં માતરમરણ્યાનિમશંસિષમ્ ॥ ૧૦.૧૪૬.૦૬
શ્રત્તે દધામિ પ્રથમાય મન્યવેઽહન્યદ્વૃત્રં નર્યં વિવેરપઃ ।
ઉભે યત્ત્વા ભવતો રોદસી અનુ રેજતે શુષ્માત્પૃથિવી ચિદદ્રિવઃ ॥ ૧૦.૧૪૭.૦૧
ત્વં માયાભિરનવદ્ય માયિનં શ્રવસ્યતા મનસા વૃત્રમર્દયઃ ।
ત્વામિન્નરો વૃણતે ગવિષ્ટિષુ ત્વાં વિશ્વાસુ હવ્યાસ્વિષ્ટિષુ ॥ ૧૦.૧૪૭.૦૨
ઐષુ ચાકન્ધિ પુરુહૂત સૂરિષુ વૃધાસો યે મઘવન્નાનશુર્મઘમ્ ।
અર્ચન્તિ તોકે તનયે પરિષ્ટિષુ મેધસાતા વાજિનમહ્રયે ધને ॥ ૧૦.૧૪૭.૦૩

સ ઇન્નુ રાયઃ સુભૃતસ્ય ચાકનન્મદં યો અસ્ય રંહ્યં ચિકેતતિ ।
ત્વાવૃધો મઘવન્દાશ્વધ્વરો મક્ષૂ સ વાજં ભરતે ધના નૃભિઃ ॥ ૧૦.૧૪૭.૦૪

ત્વં શર્ધાય મહિના ગૃણાન ઉરુ કૃધિ મઘવઞ્છગ્ધિ રાયઃ ।
ત્વં નો મિત્રો વરુણો ન માયી પિત્વો ન દસ્મ દયસે વિભક્તા ॥ ૧૦.૧૪૭.૦૫

સુષ્વાણાસ ઇન્દ્ર સ્તુમસિ ત્વા સસવાંસશ્ચ તુવિનૃમ્ણ વાજમ્ ।
આ નો ભર સુવિતં યસ્ય ચાકન્ત્મના તના સનુયામ ત્વોતાઃ ॥ ૧૦.૧૪૮.૦૧

ઋષ્વસ્ત્વમિન્દ્ર શૂર જાતો દાસીર્વિશઃ સૂર્યેણ સહ્યાઃ ।
ગુહા હિતં ગુહ્યં ગૂળ્હમપ્સુ બિભૃમસિ પ્રસ્રવણે ન સોમમ્ ॥ ૧૦.૧૪૮.૦૨

અર્યો વા ગિરો અભ્યર્ચ વિદ્વાનૃષીણાં વિપ્રઃ સુમતિં ચકાનઃ ।
તે સ્યામ યે રણયન્ત સોમૈરેનોત તુભ્યં રથોળ્હ ભક્ષૈઃ ॥ ૧૦.૧૪૮.૦૩

ઇમા બ્રહ્મેન્દ્ર તુભ્યં શંસિ દા નૃભ્યો નૃણાં શૂર શવઃ ।
તેભિર્ભવ સક્રતુર્યેષુ ચાકન્નુત ત્રાયસ્વ ગૃણત ઉત સ્તીન્ ॥ ૧૦.૧૪૮.૦૪

શ્રુધી હવમિન્દ્ર શૂર પૃથ્યા ઉત સ્તવસે વેન્યસ્યાર્કૈઃ ।
આ યસ્તે યોનિં ઘૃતવન્તમસ્વારૂર્મિર્ન નિમ્નૈર્દ્રવયન્ત વક્વાઃ ॥ ૧૦.૧૪૮.૦૫

સવિતા યન્ત્રૈઃ પૃથિવીમરમ્ણાદસ્કમ્ભને સવિતા દ્યામદૃંહત્ ।
અશ્વમિવાધુક્ષદ્ધુનિમન્તરિક્ષમતૂર્તે બદ્ધં સવિતા સમુદ્રમ્ ॥ ૧૦.૧૪૯.૦૧

યત્રા સમુદ્રઃ સ્કભિતો વ્યૌનદપાં નપાત્સવિતા તસ્ય વેદ ।
અતો ભૂરત આ ઉત્થિતં રજોઽતો દ્યાવાપૃથિવી અપ્રથેતામ્ ॥ ૧૦.૧૪૯.૦૨

પશ્ચેદમન્યદભવદ્યજત્રમમર્ત્યસ્ય ભુવનસ્ય ભૂના ।
સુપર્ણો અઙ્ગ સવિતુર્ગરુત્માન્પૂર્વો જાતઃ સ ઉ અસ્યાનુ ધર્મ ॥ ૧૦.૧૪૯.૦૩

ગાવ ઇવ ગ્રામં યૂયુધિરિવાશ્વાન્વાશ્રેવ વત્સં સુમના દુહાના ।
પતિરિવ જાયામભિ નો ન્યેતુ ધર્તા દિવઃ સવિતા વિશ્વવારઃ ॥ ૧૦.૧૪૯.૦૪

હિરણ્યસ્તૂપઃ સવિતર્યથા ત્વાઙ્ગિરસો જુહ્વે વાજે અસ્મિન્ ।
એવા ત્વાર્ચન્નવસે વન્દમાનઃ સોમસ્યેવાંશું પ્રતિ જાગરાહમ્ ॥ ૧૦.૧૪૯.૦૫

સમિદ્ધશ્ચિત્સમિધ્યસે દેવેભ્યો હવ્યવાહન ।
આદિત્યૈ રુદ્રૈર્વસુભિર્ન આ ગહિ મૃળીકાય ન આ ગહિ ॥ ૧૦.૧૫૦.૦૧

ઇમં યજ્ઞમિદં વચો જુજુષાણ ઉપાગહિ ।

મર્તાસસ્ત્વા સમિધાન હવામહે મૃળીકાય  હવામહે ॥ ૧૦.૧૫૦.૦૨
ત્વામુ  જાતવેદસં વિશ્વવારં ગૃણે ધિયા ।
અગ્ને  દેવાઁ આ વહ નઃ પ્રિયવ્રતાન્મૃળીકાય  પ્રિયવ્રતાન્ ॥ ૧૦.૧૫૦.૦૩
અગ્નિર્દેવો દેવાનામભવત્પુરોહિતોऽગ્નિં મનુષ્યાૠ  ઋષયઃ  સમીધિરે ।
અગ્નિં મહો ધનસાતાવહં હુવે મૃળીકં ધનસાતયે ॥ ૧૦.૧૫૦.૦૪
અગ્નિરત્રિં  ભરદ્વાજં  ગવિષ્ઠિરં  પ્રાવન્નઃ  કણ્વં  ત્રસદસ્યુમાહવે ।
અગ્નિં વસિષ્ઠો હવતે પુરોહિતો મૃળીકાય  પુરોહિતઃ ॥ ૧૦.૧૫૦.૦૫

શ્રદ્ધયાગ્નિઃ સમિધ્યતે શ્રદ્ધયા  હૂયતે હવિઃ ।
શ્રદ્ધાં ભગસ્ય મૂર્ધનિ  વચસા વેદયામસિ ॥ ૧૦.૧૫૧.૦૧
પ્રિયં શ્રદ્ધે  દદતઃ પ્રિયં શ્રદ્ધે  દિદાસતઃ ।
પ્રિયં ભોજેષુ  યજ્વસ્વિદં મ  ઉદિતં કૃધિ ॥ ૧૦.૧૫૧.૦૨
યથા  દેવા અસુરેષુ શ્રદ્ધામુગ્રેષુ  ચક્રિરે ।
એવં ભોજેષુ  યજ્વસ્વસ્માકમુદિતં કૃધિ ॥ ૧૦.૧૫૧.૦૩
શ્રદ્ધાં દેવા યજમાના વાયુગોપા  ઉપાસતે ।
શ્રદ્ધાં હૃદય્ય૧યાકૂત્યા શ્રદ્ધયા  વિન્દતે  વસુ  ॥ ૧૦.૧૫૧.૦૪
શ્રદ્ધાં પ્રાતર્હવામહે શ્રદ્ધાં મધ્યંદિનં  પરિ  ।
શ્રદ્ધાં સૂર્યસ્ય નિમ્રુચિ  શ્રદ્ધે  શ્રદ્ધાપયેહ નઃ  ॥ ૧૦.૧૫૧.૦૫

શાસ ઇત્થા મહાઁ અસ્યમિત્રખાદો અદ્ભુતઃ ।
ન યસ્ય  હન્યતે  સખા  ન જીયતે  કદા  ચન ॥ ૧૦.૧૫૨.૦૧
સ્વસ્તિદા વિશસ્પતિર્વૃત્રહા વિમૃધો વશી ।
વૃષેન્દ્રઃ  પુર એતુ નઃ સોમપા અભયંકરઃ ॥ ૧૦.૧૫૨.૦૨
વિ રક્ષો  વિ મૃધો  જહિ  વિ વૃત્રસ્ય  હનૂ  રુજ ।
વિ મન્યુમિન્દ્ર વૃત્રહન્નમિત્રસ્યાભિદાસતઃ ॥ ૧૦.૧૫૨.૦૩
વિ ન  ઇન્દ્ર  મૃધો  જહિ નીચા યચ્છ પૃતન્યતઃ ।
યો અસ્માઁ અભિદાસત્યધરં ગમયા  તમઃ  ॥ ૧૦.૧૫૨.૦૪
અપેન્દ્ર દ્વિષતો મનોऽપ  જિજ્યાસતો વધમ્ ।
વિ મન્યોઃ શર્મ  યચ્છ  વરીયો યવયા વધમ્ ॥ ૧૦.૧૫૨.૦૫

ઇઙ્ખયન્તીરપસ્યુવ ઇન્દ્રં જાતમુપાસતે ।
ભેજાનાસઃ સુવીર્યમ્ ॥ ૧૦.૧૫૩.૦૧
ત્વમિન્દ્ર બલાદધિ સહસો જાત ઓજસઃ ।
ત્વં વૃષન્વૃષેદસિ ॥ ૧૦.૧૫૩.૦૨
ત્વમિન્દ્રાસિ વૃત્રહા વ્યન્તરિક્ષમતિરઃ ।
ઉદ્યામસ્તભ્ના ઓજસા ॥ ૧૦.૧૫૩.૦૩
ત્વમિન્દ્ર સજોષસમર્કં બિભર્ષિ બાહ્વોઃ ।
વજ્રં શિશાન ઓજસા ॥ ૧૦.૧૫૩.૦૪
ત્વમિન્દ્રાભિભૂરસિ વિશ્વા જાતાન્યોજસા ।
સ વિશ્વા ભુવ આભવઃ ॥ ૧૦.૧૫૩.૦૫

સોમ એકેભ્યઃ પવતે ઘૃતમેક ઉપાસતે ।
યેભ્યો મધુ પ્રધાવતિ તાઁશ્ચિદેવાપિ ગચ્છતાત્ ॥ ૧૦.૧૫૪.૦૧
તપસા યે અનાધૃષ્યાસ્તપસા યે સ્વર્યયુઃ ।
તપો યે ચક્રિરે મહસ્તાઁશ્ચિદેવાપિ ગચ્છતાત્ ॥ ૧૦.૧૫૪.૦૨
યે યુધ્યન્તે પ્રધનેષુ શૂરાસો યે તનૂત્યજઃ ।
યે વા સહસ્રદક્ષિણાસ્તાઁશ્ચિદેવાપિ ગચ્છતાત્ ॥ ૧૦.૧૫૪.૦૩
યે ચિત્પૂર્વ ઋતસાપ ઋતાવાન ઋતાવૃધઃ ।
પિતૄન્તપસ્વતો યમ તાઁશ્ચિદેવાપિ ગચ્છતાત્ ॥ ૧૦.૧૫૪.૦૪
સહસ્રણીથાઃ કવયો યે ગોપાયન્તિ સૂર્યમ્ ।
ઋષીન્તપસ્વતો યમ તપોજાઁ અપિ ગચ્છતાત્ ॥ ૧૦.૧૫૪.૦૫

અરાયિ કાણે વિકટે ગિરિં ગચ્છ સદાન્વે ।
શિરિમ્બિઠસ્ય સત્વભિસ્તેભિષ્ટ્વા ચાતયામસિ ॥ ૧૦.૧૫૫.૦૧
ચત્તો ઇતશ્ચત્તામુતઃ સર્વા ભ્રૂણાન્યારુષી ।
અરાય્યં બ્રહ્મણસ્પતે તીક્ષ્ણશૃઙ્ગોદૃષન્નિહિ ॥ ૧૦.૧૫૫.૦૨
અદો યદ્દારુ પ્લવતે સિન્ધોઃ પારે અપૂરુષમ્ ।
તદા રભસ્વ દુર્હણો તેન ગચ્છ પરસ્તરમ્ ॥ ૧૦.૧૫૫.૦૩
યદ્ધ પ્રાચીરજગન્તોરો મણ્ડૂરધાણિકીઃ ।

હતા ઇન્દ્રસ્ય શત્રવઃ સર્વે બુદ્બુદયાશવઃ ॥ ૧૦.૧૫૫.૦૪
પરીમે ગામનેષત પર્યગ્નિમહૃષત ।
દેવેષ્વક્રત શ્રવઃ ક ઇમાઁ આ દધર્ષતિ ॥ ૧૦.૧૫૫.૦૫
અગ્નિં હિન્વન્તુ નો ધિયઃ સપ્તિમાશુમિવાજિષુ ।
તેન જેષ્મ ધનંધનમ્ ॥ ૧૦.૧૫૬.૦૧
યયા ગા આકરામહે સેનયાગ્ને તવોત્યા ।
તાં નો હિન્વ મઘત્તયે ॥ ૧૦.૧૫૬.૦૨
આગ્ને સ્થૂરં રયિં ભર પૃથું ગોમન્તમશ્વિનમ્ ।
અઙ્ધિ ખં વર્તયા પણિમ્ ॥ ૧૦.૧૫૬.૦૩
અગ્ને નક્ષત્રમજરમા સૂર્યં રોહયો દિવિ ।
દધજ્જ્યોતિર્જનેભ્યઃ ॥ ૧૦.૧૫૬.૦૪
અગ્ને કેતુર્વિશામસિ પ્રેષ્ઠઃ શ્રેષ્ઠ ઉપસ્થસત્ ।
બોધા સ્તોત્રે વયો દધત્ ॥ ૧૦.૧૫૬.૦૫
ઇમા નુ કં ભુવના સીષધામેન્દ્રશ્ચ વિશ્વે ચ દેવાઃ ॥ ૧૦.૧૫૭.૦૧
યજ્ઞં ચ નસ્તન્વં ચ પ્રજાં ચાદિત્યૈરિન્દ્રઃ સહ ચીક્લૃપાતિ ॥ ૧૦.૧૫૭.૦૨
આદિત્યૈરિન્દ્રઃ સગણો મરુદ્ભિરસ્માકં ભૂત્વવિતા તનૂનામ્ ॥ ૧૦.૧૫૭.૦૩
હત્વાય દેવા અસુરાન્યદાયન્દેવા દેવત્વમભિરક્ષમાણાઃ ॥ ૧૦.૧૫૭.૦૪
પ્રત્યઞ્ચમર્કમનયઞ્છચીભિરાદિત્સ્વધામિષિરાં પર્યપશ્યન્ ॥ ૧૦.૧૫૭.૦૫
સૂર્યો નો દિવસ્પાતુ વાતો અન્તરિક્ષાત્ ।
અગ્નિર્નઃ પાર્થિવેભ્યઃ ॥ ૧૦.૧૫૮.૦૧
જોષા સવિતર્યસ્ય તે હરઃ શતં સવાઁ અર્હતિ ।
પાહિ નો દિદ્યુતઃ પતન્ત્યાઃ ॥ ૧૦.૧૫૮.૦૨
ચક્ષુર્નો દેવઃ સવિતા ચક્ષુર્ન ઉત પર્વતઃ ।
ચક્ષુર્ધાતા દધાતુ નઃ ॥ ૧૦.૧૫૮.૦૩
ચક્ષુર્નો ધેહિ ચક્ષુષે ચક્ષુર્વિખ્યૈ તનૂભ્યઃ ।
સં ચેદં વિ ચ પશ્યેમ ॥ ૧૦.૧૫૮.૦૪
સુસંદૃશં ત્વા વયં પ્રતિ પશ્યેમ સૂર્ય ।

વિ પશ્યેમ નૃચક્ષસઃ ॥ ૧૦.૧૫૮.૦૫

ઉદસૌ સૂર્યો અગાદુદયં મામકો ભગઃ ।
અહં તદ્વિદ્વલા પતિમભ્યસાક્ષિ વિષાસહિઃ ॥ ૧૦.૧૫૯.૦૧
અહં કેતુરહં મૂર્ધાહમુગ્રા વિવાચની ।
મમેદનુ ક્રતું પતિઃ સેહાનાયા ઉપાચરેત્ ॥ ૧૦.૧૫૯.૦૨
મમ પુત્રાઃ શત્રુહણોઽથો મે દુહિતા વિરાટ્ ।
ઉતાહમસ્મિ સંજયા પત્યૌ મે શ્લોક ઉત્તમઃ ॥ ૧૦.૧૫૯.૦૩
યેનેન્દ્રો હવિષા કૃત્વ્યભવદ્દ્યુમ્ન્યુત્તમઃ ।
ઇદં તદક્રિ દેવા અસપત્ના કિલાભુવમ્ ॥ ૧૦.૧૫૯.૦૪
અસપત્ના સપત્નઘ્ની જયન્ત્યભિભૂવરી ।
આવૃક્ષમન્યાસાં વર્ચો રાધો અસ્થેયસામિવ ॥ ૧૦.૧૫૯.૦૫
સમજૈષમિમા અહં સપત્નીરભિભૂવરી ।
યથાહમસ્ય વીરસ્ય વિરાજાનિ જનસ્ય ચ ॥ ૧૦.૧૫૯.૦૬

તીવ્રસ્યાભિવયસો અસ્ય પાહિ સર્વરથા વિ હરી ઇહ મુઞ્ચ ।
ઇન્દ્ર મા ત્વા યજમાનાસો અન્યે નિ રીરમન્તુભ્યમિમે સુતાસઃ ॥ ૧૦.૧૬૦.૦૧
તુભ્યં સુતાસ્તુભ્યમુ સોત્વાસસ્ત્વાં ગિરઃ શ્વાત્ર્યા આ હ્વયન્તિ ।
ઇન્દ્રેદમદ્ય સવનં જુષાણો વિશ્વસ્ય વિદ્વાઁ ઇહ પાહિ સોમમ્ ॥ ૧૦.૧૬૦.૦૨
ય ઉશતા મનસા સોમમસ્મૈ સર્વહૃદા દેવકામઃ સુનોતિ ।
ન ગા ઇન્દ્રસ્તસ્ય પરા દદાતિ પ્રશસ્તમિચ્ચારુમસ્મૈ કૃણોતિ ॥ ૧૦.૧૬૦.૦૩
અનુસ્પષ્ટો ભવત્યેષો અસ્ય યો અસ્મૈ રેવાન્ન સુનોતિ સોમમ્ ।
નિરરત્નૌ મઘવા તં દધાતિ બ્રહ્મદ્વિષો હન્ત્યનાનુદિષ્ટઃ ॥ ૧૦.૧૬૦.૦૪
અશ્વાયન્તો ગવ્યન્તો વાજયન્તો હવામહે ત્વોપગન્તવા ઉ ।
આભૂષન્તસ્તે સુમતૌ નવાયાં વયમિન્દ્ર ત્વા શુનં હુવેમ ॥ ૧૦.૧૬૦.૦૫

મુઞ્ચામિ ત્વા હવિષા જીવનાય કમજ્ઞાતયક્ષ્માદુત રાજયક્ષ્માત્ ।
ગ્રાહિર્જગ્રાહ યદિ વૈતદેનં તસ્યા ઇન્દ્રાગ્ની પ્ર મુમુક્તમેનમ્ ॥ ૧૦.૧૬૧.૦૧
યદિ ક્ષિતાયુર્યદિ વા પરેતો યદિ મૃત્યોરન્તિકં નીત એવ ।
તમા હરામિ નિરૃતેરુપસ્થાદસ્પાર્ષમેનં શતશારદાય ॥ ૧૦.૧૬૧.૦૨

સહસ્રાક્ષેણ શતશારદેન શતાયુષા હવિષાહાર્ષમેનમ્ ।
શતં યથેમં શરદો નયાતીન્દ્રો વિશ્વસ્ય દુરિતસ્ય પારમ્ ॥ ૧૦.૧૬૧.૦૩
શતં જીવ શરદો વર્ધમાનઃ શતં હેમન્તાઞ્છતમુ વસન્તાન્ ।
શતમિન્દ્રાગ્ની સવિતા બૃહસ્પતિઃ શતાયુષા હવિષેમં પુનર્દુઃ ॥ ૧૦.૧૬૧.૦૪
આહાર્ષં ત્વાવિદં ત્વા પુનરાગાઃ પુનર્નવ ।
સર્વાઙ્ગ સર્વં તે ચક્ષુઃ સર્વમાયુશ્ચ તેઽવિદમ્ ॥ ૧૦.૧૬૧.૦૫
બ્રહ્મણાગ્નિઃ સંવિદાનો રક્ષોહા બાધતામિતઃ ।
અમીવા યસ્તે ગર્ભં દુર્ણામા યોનિમાશયે ॥ ૧૦.૧૬૨.૦૧
યસ્તે ગર્ભમમીવા દુર્ણામા યોનિમાશયે ।
અગ્નિષ્ટં બ્રહ્મણા સહ નિષ્ક્રવ્યાદમનીનશત્ ॥ ૧૦.૧૬૨.૦૨
યસ્તે હન્તિ પતયન્તં નિષત્સ્નું યઃ સરીસૃપમ્ ।
જાતં યસ્તે જિઘાંસતિ તમિતો નાશયામસિ ॥ ૧૦.૧૬૨.૦૩
યસ્ત ઊરૂ વિહરત્યન્તરા દમ્પતી શયે ।
યોનિં યો અન્તરારેળ્હિ તમિતો નાશયામસિ ॥ ૧૦.૧૬૨.૦૪
યસ્ત્વા ભ્રાતા પતિર્ભૂત્વા જારો ભૂત્વા નિપદ્યતે ।
પ્રજાં યસ્તે જિઘાંસતિ તમિતો નાશયામસિ ॥ ૧૦.૧૬૨.૦૫
યસ્ત્વા સ્વપ્નેન તમસા મોહયિત્વા નિપદ્યતે ।
પ્રજાં યસ્તે જિઘાંસતિ તમિતો નાશયામસિ ॥ ૧૦.૧૬૨.૦૬
અક્ષીભ્યાં તે નાસિકાભ્યાં કર્ણાભ્યાં છુબુકાદધિ ।
યક્ષ્મં શીર્ષણ્યં મસ્તિષ્કાજ્જિહ્વાયા વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૧
ગ્રીવાભ્યસ્ત ઉષ્ણિહાભ્યઃ કીકસાભ્યો અનૂક્યાત્ ।
યક્ષ્મં દોષણ્યમંસાભ્યાં બાહુભ્યાં વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૨
આન્ત્રેભ્યસ્તે ગુદાભ્યો વનિષ્ઠોર્હૃદયાદધિ ।
યક્ષ્મં મતસ્નાભ્યાં યક્નઃ પ્લાશિભ્યો વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૩
ઊરુભ્યાં તે અષ્ઠીવદ્ભ્યાં પાર્ષ્ણિભ્યાં પ્રપદાભ્યામ્ ।
યક્ષ્મં શ્રોણિભ્યાં ભાસદાદ્ભંસસો વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૪
મેહનાદ્વનંકરણાલ્લોમભ્યસ્તે નખેભ્યઃ ।

યક્ષ્મં સર્વસ્માદાત્મનસ્તમિદં વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૫

અઙ્ગાદઙ્ગાલ્લોમ્નોલોમ્નો જાતં પર્વણિપર્વણિ ।

યક્ષ્મં સર્વસ્માદાત્મનસ્તમિદં વિ વૃહામિ તે ॥ ૧૦.૧૬૩.૦૬

અપેહિ મનસસ્પતેઽપ ક્રામ પરશ્ચર ।

પરો નિરૃત્યા આ ચક્ષ્વ બહુધા જીવતો મનઃ ॥ ૧૦.૧૬૪.૦૧

ભદ્રં વૈ વરં વૃણતે ભદ્રં યુઞ્જન્તિ દક્ષિણમ્ ।

ભદ્રં વૈવસ્વતે ચક્ષુર્બહુત્રા જીવતો મનઃ ॥ ૧૦.૧૬૪.૦૨

યદાશસા નિઃશસાભિશસોપારિમ જાગ્રતો યત્સ્વપન્તઃ ।

અગ્નિર્વિશ્વાન્યપ દુષ્કૃતાન્યજુષ્ટાન્યારે અસ્મદ્દધાતુ ॥ ૧૦.૧૬૪.૦૩

યદિન્દ્ર બ્રહ્મણસ્પતેઽભિદ્રોહં ચરામસિ ।

પ્રચેતા ન આઙ્ગિરસો દ્વિષતાં પાત્વંહસઃ ॥ ૧૦.૧૬૪.૦૪

અજૈષ્માદ્યાસનામ ચાભૂમાનાગસો વયમ્ ।

જાગ્રત્સ્વપ્નઃ સંકલ્પઃ પાપો યં દ્વિષ્મસ્તં સ ઋચ્છતુ યો નો દ્વેષ્ટિ તમૃચ્છતુ ॥ ૧૦.૧૬૪.૦૫

દેવાઃ કપોત ઇષિતો યદિચ્છન્દૂતો નિરૃત્યા ઇદમાજગામ ।

તસ્મા અર્ચામ કૃણવામ નિષ્કૃતિં શં નો અસ્તુ દ્વિપદે શં ચતુષ્પદે ॥ ૧૦.૧૬૫.૦૧

શિવઃ કપોત ઇષિતો નો અસ્ત્વનાગા દેવાઃ શકુનો ગૃહેષુ ।

અગ્નિર્હિ વિપ્રો જુષતાં હવિર્નઃ પરિ હેતિઃ પક્ષિણી નો વૃણક્તુ ॥ ૧૦.૧૬૫.૦૨

હેતિઃ પક્ષિણી ન દભાત્યસ્માનાષ્ટ્ર્યાં પદં કૃણુતે અગ્નિધાને ।

શં નો ગોભ્યશ્ચ પુરુષેભ્યશ્ચાસ્તુ મા નો હિંસીદિહ દેવાઃ કપોતઃ ॥ ૧૦.૧૬૫.૦૩

યદુલૂકો વદતિ મોઘમેતદ્યત્કપોતઃ પદમગ્નૌ કૃણોતિ ।

યસ્ય દૂતઃ પ્રહિત એષ એતત્તસ્મૈ યમાય નમો અસ્તુ મૃત્યવે ॥ ૧૦.૧૬૫.૦૪

ઋચા કપોતં નુદત પ્રણોદમિષં મદન્તઃ પરિ ગાં નયધ્વમ્ ।

સંયોપયન્તો દુરિતાનિ વિશ્વા હિત્વા ન ઊર્જં પ્ર પતાત્પતિષ્ઠઃ ॥ ૧૦.૧૬૫.૦૫

ઋષભં મા સમાનાનાં સપત્નાનાં વિષાસહિમ્ ।

હન્તારં શત્રૂણાં કૃધિ વિરાજં ગોપતિં ગવામ્ ॥ ૧૦.૧૬૬.૦૧

અહમસ્મિ સપત્નહેન્દ્ર ઇવારિષ્ટો અક્ષતઃ ।

અધઃ સપત્ના મે પદોરિમે સર્વે અભિષ્ઠિતાઃ ॥ ૧૦.૧૬૬.૦૨

અત્રૈવ વોઽપિ નહ્યામ્યુભે આર્ત્ની ઇવ જ્યયા ।
વાચસ્પતે નિ ષેધેમાન્યથા મદધરં વદાન્ ॥ ૧૦.૧૬૬.૦૩
અભિભૂરહમાગમં વિશ્વકર્મેણ ધામ્ના ।
આ વશ્ચિત્તમા વો વ્રતમા વોઽહં સમિતિં દદે ॥ ૧૦.૧૬૬.૦૪
યોગક્ષેમં વ આદાયાહં ભૂયાસમુત્તમ આ વો મૂર્ધાનમક્રમીમ્ ।
અધસ્પદાન્મ ઉદ્વદત મણ્ડૂકા ઇવોદકાન્મણ્ડૂકા ઉદકાદિવ ॥ ૧૦.૧૬૬.૦૫

તુભ્યેદમિન્દ્ર પરિ ષિચ્યતે મધુ ત્વં સુતસ્ય કલશસ્ય રાજસિ ।
ત્વં રયિં પુરુવીરામુ નસ્કૃધિ ત્વં તપઃ પરિતપ્યાજયઃ સ્વઃ ॥ ૧૦.૧૬૭.૦૧
સ્વર્જિતં મહિ મન્દાનમન્ધસો હવામહે પરિ શક્રં સુતાઁ ઉપ ।
ઇમં નો યજ્ઞમિહ બોધ્યા ગહિ સ્પૃધો જયન્તં મઘવાનમીમહે ॥ ૧૦.૧૬૭.૦૨
સોમસ્ય રાજ્ઞો વરુણસ્ય ધર્મણિ બૃહસ્પતેરનુમત્યા ઉ શર્મણિ ।
તવાહમદ્ય મઘવન્નુપસ્તુતૌ ધાતર્વિધાતઃ કલશાઁ અભક્ષયમ્ ॥ ૧૦.૧૬૭.૦૩
પ્રસૂતો ભક્ષમકરં ચરાવપિ સ્તોમં ચેમં પ્રથમઃ સૂરિરુન્મૃજે ।
સુતે સાતેન યદ્યાગમં વાં પ્રતિ વિશ્વામિત્રજમદગ્ની દમે ॥ ૧૦.૧૬૭.૦૪

વાતસ્ય નુ મહિમાનં રથસ્ય રુજન્નેતિ સ્તનયન્નસ્ય ઘોષઃ ।
દિવિસ્પૃગ્યાત્યરુણાનિ કૃણ્વન્નુતો એતિ પૃથિવ્યા રેણુમસ્યન્ ॥ ૧૦.૧૬૮.૦૧
સં પ્રેરતે અનુ વાતસ્ય વિષ્ઠા ઐનં ગચ્છન્તિ સમનં ન યોષાઃ ।
તાભિઃ સયુક્સરથં દેવ ઈયતેઽસ્ય વિશ્વસ્ય ભુવનસ્ય રાજા ॥ ૧૦.૧૬૮.૦૨
અન્તરિક્ષે પથિભિરીયમાનો ન નિ વિશતે કતમચ્ચનાહઃ ।
અપાં સખા પ્રથમજા ઋતાવા ક્વ સ્વિજ્જાતઃ કુત આ બભૂવ ॥ ૧૦.૧૬૮.૦૩
આત્મા દેવાનાં ભુવનસ્ય ગર્ભો યથાવશં ચરતિ દેવ એષઃ ।
ઘોષા ઇદસ્ય શૃણ્વિરે ન રૂપં તસ્મૈ વાતાય હવિષા વિધેમ ॥ ૧૦.૧૬૮.૦૪

મયોભૂર્વાતો અભિ વાતૂસ્રા ઊર્જસ્વતીરોષધીરા રિશન્તામ્ ।
પીવસ્વતીર્જીવધન્યાઃ પિબન્ત્વવસાય પદ્વતે રુદ્ર મૃળ ॥ ૧૦.૧૬૯.૦૧
યાઃ સરૂપા વિરૂપા એકરૂપા યાસામગ્નિરિષ્ટ્યા નામાનિ વેદ ।
યા અઙ્ગિરસસ્તપસેહ ચક્રુસ્તાભ્યઃ પર્જન્ય મહિ શર્મ યચ્છ ॥ ૧૦.૧૬૯.૦૨
યા દેવેષુ તન્વમૈરયન્ત યાસાં સોમો વિશ્વા રૂપાણિ વેદ ।

તા અસ્મભ્યં પયસા પિન્વમાનાઃ પ્રજાવતીરિન્દ્ર ગોષ્ઠે રિરીહિ ॥ ૧૦.૧૬૯.૦૩
પ્રજાપતિર્મહ્યમેતા રરાણો વિશ્વૈર્દેવૈઃ પિતૃભિઃ સંવિદાનઃ ।
શિવાઃ સતીરુપ નો ગોષ્ઠમાકસ્તાસાં વયં પ્રજયા સં સદેમ ॥ ૧૦.૧૬૯.૦૪

વિભ્રાડ્બૃહત્પિબતુ સોમ્યં મધ્વાયુર્દધદ્યજ્ઞપતાવવિહ્રુતમ્ ।
વાતજૂતો યો અભિરક્ષતિ ત્મના પ્રજાઃ પુપોષ પુરુધા વિ રાજતિ ॥ ૧૦.૧૭૦.૦૧
વિભ્રાડ્બૃહત્સુભૃતં વાજસાતમં ધર્મન્દિવો ધરુણે સત્યમર્પિતમ્ ।
અમિત્રહા વૃત્રહા દસ્યુહન્તમં જ્યોતિર્જજ્ઞે અસુરહા સપત્નહા ॥ ૧૦.૧૭૦.૦૨
ઇદં શ્રેષ્ઠં જ્યોતિષાં જ્યોતિરુત્તમં વિશ્વજિદ્ધનજિદુચ્યતે બૃહત્ ।
વિશ્વભ્રાડ્ભ્રાજો મહિ સૂર્યો દૃશ ઉરુ પપ્રથે સહ ઓજો અચ્યુતમ્ ॥ ૧૦.૧૭૦.૦૩
વિભ્રાજઞ્જ્યોતિષા સ્વ૧રગચ્છો રોચનં દિવઃ ।
યેનેમા વિશ્વા ભુવનાન્યાભૃતા વિશ્વકર્મણા વિશ્વદેવ્યાવતા ॥ ૧૦.૧૭૦.૦૪

ત્વં ત્યમિટતો રથમિન્દ્ર પ્રાવઃ સુતાવતઃ ।
અશ઼ૃણોઃ સોમિનો હવમ્ ॥ ૧૦.૧૭૧.૦૧
ત્વં મખસ્ય દોધતઃ શિરોઽવ ત્વચો ભરઃ ।
અગચ્છઃ સોમિનો ગૃહમ્ ॥ ૧૦.૧૭૧.૦૨
ત્વં ત્યમિન્દ્ર મર્ત્યમાસ્ત્રબુધ્નાય વેન્યમ્ ।
મુહુઃ શ્રથ્ના મનસ્યવે ॥ ૧૦.૧૭૧.૦૩
ત્વં ત્યમિન્દ્ર સૂર્યં પશ્ચા સન્તં પુરસ્કૃધિ ।
દેવાનાં ચિત્તિરો વશમ્ ॥ ૧૦.૧૭૧.૦૪

આ યાહિ વનસા સહ ગાવઃ સચન્ત વર્તનિં યદૂધભિઃ ॥ ૧૦.૧૭૨.૦૧
આ યાહિ વસ્વ્યા ધિયા મંહિષ્ઠો જારયન્મખઃ સુદાનુભિઃ ॥ ૧૦.૧૭૨.૦૨
પિતુભૃતો ન તન્તુમિત્સુદાનવઃ પ્રતિ દધ્મો યજામસિ ॥ ૧૦.૧૭૨.૦૩
ઉષા અપ સ્વસુસ્તમઃ સં વર્તયતિ વર્તનિં સુજાતતા ॥ ૧૦.૧૭૨.૦૪

આ ત્વાહાર્ષમન્તરેધિ ધ્રુવસ્તિષ્ઠાવિચાચલિઃ ।
વિશસ્ત્વા સર્વા વાઞ્છન્તુ મા ત્વદ્રાષ્ટ્રમધિ ભ્રશત્ ॥ ૧૦.૧૭૩.૦૧
ઇહૈવૈધિ માપ ચ્યોષ્ઠાઃ પર્વત ઇવાવિચાચલિઃ ।
ઇન્દ્ર ઇવેહ ધ્રુવસ્તિષ્ઠેહ રાષ્ટ્રમુ ધારય ॥ ૧૦.૧૭૩.૦૨

ઇમમિન્દ્રો અદીધરદ્ધ્રુવં ધ્રુવેણ હવિષા ।
તસ્મૈ સોમો અધિ બ્રવત્તસ્મા ઉ બ્રહ્મણસ્પતિઃ ॥ ૧૦.૧૭૩.૦૩
ધ્રુવા દ્યૌર્ધ્રુવા પૃથિવી ધ્રુવાસઃ પર્વતા ઇમે ।
ધ્રુવં વિશ્વમિદં જગદ્ધ્રુવો રાજા વિશામયમ્ ॥ ૧૦.૧૭૩.૦૪
ધ્રુવં તે રાજા વરુણો ધ્રુવં દેવો બૃહસ્પતિઃ ।
ધ્રુવં ત ઇન્દ્રશ્ચાગ્નિશ્ચ રાષ્ટ્રં ધારયતાં ધ્રુવમ્ ॥ ૧૦.૧૭૩.૦૫
ધ્રુવં ધ્રુવેણ હવિષાભિ સોમં મૃશામસિ ।
અથો ત ઇન્દ્રઃ કેવલીર્વિશો બલિહૃતસ્કરત્ ॥ ૧૦.૧૭૩.૦૬

અભીવર્તેન હવિષા યેનેન્દ્રો અભિવાવૃતે ।
તેનાસ્માન્બ્રહ્મણસ્પતેઽભિ રાષ્ટ્રાય વર્તય ॥ ૧૦.૧૭૪.૦૧
અભિવૃત્ય સપત્નાનભિ યા નો અરાતયઃ ।
અભિ પૃતન્યન્તં તિષ્ઠાભિ યો ન ઇરસ્યતિ ॥ ૧૦.૧૭૪.૦૨
અભિ ત્વા દેવઃ સવિતાભિ સોમો અવીવૃતત્ ।
અભિ ત્વા વિશ્વા ભૂતાન્યભીવર્તો યથાસસિ ॥ ૧૦.૧૭૪.૦૩
યેનેન્દ્રો હવિષા કૃત્વ્યભવદ્દ્યુમ્ન્યુત્તમઃ ।
ઇદં તદક્રિ દેવા અસપત્નઃ કિલાભુવમ્ ॥ ૧૦.૧૭૪.૦૪
અસપત્નઃ સપત્નહાભિરાષ્ટ્રો વિષાસહિઃ ।
યથાહમેષાં ભૂતાનાં વિરાજાનિ જનસ્ય ચ ॥ ૧૦.૧૭૪.૦૫

પ્ર વો ગ્રાવાણઃ સવિતા દેવઃ સુવતુ ધર્મણા ।
ધૂર્ષુ યુજ્યધ્વં સુનુત ॥ ૧૦.૧૭૫.૦૧
ગ્રાવાણો અપ દુચ્છુનામપ સેધત દુર્મતિમ્ ।
ઉસ્રાઃ કર્તન ભેષજમ્ ॥ ૧૦.૧૭૫.૦૨
ગ્રાવાણ ઉપરેષ્વા મહીયન્તે સજોષસઃ ।
વૃષ્ણે દધતો વૃષ્ણ્યમ્ ॥ ૧૦.૧૭૫.૦૩
ગ્રાવાણઃ સવિતા નુ વો દેવઃ સુવતુ ધર્મણા ।
યજમાનાય સુન્વતે ॥ ૧૦.૧૭૫.૦૪

પ્ર સૂનવ ઋભૂણાં બૃહન્નવન્ત વૃજના ।

ક્ષામા યે વિશ્વધાયસોઽશ્નન્ધેનું ન માતરમ્ ॥ ૧૦.૧૭૬.૦૧

પ્ર દેવં દેવ્યા ધિયા ભરતા જાતવેદસમ્ ।

હવ્યા નો વક્ષદાનુષક્ ॥ ૧૦.૧૭૬.૦૨

અયમુ ષ્ય પ્ર દેવયુર્હોતા યજ્ઞાય નીયતે ।

રથો ન યોરભીવૃતો ઘૃણીવાઞ્ચેતતિ ત્મના ॥ ૧૦.૧૭૬.૦૩

અયમગ્નિરુરુષ્યત્યમૃતાદિવ જન્મનઃ ।

સહસશ્ચિત્સહીયાન્દેવો જીવાતવે કૃતઃ ॥ ૧૦.૧૭૬.૦૪

પતંગમક્તમસુરસ્ય માયયા હૃદા પશ્યન્તિ મનસા વિપશ્ચિતઃ ।

સમુદ્રે અન્તઃ કવયો વિ ચક્ષતે મરીચીનાં પદમિચ્છન્તિ વેધસઃ ॥ ૧૦.૧૭૭.૦૧

પતંગો વાચં મનસા બિભર્તિ તાં ગન્ધર્વોઽવદદ્ગર્ભે અન્તઃ ।

તાં દ્યોતમાનાં સ્વર્યં મનીષામૃતસ્ય પદે કવયો નિ પાન્તિ ॥ ૧૦.૧૭૭.૦૨

અપશ્યં ગોપામનિપદ્યમાનમા ચ પરા ચ પથિભિશ્ચરન્તમ્ ।

સ સધ્રીચીઃ સ વિષૂચીર્વસાન આ વરીવર્તિ ભુવનેષ્વન્તઃ ॥ ૧૦.૧૭૭.૦૩

ત્યમૂ ષુ વાજિનં દેવજૂતં સહાવાનં તરુતારં રથાનામ્ ।

અરિષ્ટનેમિં પૃતનાજમાશું સ્વસ્તયે તાર્ક્ષ્યમિહા હુવેમ ॥ ૧૦.૧૭૮.૦૧

ઇન્દ્રસ્યેવ રાતિમાજોહુવાનાઃ સ્વસ્તયે નાવમિવા રુહેમ ।

ઉર્વી ન પૃથ્વી બહુલે ગભીરે મા વામેતૌ મા પરેતૌ રિષામ ॥ ૧૦.૧૭૮.૦૨

સદ્યશ્ચિદ્યઃ શવસા પઞ્ચ કૃષ્ટીઃ સૂર્ય ઇવ જ્યોતિષાપસ્તતાન ।

સહસ્રસાઃ શતસા અસ્ય રંહિર્ન સ્મા વરન્તે યુવતિં ન શર્યામ્ ॥ ૧૦.૧૭૮.૦૩

ઉત્તિષ્ઠતાવ પશ્યતેન્દ્રસ્ય ભાગમૃત્વિયમ્ ।

યદિ શ્રાતો જુહોતન યદ્યશ્રાતો મમત્તન ॥ ૧૦.૧૭૯.૦૧

શ્રાતં હવિરો ષ્વિન્દ્ર પ્ર યાહિ જગામ સૂરો અધ્વનો વિમધ્યમ્ ।

પરિ ત્વાસતે નિધિભિઃ સખાયઃ કુલપા ન વ્રાજપતિં ચરન્તમ્ ॥ ૧૦.૧૭૯.૦૨

શ્રાતં મન્ય ઊધનિ શ્રાતમગ્નૌ સુશ્રાતં મન્યે તદૃતં નવીયઃ ।

માધ્યંદિનસ્ય સવનસ્ય દધ્નઃ પિબેન્દ્ર વજ્રિન્પુરુકૃજ્જુષાણઃ ॥ ૧૦.૧૭૯.૦૩

પ્ર સસાહિષે પુરુહૂત શત્રૂઞ્જ્યેષ્ઠસ્તે શુષ્મ ઇહ રાતિરસ્તુ ।

ઇન્દ્રા ભર દક્ષિણેના વસૂનિ પતિઃ સિન્ધૂનામસિ રેવતીનામ્ ॥ ૧૦.૧૮૦.૦૧

મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ પરાવત આ જગન્થા પરસ્યાઃ ।
સૃકં સંશાય પવિમિન્દ્ર તિગ્મં વિ શત્રૂન્તાળ્હિ વિ મૃધો નુદસ્વ ॥ ૧૦.૧૮૦.૦૨
ઇન્દ્ર ક્ષત્રમભિ વામમોજોઽજાયથા વૃષભ ચર્ષણીનામ્ ।
અપાનુદો જનમમિત્રયન્તમુરું દેવેભ્યો અકૃણોરુ લોકમ્ ॥ ૧૦.૧૮૦.૦૩

પ્રથશ્ચ યસ્ય સપ્રથશ્ચ નામાનુષ્ટુભસ્ય હવિષો હવિર્યત્ ।
ધાતુર્દ્યુતાનાત્સવિતુશ્ચ વિષ્ણો રથંતરમા જભારા વસિષ્ઠઃ ॥ ૧૦.૧૮૧.૦૧
અવિન્દન્તે અતિહિતં યદાસીદ્યજ્ઞસ્ય ધામ પરમં ગુહા યત્ ।
ધાતુર્દ્યુતાનાત્સવિતુશ્ચ વિષ્ણોર્ભરદ્વાજો બૃહદા ચક્રે અગ્નેઃ ॥ ૧૦.૧૮૧.૦૨
તેઽવિન્દન્મનસા દીધ્યાના યજુઃ ષ્કન્નં પ્રથમં દેવયાનમ્ ।
ધાતુર્દ્યુતાનાત્સવિતુશ્ચ વિષ્ણોરા સૂર્યાદભરન્ઘર્મમેતે ॥ ૧૦.૧૮૧.૦૩

બૃહસ્પતિર્નયતુ દુર્ગહા તિરઃ પુનર્નેષદઘશંસાય મન્મ ।
ક્ષિપદશસ્તિમપ દુર્મતિં હન્નથા કરદ્યજમાનાય શં યોઃ ॥ ૧૦.૧૮૨.૦૧
નરાશંસો નોઽવતુ પ્રયાજે શં નો અસ્ત્વનુયાજો હવેષુ ।
ક્ષિપદશસ્તિમપ દુર્મતિં હન્નથા કરદ્યજમાનાય શં યોઃ ॥ ૧૦.૧૮૨.૦૨
તપુર્મૂર્ધા તપતુ રક્ષસો યે બ્રહ્મદ્વિષઃ શરવે હન્તવા ઉ ।
ક્ષિપદશસ્તિમપ દુર્મતિં હન્નથા કરદ્યજમાનાય શં યોઃ ॥ ૧૦.૧૮૨.૦૩

અપશ્યં ત્વા મનસા ચેકિતાનં તપસો જાતં તપસો વિભૂતમ્ ।
ઇહ પ્રજામિહ રયિં રરાણઃ પ્ર જાયસ્વ પ્રજયા પુત્રકામ ॥ ૧૦.૧૮૩.૦૧
અપશ્યં ત્વા મનસા દીધ્યાનાં સ્વાયાં તનૂ ઋત્વ્યે નાધમાનામ્ ।
ઉપ મામુચ્ચા યુવતિર્બભૂયાઃ પ્ર જાયસ્વ પ્રજયા પુત્રકામે ॥ ૧૦.૧૮૩.૦૨
અહં ગર્ભમદધામોષધીષ્વહં વિશ્વેષુ ભુવનેષ્વન્તઃ ।
અહં પ્રજા અજનયં પૃથિવ્યામહં જનિભ્યો અપરીષુ પુત્રાન્ ॥ ૧૦.૧૮૩.૦૩

વિષ્ણુર્યોનિં કલ્પયતુ ત્વષ્ટા રૂપાણિ પિંશતુ ।
આ સિઞ્ચતુ પ્રજાપતિર્ધાતા ગર્ભં દધાતુ તે ॥ ૧૦.૧૮૪.૦૧
ગર્ભં ધેહિ સિનીવાલિ ગર્ભં ધેહિ સરસ્વતિ ।
ગર્ભં તે અશ્વિનૌ દેવાવા ધત્તાં પુષ્કરસ્રજા ॥ ૧૦.૧૮૪.૦૨
હિરણ્યયી અરણી યં નિર્મન્થતો અશ્વિના ।

તં તે ગર્ભં હવામહે દશમે માસિ સૂતવે ॥ ૧૦.૧૮૪.૦૩

મહિ ત્રીણામવોઽસ્તુ દ્યુક્ષં મિત્રસ્યાર્યમ્ણઃ ।
દુરાધર્ષં વરુણસ્ય ॥ ૧૦.૧૮૫.૦૧
નહિ તેષામમા ચન નાધ્વસુ વારણેષુ ।
ઈશે રિપુરઘશંસઃ ॥ ૧૦.૧૮૫.૦૨
યસ્મૈ પુત્રાસો અદિતેઃ પ્ર જીવસે મર્ત્યાય ।
જ્યોતિર્યચ્છન્ત્યજસ્રમ્ ॥ ૧૦.૧૮૫.૦૩

વાત આ વાતુ ભેષજં શમ્ભુ મયોભુ નો હૃદે ।
પ્ર ણ આયૂંષિ તારિષત્ ॥ ૧૦.૧૮૬.૦૧
ઉત વાત પિતાસિ ન ઉત ભ્રાતોત નઃ સખા ।
સ નો જીવાતવે કૃધિ ॥ ૧૦.૧૮૬.૦૨
યદદો વાત તે ગૃહેઽમૃતસ્ય નિધિર્હિતઃ ।
તતો નો દેહિ જીવસે ॥ ૧૦.૧૮૬.૦૩

પ્રાગ્નયે વાચમીરય વૃષભાય ક્ષિતીનામ્ ।
સ નઃ પર્ષદતિ દ્વિષઃ ॥ ૧૦.૧૮૭.૦૧
યઃ પરસ્યાઃ પરાવતસ્તિરો ધન્વાતિરોચતે ।
સ નઃ પર્ષદતિ દ્વિષઃ ॥ ૧૦.૧૮૭.૦૨
યો રક્ષાંસિ નિજૂર્વત્યગ્નિસ્તિગ્મેન શોચિષા ।
સ નઃ પર્ષદતિ દ્વિષઃ ॥ ૧૦.૧૮૭.૦૩
યો વિશ્વાભિ વિપશ્યતિ ભુવના સં ચ પશ્યતિ ।
સ નઃ પર્ષદતિ દ્વિષઃ ॥ ૧૦.૧૮૭.૦૪
યો અસ્ય પારે રજસઃ શુક્રો અગ્નિરજાયત ।
સ નઃ પર્ષદતિ દ્વિષઃ ॥ ૧૦.૧૮૭.૦૫

પ્ર નૂનં જાતવેદસમશ્વં હિનોત વાજિનમ્ ।
ઇદં નો બર્હિરાસદે ॥ ૧૦.૧૮૮.૦૧
અસ્ય પ્ર જાતવેદસો વિપ્રવીરસ્ય મીળ્હુષઃ ।
મહીમિયર્મિ સુષ્ટુતિમ્ ॥ ૧૦.૧૮૮.૦૨

યા રુચો જાતવેદસો દેવત્રા હવ્યવાહનીઃ ।
તાભિર્નો યજ્ઞમિન્વતુ ॥ ૧૦.૧૮૮.૦૩
આયં ગૌઃ પૃશ્નિરક્રમીદસદન્માતરં પુરઃ ।
પિતરં ચ પ્રયન્સ્વઃ ॥ ૧૦.૧૮૯.૦૧
અન્તશ્ચરતિ રોચનાસ્ય પ્રાણાદપાનતી ।
વ્યખ્યન્મહિષો દિવમ્ ॥ ૧૦.૧૮૯.૦૨
ત્રિંશદ્ધામ વિ રાજતિ વાક્પતંગાય ધીયતે ।
પ્રતિ વસ્તોરહ દ્યુભિઃ ॥ ૧૦.૧૮૯.૦૩
ઋતં ચ સત્યં ચાભીદ્ધાત્તપસોઽધ્યજાયત ।
તતો રાત્ર્યજાયત તતઃ સમુદ્રો અર્ણવઃ ॥ ૧૦.૧૯૦.૦૧
સમુદ્રાદર્ણવાદધિ સંવત્સરો અજાયત ।
અહોરાત્રાણિ વિદધદ્વિશ્વસ્ય મિષતો વશી ॥ ૧૦.૧૯૦.૦૨
સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ ।
દિવં ચ પૃથિવીં ચાન્તરિક્ષમથો સ્વઃ ॥ ૧૦.૧૯૦.૦૩
સંસમિદ્યુવસે વૃષન્નગ્ને વિશ્વાન્યર્ય આ ।
ઇળસ્પદે સમિધ્યસે સ નો વસૂન્યા ભર ॥ ૧૦.૧૯૧.૦૧
સં ગચ્છધ્વં સં વદધ્વં સં વો મનાંસિ જાનતામ્ ।
દેવા ભાગં યથા પૂર્વે સંજાનાના ઉપાસતે ॥ ૧૦.૧૯૧.૦૨
સમાનો મન્ત્રઃ સમિતિઃ સમાની સમાનં મનઃ સહ ચિત્તમેષામ્ ।
સમાનં મન્ત્રમભિ મન્ત્રયે વઃ સમાનેન વો હવિષા જુહોમિ ॥ ૧૦.૧૯૧.૦૩
સમાની વ આકૂતિઃ સમાના હૃદયાનિ વઃ ।
સમાનમસ્તુ વો મનો યથા વઃ સુસહાસતિ ॥ ૧૦.૧૯૧.૦૪

Last updated July 2, 2013

Special mention : Initial processing and help by Avinash and Shashi Sathaye,
Avinash Chopde, Shree Devi Kumar, Sunder Hattangadi, John Gardner.
Reprocessed from Original in final form by Detlef Eichler with additional corrections.
See Detlef’s site http://www.detlef108.de/Rigvedatm

for other details and formats.

The text is shown with accents (Anudattas, dependent Svaritas,
and independent Svaritas including Kampas). Words are connected (agnimILe).
Ch is doubled as in gachChati according to the rules of Rigveda-Pratishakhya.
At the end of a word m is replaced by Anusvara M if the initial letter of the
following word is a labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has been restored.

Source : The Aufrecht/van Nooten/Holland (Samhita) version
of the Rigveda (http://www.people.fasarvard.edu/ witzel/onlineRVtm).
In this text accented vowels have Udatta or 'independent Svarita' markers.
Kampas are not shown. Words are separated (agnim ILe).
Ch is not doubled as in gaChati. At the end of a word we find m before
a following labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has
been dropped according to a rule of Rigveda-Pratishakhya.

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

---

*Rigveda Mandala 10*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*